that in Māhārāṣṭrī. In a strict sense of the term, it is not a dialectal trait, but it is just a common phenomenon in the evolution of Prākrit which shows different stages: retention of *t*, softening of it into *d*, change of it into light *d*[1] and lastly loss of it leaving only the constituent vowel behind. These stages are more chronological than dialectal; but because the various Prākrits are stereotyped literary languages, even with generalisations of broad traits, it was natural that such traits could be assigned to some Prākrits and not to others. The only question is whether the grammarians had in view any literary works showing or not showing such traits. The Līlāvatī specifies its dialect as Mahārāṣṭra-deśī-bhāṣā. Throughout the text, no change of *t* to *d* is seen in the initial, intervocalic or conjunct position; but *t* is dropped leaving behind the constituent vowel. Here, in this text, words[2] like *dāva*, *āada* (here *āgaya*), *ṇivvudi* (here *ṇivvui*), *suidi* (cf. *sukaya* or *sukayaṁ* here), *hada* (here *haya*), *saṁpadi* (here *saṁpaï*) and *jado*,[3] and the Abl. sing. forms in *-do* or *-du* etc. are conspicuously absent in this text. With poems like the Līlāvatī before Hemacandra, it is but natural that he could remark thus in his Prākrit grammar:

VIII. i. 209: अत्र केचिद् ऋत्वादिषु द इत्यारब्धवन्तः स तु शौरसेनीमागधीविषय एव दृश्यते इति नोच्यते। प्राकृते हि। ऋतुः etc.

VIII. ii. 154: पीनता इत्यस्य प्राकृते पीणया भवति। पीणदा इति तु भाषान्तरे। तेनेह तलो दा न क्रियते।

Because the grammarians were making these distinctions in stereotyped literary Prākrits, they were perfectly justified to do so to the extent to which their rules were confirmed by literary usage.

Though the author of the Līlāvatī says that he is writing in Marahaṭṭha-desi-bhāsā, it would not be correct to presume that his language is the same as the language spoken in Mahārāṣṭra at his time. All that one can assume is that his is a literary language, expressed by a man of learning, but based on or closely akin to the vernacular of Mahārāṣṭra sometime earlier than the age of the author.

---

1 The Nātyaśāstra XVII. 12 observes thus: अस्पष्टश्च दकारो भवत्यनादौ तकार इतरार्दा etc.

2 Vararuci's Prākṛta-prakāśa II. 7

3 Possibly following Vararuci, VI. 9, Hemacandra allows *kado*, *jado*, *tado* etc. in VIII. ii. 160; but the Līlāvatī gives the forms *kao*, *tao* etc. besides *katto* etc.

Between the literary languages known by the names Prākrit and Apabhraṁśa the vocabulary is practically and substantially common; many authors cultivated them side by side; and the grammatical elements akin to them and current in the contemporary stage of the Modern Indo-Aryan as spoken by the people often affected them. Scrutinised from this point of view, we find in the dialect of the Līlāvatī good many traits which are not usual in Prākrit or Māhārāṣṭrī but are quite normal in Apabhraṁśa as described by Hemacandra and as current in literature: i) The change of *m* to *v*, or nasalised form of it, *ṽ* or *mv*.[1] ii) Confusion of genders especially between the mas. and neu. nouns.[2] iii) Variations between short and long vowels.[3] iv) *Some words stand without any* terminations.[4] v) Nom. and Acc. sing. forms, which are often identical in Apabhraṁśa, are mutually confused; Inst. and Loc. pl. get interchanged;[5] *jo*, *so*, *eso* stand for *jaṁ*, *taṁ*, *eyaṁ*, which is quite normal in Apabh.[6] vi) Some of the pronominal forms are loosely used. vii) The Gerund form *samāṇavi* is recognised by grammarians only in Apabh. Thus there is no doubt that the Prākrit or the Marahaṭṭha-desi-bhāsā used by the author of the Līlāvatī has incorporated certain tendencies of Apabhraṁśa: either he inherited them through his close study of Apabhraṁśa literature or through the channel of his mother-tongue or local vernacular which had some points common with literary Apabhraṁśa.

It has been customary nowadays to state dogmatically what New Indo-Aryan language has descended from what Middle Indo-Aryan language. Except perhaps in the case of Gujarātī, the evidence is meagre elsewhere; and one has to be very cautious in stating, in toto, the parentage of a particular Modern Indian language. The reasons are plain. The Prākrit dialects preserved to us in literature are literary speeches, though connected with the spoken languages of some locality and age. The present-day Modern Indian languages are a continuation or

1 Compare Hemacandra's Grammar VIII. iv. 397.
2 Ibidem Sūtra 445.
3 Ibidem Sūtra 329–30.
4 Ibidem 344–45.
5 Ibid. 347.
6 See above p. 81, Footnote 2.

development of the spoken-speech, now and then influenced by literary usages and grammatical stereotyping. So it would be overstating, if not misrepresenting, the situation when it is asserted that Marāṭhī has descended from Sanskrit, Pāli, Mahārāṣṭrī or Apabhraṁśa. These are sweeping generalisations from a few common points, and such statements are far from the scientific needs of the language-study. What really requires to be done is that the facts of Marāṭhī language, both in its literary strata and spoken dialects, should be authentically ascertained, and then one should detect their counterparts in the Middle Indo-Aryan, some Prākrits as well as Apabhraṁśa. The Māhārāṣṭrī Prākrit and its allied Apabh. idiom are sure to give us some earlier links of Marāṭhī. Vocabulary and loan-words are not always a safe criterion in this respect. Prākrit and Apabhraṁśa have nearly the same vocabulary but as languages they present distinct phases. Apart from striking common words, parallel points should be mainly detected in pronouns, their forms and usage; in the names of relations, parts of the body and essential articles of domestic use; in the roots and verbal formations; etc.

Because the author of the Līlāvatī himself calls the dialect of this poem Mahārāṣṭra-deśī-bhāṣā one feels tempted to find something common with Marāṭhī. The confusion between the Nom. and Inst. pronominal forms really anticipates what one finds in Marāṭhī. There are many Dhātvādeśas used in this text which closely remind those in Marāṭhī. To explain a Marāṭhī verbal form, Konow[1] was connecting it with Sanskrit *na-(j)ānāmi*, but in this text more than once the base *ṇa-yāṇa* is used and it is clearly the predecessor of the Marāṭhī form.[2] Expression like *rāiṇo bhaṇiūṇa* (Marāṭhī *rājālā sāṅgūna* or lit. *mhaṇūna*), *gharaharaṁ* (Mar. *gharoghara*), *paṁca-cha* (Mar. *pāñca-sahā*) are quite close to Marāṭhī idiom. The phrase *tumhaṁ ciyāi* deserves special attention; the appendage *ciya* is no more a separate word, but both together form one word to which the termination is added: compare Marāṭhī *tumacyā*, *āmacyā* etc. Common points[3] like these go to indicate that our

1 Linguistic Survey of India, Vol. VII, Intro. p. 5.

2 Note the words like *liṁkarūva*.

3 In continuation of the common points already noted by Konow Grierson, Bloch and others.

author's language, the Marahaṭṭha-desī-bhāsā, is a literary language and in all likelihood it is based on the spoken language of Mahārāṣṭra which with the lapse of time and under different influence has grown into present-day Marāṭhī.

6. The Sanskrit Commentary and Its Author

In this edition the text of the Līlāvatī is accompanied by a Sanskrit commentary, called *Līlāvatī-kathā-vṛttiḥ*, tentatively presented here from an unsatisfactory transcript of MS. B which is already described above. As a Shorter Recesion, MS. B has its importance which is further heightened by the Sanskrit *vṛtti* which is not found anywhere else as yet. The commentary has a big gap, because the MS. B has lost some folios; and its text is unsatisfactory in many a place. Still it is highly useful for verifying the readings of the Prākrit text and for giving us the explanations of some of the gāthās and the Sanskrit chāyā of most of them.

At the beginning of the poem, the commentary is pretty exhaustive: the gāthās are difficult and full of mythological allusions, and consequently there is much to explain. But as one gradually advances, say after the first 120 gāthās or so, the discussions decrease, explanations grow meagre, and the Vṛtti assumes the form of just a bare Sanskrit chāyā. at the most it appeals to some or the other Sūtra of Hemacandra's grammar on a particular word, generally a Dhātvādeśa. In a few cases the readings are discussed (gāthās 155, 364 etc.), but that is only casually. It is surprising that the commentary sometimes explains readings which are not found in MS. B (gāthās 265, 279, 320, 412 etc.): that is a riddle which can be explained only when some more MSS. of the Shorter Recension become available. Though the Vṛtti is not an outstanding performance, it is helpful in many places.

As discussed above, Hemacandra knew this Līlāvatī; and there is every likelihood of his having used its text in collecting material for his Prākrit grammar. This is indirectly confirmed by the commentator who quotes Hemacandra's grammar repeatedly, nearly fifty times. He also quotes from the Desī-nāmamālā and Kāvyānuśāsana (pp. 20 and 193) of Hemacandra. Now and then there are quotations in the commentary, generally in Sanskrit and only once or twice in Prākrit

(pp. 20, 28); they are mostly anonymous (pp. 4, 5, 8 [Pañcatantra], 10 [Ibid.], 17 [Ibid.], 18 [Ibid.], 28, 41 [Ibid.], 53, 56, 61, 131 [Nītiśataka] & 162), and rarely with their sources specified (pp. 2 Kālidāsa, 20 Hemasūri, Vātsāyana, 31 Cakrapāṇivijaya-mahākāvya, 33 Nitiśāstra, 52 Smṛti and 193 Hemasūri).

It is the commentator who discloses to us the name of the author of the Līlāvatī as well as that of his wife; but unfortunately he has not said anything about himself, nor has he mentioned his name.[1] The use of expressions like *mutkalāpya* (p. 76, l. 27) and the confusion between *bhavana* and *bhuvana* (p. 1, l. 6) go to indicate that he belonged to Gujarāt. According to Pandit's observation,[2] the use of *kila* at the beginning of a sentence is found only in Sanskrit works by Jaina writers; and our commentator shows this trait in his writing. Further the fourfold classification of *buddhi* (p. 40) and, if I understand it right, the use of the term *upayoga* (p. 60), as found in Jaina literature and philosophy go to indicate not only the commentator's close study of Jaina scriptures but also the possibility of his being a follower of Jaina religion. His reference to Hemacandra in respectful terms as *prabhu-S'rī Hemasūrayah* (pp. 20 and 193) perhaps indicates that he was a monk of the Śvetāmbara section. Thus it appears that the commentator was a Śvetāmbara Jaina monk from Gujarāt. As to his date, he must have flourished sometime between A. D. 1172 (when Hemacandra died) and A. D. 1404 (the date of the Bikaner MS. which contains the Sanskrit Vṛtti).

---

1 According to the Jinaratnakośa (Poona 1944), p. 338, there is an anonymous MS. of the Līlāvatī accompanied by the commentary of Malayasāgara in the Jainānanda Pustakālaya, Gopīpura, Surat. It is necessary that this MS. should be inspected, and then alone something can be said about its identity or otherwise with the present text of Līlāvatī and its Sanskrit commentary.

2 See the Notes on gāthā No. 5 at the end.

कोउहल - विरइया

लीलावई

णाम

कहा ।

णमह[1] सरोस-सुं[2]यरिसण-सच्चवियं कररुहावली-जुयलं ।
हिरणक्क[3]स-वियडोरत्थलट्ठि[4]-दल-गब्भिणं हरिणो ॥ १

तं [5]णमह जस्स तइया [6]तइय-वयं तिहुयणं तुलंतस्स ।
सायारमणायारे अप्पणमप्पं[7] च्चिय [8]णिसण्णं ॥ २

---

१) णमह—हरेर्नारायणस्य कररुहावलीजुअलं उभयकरनखश्रेणिं नमत नमस्कुरुतेति संबन्धः । नमस्करणीयस्य सर्वपूज्यत्वात् चतुर्दशभवनजना इत्यादिकर्तृपदमनुक्तमपि गम्यम् । किंविशिष्टं कररुहावलीजुयलं । सरोससुयरिसणसच्चवियं सरोषोऽन्तःप्ररूढकोपो यः सुदर्शनश्चक्रं तेन सच्चवियं दृष्टम् । 'दृशो नियच्छापेच्छावयच्छावयज्झवज्जसच्चव-देक्खोअक्खावयक्खावयगॅ*पुलोअपुलअनिआवआसपासाः' [हैम० ८-४-१८१] इति प्राकृतव्याकरणसूत्रत्वात् सच्चवियं । तत्कार्यवधस्य नखपंक्त्यैव साधितत्वाच्चक्रस्य सविशेष-पोषरोषो दर्शनमात्रं चावशिष्टम् । नन्वायुधानामचेतनत्वात् पुरुषप्रेर्यतयैव कार्यकारित्वं रोषदर्शनं च प्राणिधर्मस्तत्कथमिदम् । मैवं वोचः । परमपुरुषायुधानामपि देवताधिष्ठितत्वा-च्चेतनावत्त्वं व्यक्तमेव । अथवा लक्षणशब्दा अमी मञ्चाः क्रोशन्तीत्यादिवत्पुरुषेऽध्या-रोप्यन्ते । पुनर्विशिनष्टि । हिरणक्क इति । हिरण्यकशिपुर्दानवेन्द्रस्तस्य विकटं विपुलं यदुरो वक्षस्तदेव स्थलमिव स्थलं निचितरूपं तत्र यान्यस्थीनि तेषां दलानि खण्डानि तैर्गर्भितं संपृक्तं संमिलितम् इत्यर्थः । गर्भितमिति 'गर्भितातिमुक्तके णः' [हैम० ८-१-२०८] इति प्राकृतलक्षणसूत्रेण तस्य णत्वम् ॥ ननु शौर्यौदार्यगाम्भीर्यधैर्यादि-वर्यगुणग्रामवर्णनमपास्य किमर्थमादौ नखा एव नमस्कृता इति चेन्न । दैवतवरानुभावात् स्त्रीपुंसाभ्यामवध्यस्य तस्य नरसिंहरूपेण विष्णुना शस्त्रागोचरत्वाच्च नखैरेव विदारितत्वात् प्राधान्यम् इत्यदुष्टः आदावेव कररुहावलीनमस्कारः ॥ नन्वर्वाचीनपराचीनावस्थाद्वय-स्वरूपस्य भगवतः किमर्थं परमार्थतोऽनुपादेयरूपार्वाचीनावस्थादिमं [9]नमस्कारस्याभ्युपगतेति न वाच्यम् । अत्र हि प्रबन्धे श्रीशातवाहननरेन्द्रस्य लीलावतीपाणिग्रहेण भुक्तिफलमेवा-भिधेयम् । तच्चार्वाग्दशायामेव सफलमाकलयाम इति सर्वमनवद्यमिति प्रथमगाथार्थः ॥ १ ॥ तस्यैव पुरुषोत्तमस्य नवमेवावतरणैः कृतजगत्त्रयोपकारस्य वैशिष्ट्यं ख्यापयन्नाह ।

२) तं णमह— तं हरिं नमत । यस्य तइया तदानीं बन्धनावसरे । त्रिभुवनं स्वर्गमर्त्य-

---

1) P opens with ६० ॥ ॐ नमो विघ्नराजाय ॥, J with ६० ॥ नमः सर्वज्ञाय ॥, B with ६०॥ श्रीसरस्वत्यै नमः ॥. 2) = सरोषसुदर्शन, PJB सुअरि°. 3) P हरिणक्कस, B हिरणक्कस. 4) P °त्थलत्थिदो gap, J °त्थलगब्भिणं. 5) PJB नमह. 6) = तृतीयपदं, J तईआ तईअवयं तिहूयणं. 7) [°मप्पे च्चिय.] 8) PJB निस°. 9) B नमस्कारश्चाभ्यु°.

तस्सेय[1] पुणो पणमह [3]णिहुयं हलिणा हसिज्जमाणस्स ।
अपहुत्त-देहली-लंघणद्ध-वह[4]-संठियं चलणं ॥ ३
सो जयउ जस्स[4] पत्तो कंठे रिट्ठासुरस्स घण-कसणो[5] ।
उप्पाय-पवड्डिय[6]-काल-पास-करणी[7] भुयप्फलिहो[8] ॥ ४
5 रक्खंतु वो महोवहि-सयणे सेसस्स फण[9]-मणि-मऊहा[10] ।
हरिणो सिरि-सिहिणोत्थय[11]-कोत्थुह-कंदंकुरायारा ॥ ५
[महुमह-चलणुप्पीडिय-सेस-भुयंगेण मुक्क-फुक्कारा ।
पवणाऊरिय-जलयर-सुत्त-विवुद्धो हरी जयउ ॥ ५*१][12]

पातालरूपम् । तुलयतः चरणत्रयेणाकलयतः । तृतीयपदं साकारमात्मानं निराकारे
10 आत्मन्येव निषण्णं स्थितम्[13] । असंभाव्यं चेदम् । न हि हुतोऽपि हुताशनः स्वं दग्धुं विदग्धः । न हि सुतीक्ष्णाप्यसिधारा स्वं छेत्तुं छेका । तथा साकार आत्मा कथं निराकारे आत्मनि निषण्णो[14] भवितुमर्हति । अथ च साकारः शरीरमय आत्मा निराकारे आत्मनि आकाशरूपे, विष्णुपदं नभ इति वचनात् । श्रीकालिदासोऽप्याह ।

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।
15 रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥

वामनावतारे हि पदेन व्योमपथमवरुन्धानस्य स्वात्मा स्वात्मन्येव निविष्ट इति व्यक्तमापतितमित्यर्थः ॥ २ ॥ तस्यैवानर्घ्यमहिम्नो बाललीलायितमाह । ३) तस्सेय — पुनर्वारंवारं तस्यैव हरेर्बलिना बलभद्रेण निभृतं वैलक्ष्यरक्षणाय उत्तमत्वाद्वा निःशब्दं हस्यमानस्य अप्राप्तदेहलीलङ्घनाध्वर्ध्यस्तं स्थितं चरणं प्रणमत । अप्राप्तो योऽसौ देहलीलङ्घनस्य अध्वा
20 मार्गस्तेन त्र्यस्तं तिर्यक् स्थितम् । अथवा अप्राप्तदेहलीलङ्घनादर्धत्र्यस्तं स्थितम् । 'वक्रादावन्तः' [हैम० ८-१-२६] इत्यनुस्वारे तंसं । बाल्ये हि भगवतो देहलीलङ्घनेऽप्यक्षमतां विलोक्य पुराणार्थमनुस्मृत्य च बलभद्रेण हसितम् । किलासावेव कंसादिदानवान् निर्दलयिष्यति इति गाथार्थः ॥ ३ ॥ ४) सो जयउ — स विष्णुर्जयतु । यस्य भुजपरिघो भुज एव कठोरत्वदार्ढ्याभ्यां परिघो अर्गलः । 'पाटिपरुषपरिघपरिखापनस-
25 पारिभद्रे फः' [हैम० ८-१-२३२] इति फादेशे फलिहो । घनवन्मेघवत् कृष्णोऽरिष्टासुरस्य वृषभासुरस्य कण्ठे शोभते । कीदृश इत्याह । उप्पाए इति युगक्षयकालस्तत्र संहारसमये प्रवर्धितो दीर्घतामापन्नो यः कालस्य यमस्य पाशस्तस्य करणिः सदृशः । अयमर्थः । वृषभासुरसंजिहीर्षया हरिस्तत्कण्ठे कालपाशायमानं निजभुजं चिक्षेप ॥ ४ ॥ विष्णोः शय्यारूपेण शेषाहिराजमपि स्तौति । ५) रक्खंतु — हरेर्महोदधिशयने समुद्र-

1) B तस्सेव. 2) PJB निहु°. 3) B तंसं ठियं for वहसंठियं. 4) B जस्स कंठे सोहइ रिट्ठा°. 5) B कसिणो. 6) = प्रवर्धितः, P पवहिय, JB पवड्डिय. 7) = सादृश्यं प्राप्तः, P करणीं, J करिणी, B करणी. 8) P फलिहो, JB प्फलिहो. 9) P फणिमणि, B फण 10) J मणिपईवा. 11) = पयोधर, =व[=अव]स्तृत. 12) Not found in any ms., but reconstructed from the Sanskrit com. in B. 13) B निषण्णः स्थितः. 14) B आत्मानिषण्णो.

हरिणो जे[1]मलज्जुण-रिट्ठ-केसि-कंसासुरिंद-सेलाण[2] ।
भंजण[3]-चलण[4]-वियारण-कड्डण-धरणे भुए णमह ॥ ६
कक्कस-भुय-कोप्पर-पूरियाणणो क[5]ढिण-कर-कयावेसो[6] ।
केसि-किसोर-कय[7]त्थण-कउज्जमो जयइ[8] महुमहणो ॥ ७
सो[9] जयउ जेण त[10]यलोय-कवलणारंभ-गब्भिय-मुहेण ।
ओसा[11]वणि व्व पीया सत्त वि चु[12]लुय-ट्ठिया उ[13]यही ॥ ८

शय्यायां सेसस्स शेषनाम्नो भुजगराजस्य फणमणिमयूखाः फणरत्नकान्तयो वो युष्मान् रक्षन्तु पालयन्तु । कीदृशास्ते । सिरि इति श्रीर्लक्ष्मीस्तस्या देशीभाषायां सिहिणौ स्तनौ ताभ्यां उत्थय आच्छादितो यः कौस्तुभ एव कन्दस्तस्याङ्कुराकारा मूलोद्भूतप्ररोहरूपाः । किल हरेः सिन्धौ शय्याकृतशेषफणामणिकान्तयः स्नेहालिङ्गितलक्ष्मीस्तननिपीडितकौस्तुभ- कन्दाङ्कुरा इव राजन्ते । उभयकान्तिसाम्यमित्यर्थः ॥ ५ ॥ ५*१) महुमह इति । मधुमथनवलनोत्पीडितशेषभुजंगेन मुक्तफूत्कारात् । पवनापूरितजलचरसुप्तविबुद्धो हरि- र्जयतु । निद्रायां सालस्यं हरेरङ्गं मोटितम्[14] । शय्यागतः शेषराजस्तदा फूत्कारानमुञ्चत । तद्वातेन जलचरः पाञ्चजन्यशङ्खो दध्वने । जजागार मुरारिरित्यर्थः ॥ ५*१ ॥ ६) **हरिणो** – हरेर्भुजान्नमत । बाहुषु बहुवचनं चतुर्भुजत्वात् । किंभूतान् भुजान् । भञ्जनवलनविदारणाकर्षणधरणान् । केषाम् । यमलार्जुनारिष्टकेशिकंसासुरेन्द्रशैलानाम् । यमलार्जुनस्य वृक्षरूपतया भञ्जनम् । अरिष्टासुरस्य वलनं मर्दनम् । केशिनोऽश्वरूपस्य विदारणम् । कंसासुरेन्द्रस्याकर्षणं सिंहासनादाकृष्य मल्लयुद्धभूमौ निपातनम् । शैलस्य गोवर्धनपर्वतस्य जलमग्नगोकुलरक्षणाय बाहुभ्यामुत्पाट्य गगने धारणम् । एवंविधकार्यक्षमान् बाहून्नमत । न वाच्यं भुजचतुष्टयेन कथं भञ्जनादिपञ्चकर्माण्यकरोदिति । स्वरूपमात्रकथन- मिदं न च युगपत्कारित्वम् ॥६॥ ७) **कक्कस** – केशिकिशोरकदर्थनकृतोद्यमो हरिर्जयतु । केशिदैत्य एव दि[तितनयो अ]ल्पवयास्तुरंगमस्तस्य कदर्थनं तत्र कृतोद्यम इति । कथमिति । कर्कशभुजस्य कूर्परं मध्यं तेन पूरिताननो भृतमुखः । अन्यच्च कठिनकरेण कृत आवेष्टो वेष्टनं ग्रीवोपरि येन । 'वेष्टः' [हैम० ८-४-२२१] इति सूत्रेण [आवेढो] ॥ ७ ॥ अथ महेश्वरमुपश्लोकयन्नाह । ८) **सो जयउ** – स जयतु येन त्रैलोक्यकवलनारम्भगर्भि- तमुखेन [त्रिजगत्]संहारप्रारम्भसज्जितवदनेन । चुलुकस्थिताः करतलकलिताः । सप्तापि समुद्रा आपोशानमिव मन्त्रपूतनीरमिव आचान्ताः । किल संहारचिकीर्षयादौ सप्त समुद्रा- नापोशानीचकार । ईदृक्कर्मणा अनुक्तोऽपि महेश्वरो ज्ञेयः । सप्त समुद्राश्चामीः ।

1) = युगलार्जुन. 2) B सेलाणं. 3) = यथासंख्यं. 4) P दलण, J वलण, B gap. 5) = कठिन- करकृतावेसः. 6) P करकयावेसो, J कयकरावेसो, B करकयावेढो. 7) = कदर्थकृतो. 8) P gap. J जयइ, B जयउ. 9) B स. 10) P तइलोय, J तयलोअ, B तेलुक्क. 11) = उपोसानजलमिव, P उसायणि व्व, J ओसायणि व्व, B gap – वणं व पीया. 12) J चुलअट्ठिया. 13) P उयहगा, J उअही, B उवही. 14) B मेल्याग[तम्].

गोरीए गुरु-भरकंत-महिस-सीसट्ठि-भंजणुद्धरियं ।
णमह णमंत-सुरासुर-सिर-मसिणिय-णेउरं चलणं ॥ ९
चंडीएँ कढिण-कोयंड-कड्ढणायास-सेयं-सलिलुल्लो[1] ।
णिंतं[3]-कुसुंभुप्पीलो रक्खउ वो कंचुओ णिच्चं ॥ १०
ससहर-कर-संवलिया तुम्हं सुर[4]-णिण्णुयाए णासंतु ।
पावं फुरंत[5]-रुद्दट्टहास-धवला जलुप्पीला ॥ ११
जयंति ते सज्जण-भाणुणो सया वियारिणो[6] जाण सुवण्ण[7]-संचया ।
अइट्ठ[8]-दोसा वियसंति संगमे कहाणुबंधा[9] कमलायरा[10] इव ॥ १२

लवणो रसमयः सुरोदकः सार्पिषो दधिपयाः पयःपयाः ।
स्वादुवारिरुदधिश्च सागरा द्वीपवि[स्तर]तया व्यवस्थिताः ॥

॥ ८ ॥ अथ पार्वतीं स्तौति । ९) **गोरीए** – गौर्या उमायाश्चरणं नमत । किंभूतम् । गुरुभराक्रान्तमहिषशीर्षास्थिभञ्जनोद्धृतम् । अन्यच्च । नमत्सुरासुरशिरोभिर्मसृणितं घृ[ष्टं नू]पुरं यस्य तम् ॥ ९ ॥ तस्या एव वीररसोत्कर्षमाह । १०) **चंडीए** – चण्ड्याश्चामुण्डायाः कञ्चुकमुररछादनं वो भवतो रक्षतु । कीदृशः कञ्चुकः । णिंतो निर्गच्छन् कुसुम्भस्य उत्पीडः पूरो यस्मात् स तथा । केन कृत्वा । कठिनकोदण्डकर्षणायासस्वेदसलिलेन[*] । कठोरधनुर्दण्डाकर्षणोत्पन्नस्वेदजलैरार्द्रभूत उन्मीलत्कौसुम्भरसश्च । कञ्चुकः पातु भवतामिति भावः ॥ १० ॥ गङ्गास्तुतिमाह । ११) **ससहर** – सुरनिम्नगाया गङ्गाया जलोत्पीडा नीरपूरा भवतां पापं कलुषं नाशयन्तु । किंभूता इत्याह । शशधरकरसंवलिता हरशिरोनिवासित्वाच्चन्द्रकिरणसंमिश्राः । अत एव स्फुरद्देदीप्यमानरुद्राट्टहासवत् धवलाः श्वेताः ॥ ११ ॥ इत्थं देवदेवीः संतोष्य ग्रन्थसाहाय्यकारकान् सज्जनान् अभ्यर्थयन्नाह । १२) **जयंति ते** – ते सज्जनभानवः सुजनसूर्याः सदा सर्वदा जयन्ति सर्वोत्कर्षेण वर्तन्ते । किंभूताः । वियारिणो । सज्जनपक्षे विचारिणः पूर्वापरपरामर्शशीलाः, सूर्यपक्षे वियच्चारिणः आकाशप्रसमराः । येषां संगमे संसर्गे कथानुबन्धाः कमलाकराः कमलवनानीव विकसन्ति । कीदृशास्ते । प्रथमपक्षे सुवर्णसंचयाः शोभनाक्षरसमूहाः, इतरत्र सुष्ठु पर्णानां पत्राणां संचयाः समूहाः येषु ते तथा । अन्यच्च । अदृष्टदोषा दूषणवर्जिताः, द्वितीयपक्षे अदृष्टा रात्रिर्यैः सूर्यविकाशित्वात् । शास्त्रमाहात्म्यारोपणं हि सुजनायत्तम् । यदुक्तम् ।

वक्तार एव कवयः शास्त्राणि महर्घतां नयन्त्यन्ये ।
प्रभवः पयोधिरुपचितिरीश्वरभवनेषु रत्नानाम् ॥

---

1) = सेकसलिलार्द्र. 2) B सलिलेण. 3) = निर्यत् कुसुंभसंधानः. 4) P सुवनिण्णयाए, J सुरणिण्णुयाइ, B सुरनिम्मयाइ. 5) P gap, J पुरत्त for फुरंत of B. 6) = विचार्यमाणाः अन्यत्र वियच्चारिणः, J वियासिणो. 7) = अन्यत्र सुवर्णसंचयाः. 8) = अदृष्टदोषाः । अइ gap. 9) J °बद्धा. 10) J कम्वलाहरा.

अहवा ।

सो जयउ[1] जेण सुयणा[2] वि दुज्जणा इह विणिम्मिया भुयणे ।
ण तमेण विणा पावंति चंद-किरणा वि [3]परिहावं ॥ १३

दुज्जण-सुयणाण [4]णमो णिच्चं पर-कज्ज-वावड-मणाण ।
एक्के भसण-सहावा पर-दोस-परम्मुहा[5] अण्णे ॥ १४

अहवा ण[6] को वि दोसो दीसइ सयलम्मि [7]जीय-लोयम्मि ।
सव्वो च्चिय[8] [9]सुयण-यणो जं [10]भणिमो तं [11]णिसामेह ॥ १५

[12]सज्जण-संगेण वि [13]दुज्जणस्स ण हु कलुसिमा समोसरइ ।
ससि-मंडल[14]-मज्झ-परिट्ठिओ वि [15]कसणो च्चिय कुरंगो ॥ १६

॥ १२ ॥ अथ[वा]दुर्जनानपि संतोषयन्नाह । **१३) सो जयउ** – स कश्चिद् ब्रह्मा दैवं वा सृष्टिकर्ता जयतु येन सुजना इव दुर्जना इह भुवने विनिर्मिताः सृष्टाः । न तु सर्वजनहृदयंगमान् सज्जनान् सृजन् जयतुतराम् । दुर्जना अभिनन्दयन्तु । कथमित्याह । न तमेण इति । तमसान्धकारेण विना चन्द्रकिरणा अपि परभागं गुणोत्कर्षं न प्राप्नुवन्ति । यद्यपि निन्द्यं तमस्तथा चन्द्रतेजःप्रवृद्धिहेतुत्वात् सुभगम् । तथा दुर्जनाश्चेन्न भवेयुः को नाम सज्जनसौमनस्यमनुहृष्येदिति ॥ १३ ॥ **१४) दुज्जण** – नित्यं परकार्यव्यापृतमनोभ्यः सुजनदुर्जनेभ्यो नमः, नमोऽस्तु । सुजनपक्षे परकार्यं परोपकारः, दुर्जनपक्षे परेषां कार्याणि परतप्तयः इत्यर्थः । तयोर्विशेषमाह । एके दुर्जना भषणस्वभावाः यत्तदसंबद्धप्रलापिनः । अन्ये सुजनाः परदोषपराङ्मुखाः । नमस्कारस्तु खलेषु उपहासपरोऽपि भवति । यदुक्तम् ।

नमस्यं तत्सखि प्रेम घण्टारणितसोदरम् ।
क्रमकृशिमनिःसारमारम्भगुरुडम्बरम् ॥

॥ १४ ॥ **१५) अहवा** – अथवा सकलेऽपि जीवलोके न कोऽपि दोषो दृश्यते । सर्व एव [16]सुजनो जनो ज्ञेयः । कोऽर्थः । दुर्जनशङ्कया हि सन्तो नाल्पमपि विरुद्धमासेवन्ते, अतस्तेऽपि [17]सुजनाश्च ज्ञेयाः । यदुक्तम् ।

यच्छङ्कया दोषकलङ्कपङ्के सन्तो न मज्जन्ति कदाचनापि ।
तं दुर्जनं सज्जनमेव मन्ये जनस्तु यत्किंचिदपि ब्रवीतु ॥

[18]यद्भणामो वयं [19]तन्निशाम्यन्तु शृण्वन्तु ॥ १५ ॥ **१६) सज्जण** – सज्जनसंगेनापि

---

1) P जयओ, J जयउ. 2) B सुयणा वि णिम्मिआ दुजणाइ इह सुवणे [=दुज्जणा इह भुवणे]. 3) B पब्भावं. 4) PJB नमो. 5) P परंमुहा. 6) PJB न. 7) P जीवलोयंमि, J जीयलोअंमि, B जीवलोअंमि. 8) P चिय, JB चिय. 9) P सुयणजणो, J सुयणयणो, B सुयलुजणो. 10) B भणियं तं. 11) PJB निसा°. 12) J दुज्जण. 13) J सज्जणस्स. 14) P मंडण, JB मंडल. 15) B किसणु चिय. 16) B सर्वश्च सुजने जने. 17) B सुजनाश्चाज्ञया. 18) B यद्गुणामावयं. 19) B तन्निशाम्यं शृण्वंतु.

[1]दुज्जण-संगेण वि सज्जणस्स [2]णासं ण होइ सीलस्स ।
तीएँ सलोणे वि मुहे तह वि हु अहरो महुं सवइ ॥ १६*१
[3]अलमवरेणासंबंधालाव-परिग्गहाणु[4]बंधेण ।
[5]वाल-जण-विलसिएण [6]व णिरत्थ[7]-वाया-पसंगेण ॥ १७
आसि [8]तिवेय-तिहोमग्गि-संग[9]-संजणिय-तियस[10]-परिओसो ।
संपत्त[11]-तिवग्ग-फलो वहुलाइच्चो त्ति णामेण ॥ १८
अज्ज वि महग्गि-पसरिय-धूम-सिहा-कलुसियं वं[12] [13]वच्छयलं ।
उव्वहइ मय-कलंकच्छलेण मयलंछणो जस्स ॥ १९
तस्स य गुण-रयण-महोवहीएँ[14] एक्को सुओ समुप्पण्णो ।
भूसणभट्टो णामेण[15] णियय-कुल-णहयल-मयंको ॥ २०
जस्स पिय-बंधवेहि [16]व चउवयण-[17]विणिग्गएहि वेएहि ।
एक्क-वयणारविंद-ट्ठिएहिँ [18]वहु-मणिओ[19] अप्पा ॥ २१

दुर्जनस्य सुनिश्चितं कलुषत्वं न समपसरति चित्तमालिन्यं नापयाति । दृष्टान्तमाह । शशिमण्डलमध्यस्थितोऽपि कृष्ण एव कुरङ्गो हरिणः । चन्द्रनैर्मल्यनित्यसंगादपि तस्य श्यामता नापगतेति ॥ १६ ॥ १६*१) दुज्जण – [दुर्जनसंगेनापि सज्जनस्य नाशं न भवति शीलस्य । स्त्रियः सलवणेऽपि, सलावण्येऽपि वा, मुखे तथापि खलु अधरो मधु स्रवति ॥ १६*१ ॥] उपसंहरन्नाह । १७) अलं – तस्मात् किं सुजनदुर्जनचर्चया । अलं पर्याप्तम् अस्माकम् अपरेण प्रजल्पितेन वाचो विस्तरेण बालजनविलसितेनेव । किं क्रियते किं साध्यते जिह्वाप्रसरेण । बाला मूर्खाः शिशवश्च स्वभावाद् बहुलालापाः ॥१७॥ स्ववंशवर्णनं पूर्वम् । १८) आसि – त्रिवेदत्रिहोमाग्निसंगसंजनितत्रिदशपरितोषः । संप्राप्तत्रिवर्गफलः साधितधर्मकर्मार्थो नाम्ना बहुलादित्य आसीद्बभूव । त्रिवेदा ऋग्यजुः-सामाख्याः । त्रिहोमाग्नयः दाक्षिणात्यगार्हपत्याहवनीयाख्याः ॥ १८ ॥ . १९) अज्ज वि – अद्यापि मृगलाञ्छनश्चन्द्रो मृगकलङ्कच्छलेन यस्य बहुलादित्यद्विजस्य मखाग्निप्रसृत-धूमशिखाकलुषितमिव वक्षःस्थलम् उद्वहति । मखो यज्ञः । यज्ञावसरे वह्निकुण्डहूतघृत-घटशतधूमेनैव चन्द्रः कलङ्कितो न च लाञ्छनेनेत्युत्प्रेक्षा ॥ १९ ॥ २०) तस्स – तस्य च गुणरत्नमहोदधेरेकः सुतः समुत्पन्नः । नाम्ना भूषणभट्टो निजकुलनभस्तलमृगाङ्कः ॥ २० ॥ २१) जस्स – यस्य भूषणभट्टस्य प्रियबान्धवैरपि चतुर्वदनविनिर्गतैर्वेदैरेक-

---

1) Found only in J. 2) J नासं न. 3) B ता अलमवरेण पयंपिएण वायाइ वित्थरेणम्ह । 4) P परिग्गहाण, but J °णु°. 5) B वालऊण. 6) B व किं कीरइ जिब्भपसरेण. 7) = निरर्थकवाय[=क्]प्रसंगेन, PJ नि°. 8) = त्रिवेद, J तेवेय. 9) P संवासजणिय, J संग्गसंज°, B संगसंजणिअ. 10) = त्रिदश. 11) P संपत्तनिचउपोयत्तु gap, J संपत्ततिवग्गफलो, B संपत्ततिवग्गा[=ग्ग]हलो. 12) P च, J व्व. B व. 13) [वच्छथलं], B वच्छलयं 14) P महोय°, J महोव°, B महोवहिस्स. 15) PJ नामेण नियय, B नामे णिअकुलणहभूसणमियंको । 16) J म, [=बंधवेहिं व], B वि. 17) = विसंघटितैः, P विसंघएहिं वेएहिं, JB विणिग्गएहि वेएहि. 18) PJB वहु. 19) B मन्निउ.

तस्स तणएण एयं असार-मइणा वि विरइयं सुणह ।
कोऊहलेण लीलावइ त्ति [1]णामं कहा-रयणं ॥ २२

तं जह मियंक[2]-केसरि-कर-पहरण[3]-दलिय-तिमिर-करि-कुंभे ।
विक्खित्त[4]-रिक्ख-मुत्ताहलुज्जले सरय-रयणीए[5] ॥ २३

पओस-समये[6] धवल-भवणु[7]त्तमंग[8]-सयण-सुहासीणाए[9] भणियं । पिययम[10] पेच्छ पेच्छ ।

जोण्हा[11]ऊरिय-कोस-कंति-धवले सव्वंग-गंधुक्कडे
णिव्विग्घं[12] घर-दीहियाए[13] [14]सुरसं वेवंतओ[15] मासलं ।
आसाएइ सुमंजु-गुंजिय-रवो [16]तिंगिच्छि-पाणासवं[17]
उम्मिल्लंत-दलावली-[18]परियओ चंदुज्जुए[19] छप्पओ ॥ २४

वदनारविन्दस्थितैरात्मा बहुमतः । ये वेदा ब्रह्मणो वदनचतुष्टयान्निर्गतास्ते येन एकवदनेन धारिता इत्युत्कर्षः ॥ २१ ॥ २२) तस्स तणएण – तस्य भूषणस्य तनयेन असारमतिना तुच्छबुद्धिनापि कुतूहलनाम्ना विप्रेण विरचितं लीलावती नाम कथारत्नं श्रृणुत । गर्वपरिहारार्थम् असारमतित्वम् आत्मनः प्राह ॥ २२ ॥ २३) तं जह – तद् यथा । मृगाङ्ककेसरिकरप्रहरणदलिततिमिरकरिकुम्भे विक्षिप्तरिक्षमुक्ताफलोज्ज्वले शारद[20]रजन्याः [॥ २३ ॥] [21]गद्यम् । प्रदोषसमये धवलभवनोत्तमाङ्गशयनसुखासीनो भणितः सः निजप्रियतमया सावित्रीनाम्न्या । हे प्रियतम पश्य । मृगाङ्कश्चन्द्रः स एव केसरी सिंहस्तस्य कराः किरणा हस्ताश्च तेषां प्रहरणं तैर्दलितं तिमिरमेव करी तत्कुम्भे इत्यादिरूपकं ज्ञेयम् ॥ २४) जोण्हा – हे प्रिय गृहदीर्घिकायां गृहवाप्यां निर्विघ्नं यथा भवति । ज्योत्स्नापूरितकोशकान्तिधवले सर्वाङ्गगन्धोत्करे सर्वतः परिमलाढ्ये[22] चंद्रुज्जुए कुमुदे चन्द्रवंश्यकमले वेपमानो रसपानलोलुपतया कम्पमानः सुमञ्जुगुञ्जितरव उन्मीलद्दलावलीपरिगतः पत्रपंक्तिमध्यप्रविष्टः षट्पदो भ्रमरो मांसलं बहुलं तिंगिच्छिपाणासवं मकरन्दपानमद्यम् आस्वादयति पिबति । तिंगिच्छिर्देश्यां मकरन्दवाची । मांसलमिति 'मांसादेर्वा' [हैम० ८-१-२९] इत्यनुस्वारलोपो वा ॥ २४ ॥ अन्यच्च विशेषार्थ-

1) PJB नामं. 2) B मियंग. 3) P पहरदलिय. 4) B विच्छित्त. 5) J puts पओससमये at the end of this verse. 6) On this word P has a marginal gloss, viz., गद्यमिदं, B पउससमए. 7) B भुवणु°. 8) P °णुत्तिमंग, JB °णुत्तमंग. 9) B सुहासीणो भणिओ सो णियपिययमाए पिययम पिच्छा ।. 10) P has पिययम twice, but J only once. 11) P glosses: शार्दूलविक्रीडित, B जुन्हा°. 12) P निविग्घं, J णिविग्घं. 13) P दीहियासु, J दीहियाए, B दीहिआइ. 14) B सरसं. 15) P वेवत्तओ. 16) = तिंगिच्छि कमलरजसि. 17) J पाणेसवं. 18) P परिगओ, J परियओ, B पडिगउ. 19) B चंद्रुजुए. 20) B रजनीप्रदोप etc. The commentary on this verse and that on the following prose sentence form one unit. 21) The expression गद्यम् is written by the commentary after the concluding word पिच्छा of the text. That possibly indicates that पओस……पेच्छ is a prose passage. P numbers it, but the number is identical with that of the previous verse. J has no number. B perhaps numbers it, though the actual numeral is 2, and not 24. 22) B परिमलाढ्यो.

इमिणा[1] सरएण ससी ससिणा वि णिसा णिसाए[2] कुमुय-वणं ।
कुमुय-वणेण व[3] पुलिणं पुलिणेण व[4] सहइ[5] हंस-उलं ॥ २५

णव-विस[6]-कसाय-संसुद्ध-कंठ-कल-मणोहरो[7] णिसामेह ।
सरय-सिरि-चलण-णेउर-रावो[8] इव हंस-संलावो[9] ॥ २६

संचरइ सीयलायंत[10]-सलिल-कल्लोल-संग[11]-णिव्ववियो ।
दर-दलिय-मालई-मुद्ध-मउल-गंधुद्धुरो पवणो ॥ २७

एसा[12] वि दस-दिसा-वहु-वयण-विसेसावलि[13] व्व सर-सलिले ।
विम्वल[14]-तरंग-दोलंत-पायवा सहइ[15] वण-राई ॥ २८

एयाइँ[16] दियस-संभावणेक्क[17]-हिययाइँ पेच्छह घडंति ।
आमुक्क-विरह-वेयणाइँ[18] चक्कवायाइँ वावीसु ॥ २९

कथने । २५) इमिणा — अनया शरदा शरत्कालेन शशी शोभते इति संबन्धः । शशिना च निशा रात्रिः । निशया च कुमुदवनं कैरवखण्डम् । कुमुदवनेनापि* पुलिनं तटभूमिर्नद्या इति शेषः । पुलिनेनापि* हंसकुलं राजहंसश्रेणिः । सहइ राजते । 'राजेरग्घ-छज्जसहरीररेहाः' [हैम० ८-४-१००] इति सहः ॥ २५ ॥ २६) णवविस — हे प्रिय निसामेसु* शृणु । हंससंलापो मरालनादः शारदश्रीचरणनूपुराराव इव । कीदृगिति । नवः प्रत्यग्रो यो विसः कमलनालं तस्य कषायेन संशुद्धः तारीभूतो यः कण्ठः तेन कलो मधुरो मनोहरश्च रमणीयः ॥ २६ ॥ २७) संचरइ — पवनो वायुः संचरति । किंभूतः । शीतलागच्छत्सलिलकल्लोलसंगेन निर्वापितः शिशिरीकृतः । दरदलिता ईषद्विकसिता या मालती तस्या मुग्धं मनोज्ञं यन्मुकुलं कुड्मलं तद्गन्धेन उद्धुर उत्कृष्टो वातो वातीति ॥ २७ ॥ २८) एसा वि — एषापि सरःसलिले सरोवरतटे वनराजी काननश्रेणी दशदिग्वधूवदनविशेषकावलिरिव सहइ राजते । ऊर्ध्वाधोदिग्विदिग्रूपा दश दिशः, ता एव वध्वः स्नुषा इव तासां वदनेषु मुखेषु विशेषकास्तिलकास्तेषामावलीव । 'क ग च ज त द प य वां प्रायो लुक्' [हैम० ८-१-१७७] इति कस्याकारः । किंविशिष्टावलिः । विमलतरङ्गान्दोल्यमानपादपाः अतिसामीप्याज्जलकल्लोलैरेव कम्पमानाः पादपा वृक्षाः यस्याम् ॥२८॥ २९) एयाइं — प्रिय पश्यत । पूज्यत्वाद्बहुवचनम् । पूज्यत्वं च ।

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥

इति वचनात् । एते दिवससंभावनीयहृदया दिनाश्वास्यचेतसः उन्मुक्तविरहवेदनाश्चक्र-

1) B adds अण्णं च । before this verse. 2) = शृंखलोपमालिका. 3) B वि. 4) B वि. 5) = शोभते. 6) PJB विस. 7) B मणहरं णिसामेसु ।. 8) B रावो. 9) P संलावो, J सल्लावो, B उल्लावो. 10) P सीयलोयंत, J सीयलायन्त, B सीयलायंत. 11) P gap, J संजणिव्वविओ, B संग°. 12) P एसो, JB एसा. 13) = तिलकावलिरिव, P विसेसावलि व्व, J विसेसवेलि व्व, B विसेसा व्व. 14) P gap, J विम्वलतरंगदो°, B विमलतरंगदो°. 15) = शोभते. 16) B reads °इ and not °इं like P, in this verse. 17) J संझाव°. 18) PB विय°, J वेय°.

एयं उय[1] वियसिय-[2]सत्तवत्त-परिमल-[3]विलोहविज्जंतं ।
[4]अविहाविय-[5]कुसुमासाय-विमुहियं भमइ[6] भमर-उलं ॥ ३०
[7]चंदुज्जुयावयंसं पवियंभिय-[8]सुरहि-कुवलयामोयं ।
णिम्मल-तारालोयं पियइ व रयणी-मुहं चंदो ॥ ३१

ता किं बहुणा पयंपिएण ।

अइ-रमणीया रयणी [9]सरओ [10]विमलो तुमं [11]चं साहीणो ।
[12]अणुकूल-परियणाए [13]मण्णे तं णत्थि जं णत्थि ॥ ३२
ता किं पि[14] [15]पओस-विणोय-मत्त-[16][17]सुहयं म्ह मणहरुल्लावं ।
साहेह[18] अउव्व-कहं [19]सुरसं [20]महिला-यण-मणोज्जं ॥ ३३
तं [21]मुद्ध-मुहंबुरुहाहि[22] वयणयं [23]णिसुणिऊण णे[24] भणियं ।
[25]कुवलय-दलच्छि एत्थं [26]कईहि तिविहा कहा भणिया ॥ ३४

चाकाः पक्षिणो वापीषु घटन्ते । सूर्योदये हि विगतविरहाः क्षणमप्यसहिष्णवो झटिति संघटन्ते मिलन्तीत्यर्थः । चक्कवायाइ इति क्लीबत्वं प्राकृतत्वाद्बहुलम् ॥ २९ ॥ ३०) एयं उय – हे प्रिय उय पश्य । एतद्विकसितसप्तपत्रपरिमलविलोभनीयम् अविभावितकुसुमामोदविमुखितं भ्रमरकुलं भ्रमति । अविभावितोऽज्ञातः कुसुमामोद इतरपुष्पपरिमलो येन इति तेन विमुखितं पराङ्मुखीभूतम् । अयमर्थः । इतरपुष्पामोदमवेदयन्तो भृङ्गा गजमदानुकारिसप्तवृक्षगन्धेभ्य एव स्पृहयन्ति ॥ ३० ॥ ३१) चंदुज्जुया – हे प्रिय चन्द्रोद्योतावतंसं प्रविजृम्भितसुरभिकुवलयामोदम् । निर्मलतारालोकं रजनीमुखं चन्द्रः पिबतीव । अन्यदपि नीलोत्पलावतंसेन कर्णपूरेण युक्तं सुरभि अतिस्नेहाद्विमलतारिकालोकं च । मन्थरकनीनिकादर्शनं नायिकामुखं प्रियश्चुम्बतीति रूपकम् ॥ ३१ ॥ ता किं – तस्मात् किं बहुना प्रजल्पितेन । ३२) अइरमणीया – अतिरमणीया रम्या रजनी रात्रिः शरद्विमला निर्मला । 'प्रावृट्शरत्तरणयः पुंसि' [हैम० ८-१-३१] इति पुंस्त्वं शरदादेरत् । सरओ । त्वमपि स्वाधीनो निकटवर्ती निश्चिन्तश्च । अनुकूलपरिजनाया मम मन्ये तन्नास्ति यन्नास्ति । सर्वापि सामग्री विद्यत इत्यर्थः ॥ ३२ ॥ ३३) ता किं पि – तस्मादस्माकं स्वामिन् प्रदोपविनोदमात्र[27]सुखदां मनोहरोल्लापाम् । महिलाजनमनोज्ञां सरसां कामपि अपूर्वकथां साहेह कथय ॥ ३३ ॥ ३४) तं मुद्ध – तन्मुग्धामुखाम्बुरुहाद्भि[28]

1) = पश्य. 2) J सत्तवत्त. 3) = विलोभ्यमानं, J °विजत्तं. 4) = अविभावित अचिंतितकुसुमास्वाद-विमुखितं. 5) B कुसुमामोय. 6) P omits भमइ which is given by JB. 7) = चंद्रोद्योतावतंसं, B चंद्रुजया°. 8) B पविजंभिय. 9) B सरउ. 10) P वि मणोहरो तुमं. 11) B पि. 12) P अण°, JB अणु°. 13) = नमेति [= ममेति] संबंधे. 14) [कं पि] 15) B पिउ° for पओ°. 16) P मेत्त, JB मत्त. 17) = सुभगं, PJB सुहयम्ह. 18) = कथय. 19) B सरसं. 20) B महिलाण य for महिलायण. 21) P सुद्ध°, JB मुद्ध°. 22) On °हि P puts the figure of 5, within brackets, which perhaps indicates the Ablative. 23) PJB निसु°. 24) = अनेन. 25) B अइ कुवलयच्छि; J also shows अइ, and perhaps its reading may be कुवलयच्छि. 26) B कइहि. 27) B °सुखदं... °पम् । 28) B °रुहाधिव°.

तं जह दिव्वा तह दिव्व-माणुसी माणुसी तह च्चेय ।
तत्थ वि पढमेहिँ कयं कईहिँ[1] किर लक्खणं किं पि ॥ ३५
अण्णं सक्कय-पायय-संकिण्ण-विहा[2] सुवण्ण-रइयाओ ।
सुव्वंति महा-कइ-[3]पुंगवेहि विविहाउ[4] सुकहाओ ॥ ३६
५ ताणं मज्झे अम्हारिसेहिँ अवुहेहिँ जाउ सीसंति ।
ताउ कहाओ ण[5] लोए मयच्छि पावंति परिहावं[6] ॥ ३७
ता किं मं उवहासेसि[7] सुयणु[8] असुएण[9] सद्द-सत्थेण ।
उल्लविउं[10] पि ण तीरइ किं पुण वियडो कहा-बंधो ॥ ३८
भणियं च पिययमाए पिययम किं तेण सद्द-सत्थेण ।
१० जेण सुहासिय-मग्गो भग्गो अम्हारिस-जणस्स ॥ ३९
उवलब्भइ जेण फुडं अत्थो अकयत्थिएण हियएण ।
सो च्चेय[11] परो सद्दो णिच्चो[12][13] किं लक्खणेणम्हं[14] ॥ ४०

वचनं श्रुत्वा णे अस्माभिर्भणितम् । अइ इति कोमलालापे । कुवलयाक्षि उत्पलनेत्रे । इत्थं वक्ष्यमाणभङ्ग्या कविभिस्त्रिविधा कथा भणिता ॥ ३४ ॥ ३५) तं जह–सुगमा । १५ [तद् यथा दिव्या तथा दिव्यमानुषी मानुषी तथा एव । तत्रापि प्रथमैः कृतं कविभिः किल लक्षणं किमपि] ॥ ३५ ॥ ३६) अण्णं सक्कय–अन्यत् सामान्यतो नपुंसकत्वम् । संस्कृतप्राकृतसंकीर्णपदा महाकविपुङ्गवैः सुवर्णरचिता विशिष्टाक्षरगुम्फमय्यः विविधाः सुकथाः श्रूयन्ते ॥ ३६ ॥ गर्वपरिहारमाह । ३७) ताणं मज्झे–तासां विविधकथानां मध्ये अस्मादृशैरबुधैर्मूर्खैर्याः कथाः शिष्यन्ते कथ्यन्ते । हे मृगाक्षि ताः कथा लोके पर- २० भागं गुणोत्कर्षं न प्राप्नुवन्ति ॥ ३७ ॥ ३८) ता किं–तस्मात् किं किमर्थं हे सुतनु[15] अश्रुतेन शब्दशास्त्रेण व्याकरणेन माम् उपहासयिष्यसि । यतः उल्लपितुं वक्तुमपि न शक्यते । किं पुनर्विकटो विस्तीर्णः श्रेष्ठो वा कथाप्रबन्धः ॥ ३८ ॥ ३९) भणियं च–भणितं च प्रियतमया । हे प्रियतम किं तेन शास्त्रेण । अस्मादृशजनस्य स्त्रीजनस्य सुखासिकामार्गो भग्नः । न हि शास्त्रात्सुखोत्पादः प्रसिद्धः । यतः ।

२५ काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

तच्च वैषम्यादस्मादृशीभिर्दुरवबोधम् । अतः किं तेन दुःखहेतुनेति ॥ ३९ ॥ ४०) उव-लब्भइ–इति स्थिते निर्व्यूढार्थमाह । हे प्रिय उय पश्य । येन अकदर्थितेन हृदयेन

1) B कइहिं. 2) P संकिन्नकहा, J संकिण्णविहा, B पाइयसंकिण्णं विविहभासरइयाओ।. 3) P पुंगावेहि, B पुंगवेहिं. 4) B सुकहाउ. 5) PJB न. 6) P परिहावं, J परिभावं, B परभायं. 7) J उंव°, B उवहसिसि. 8) = सुतनु. 9) = अश्रुतशब्दशास्त्रेण. 10) = ऽल्ल[= उल्ल]पितमपि जल्पितमपि कथ्यंते, PB उल्लवियं, J उल्लवियुं. 11) J पियमाए पियम्ह किं. 12) B स च्चेव वरो णिचं सद्दो किं लक्खणेणऽम्ह. 13) P दट्ठो for णिच्चो of J. 14) P °म्हा, JB म्ह. 15 Rather मामुपहासयिष्यसि । after सुतनु.

एमेय[1] मुद्ध[2]-जुयई[3]-मणोहरं पाययाए भासाए ।
पविरल-देसि[4]-सुलक्खं कहसु कहं दिव्व-माणुसियं ॥ ४१

तं तह सोऊण पुणो भणियं उव्विंव[5]-वाल-हरिणच्छि ।
जइ एवं ता सुव्वउ सुसंधि-बंधं कहा-वत्थुं[6] ॥ ४२

अत्थि[7]

चउ-जलहि[8]-वलय-रसणा-णिवद्ध[9]-वियडोवरोह[10]-सोहाए ।
सेसंक[11]-सुप्परिट्ठिय-सव्वंगुव्वूढ[12]-भुवणाए ॥ ४३

पलय-वराह-समुद्धरण-सोक्ख-संपत्ति[13]-गरुय-भावाए ।
णाणा-विह-रयणालंकियाए भयवईए पुहईए[14] ॥ ४४

णीसेस[15]-सस्स-संपत्ति-पमुइयासेस-पामर-जणोहो[16] ।
सुव्वसिय[17]-गाम-गोहण-भंभा[18]-रव-मुहलिय-दियंतो ॥ ४५

अइ[19]-सुहिय-पाण-आवाण[20]-चच्चरी-रव-रम्म[21]उलारामो ।
णीसेस[22]-सुह-णिवासो आसय-विसओ त्ति[23] विक्खाओ ॥ ४६

हेलयैव येन शब्देनार्थः स्फुटो लभ्यते प्रकटार्थो ज्ञायते, स एव वरो वरप्रद इव श्रेष्ठ उत्तमः शब्दः । किमस्माकं लक्षणेन ॥ ४० ॥ **४१) एमेय मुद्ध** – एवमेव मुग्धयुवतीमनोहरां प्राकृतया भाषया प्रविरलदेश्यसुलक्ष्यां दिव्यमानुषीं कथां कथय । प्रकर्षेण विरला ये देश्या देशभाषाशब्दास्तैः सुबोधमिति ॥ ४१ ॥ **४२) तं तह** – तत्तथा श्रुत्वा मया भणितम् । उद्विंववालहरिणाक्षि[24] उद्विंवं[25] उत्त्रस्तो योऽसौ बालमृगः तद्वच्चञ्चलनेत्रे [यस्याः] । यद्येवं तदा सुसंधिबन्धं कथावस्तु श्रूयताम् । शोभनोऽद्भुतः संधिः पूर्वापरसंबन्धो बन्धश्च वर्णरचना यत्रेति । स्वग्रन्थस्य विदग्धजनग्राह्यतोक्तेत्यर्थः ॥ ४२ ॥ तदेवाह । [अस्ति] **४३-४६) चउ** – भगवत्यामाधारभूतायां पृथिव्याम् आश्रयविषयो महाराष्ट्रः सुविख्यातोऽस्तीति कलापकेन तद्विशेषणान्याह । चतुर्जलधिरसनानिबद्धविकटोपरोध[26]शोभायां चतुःसमुद्रमेखलासुबद्धनितम्बायाम् । उपरोध आरोहश्च नितम्ब इति वचनात् । अन्यच्च । शेषाङ्कसुपरिष्ठितसर्वाङ्गव्यूढभुवनायां शेषराजोत्संगस्थिरस्थित्याधारितविश्वायाम् ॥ पुनः पलय इति । प्रलयवराहसमुद्धरणसौख्यसंप्राप्तगुरुकभावायाम् । अत एव

1) B एमेव. 2) P मुद्ध, JB मुद्ध. 3) P जुयई, J जुयइ, B जुवई. 4) B देश for देसि. 5) = सीतगदेश्यः, PJB उव्विव. 6) B कहारयणं. 7) All the mss. appear to read अत्थि चउ etc. in the same line. 8) J च जलहि, B जलहिं रसणा. 9) PJB निवद्ध. 10) = विकटउवरोहनितवीशा...[?]; P वियडाव°, J वियडोव°, B वियणाव°. 11) P सेसंगे सुपरिट्ठिय, J सेसंकसुप्परिट्ठिय, B सेसंगसुपत्तिट्ठिअ. 12) P सव्वंगुवूढ, J सव्वंगुव्वूढ, B सव्वंगव्वूढ. 13) P संपन्न, J संपत्ति, B संपत्त. 14) B पुहवीए. 15) P नीसेससीस (with the marginal gloss शस्य), J नीसेसासस्स, B णीसोस°. 16) = जनोघ. 17) = सुवसि.... 18) P रंभा, J रुंभा, (रु looks like भ), B भंभा. 19) B सइ. 20) B पाणयावाण. 21) = रम्य. 22) PJB नीसेस and निवासो. 23) B विसउ सुविक्खाउ. 24) B उहिंव. 25) B उद्दिंव. 26) B विकटावरोध.

[1]जो सो अविउत्तो[2] कय-जुयस्स धम्मस्स [3]संणिवेसो व ।
सिक्[4]खा-ठाणं व[5] पयावइस्स सुकयाण आवासो ॥ ४७

सासणमिव [6]पुण्णाणं [7]जम्मुप्पत्ति व [8]सुह-समूहाणं ।
आयरिसो [9]आयाराण [10]सइ [11]सुछेत्तं पिव [12]गुणाणं ॥ ४८

अवि य ।

[13]सुसणिद्ध-घास-संतुट्ठ-गोहणालोय-[14]मुइय-गोयालो[15] ।
गेयारव-भरिय-दिसो [16]वर-वलइ-वेणु-णिवहेसु ॥ ४९

सुहावगा[17]हे-णिम्मल-जलासओ[18]। तरुण-तरुज्जाण-रिद्धि-रमणीओ[19]। कमल-

---

नानाविधरत्नालंकृतायाम् ॥ देशविशेषणान्याह । णीसेस इति । निःशेषसस्यसंपत्ति-प्रमुदिताशेषपामरजनौघः सर्वधान्यनिष्पत्तिहृष्टक[20]र्षकलोकः । गुट्ठ उषिताः कृतावासा ये ग्रामा आवसथास्तेषां गोधनभम्भारवैर्मुखरितानि दिगन्तानि यत्र ॥ पुनः कीदृक् । [अइ–] । सदा सुखितपानकापानचर्चरीरवरमाकुलारामः सदा सुखितानां पानकस्य सुरादेरापानेषु यश्चर्चरीको[21] गीतविशेषस्तस्य रमा लक्ष्मीस्तया समाकुला आरामा उद्यानानि यत्रेति । किं वहुना । निःशेषसुखनिवास आश्रयनामविषयो देशोऽस्ति ॥ ४३-४६ ॥ देशवर्णनमाह । ४७-४८) **जो सो** – स देशोऽवियुक्तः कृतयुगस्य कृतयुगाचारपालनपरो लोकैः[22] । संनिवेश आधारस्थानमिव धर्मस्य । प्रजापतेर्ब्रह्मणः शिक्षास्थानं लेखशालेव । शैक्षो हि लेखशालायामक्षरादिव्यक्तिमभ्यस्य जनकादेः प्रकाशयति । एवं ब्रह्मापि तत्र देशे जनानामा[23]चाररूपादिसृष्टिमवधार्यान्यत्र सृजति । नवशिक्षितं तादृूप्यमाधत्त इति भावः । आवासो वासभवनं सुकृतानाम् ॥ [**सासणमिव** –] । शासनं कथकमिव पुण्यानाम् । न च धर्मसुकृतपुण्यानामेकार्थता शङ्क्या । धर्मः स्वर्गादिसाधकक्रियाकलापः । सुकृतं च सुष्ठु कृतं सुकृतं शुभकर्मविधिः । पुण्यं च पवित्रं पवित्राचारं कथयतीत्यर्थः । जन्मोत्पत्तिरिव सुखसमूहानाम् । अन्यत्रासाधारणं सुखमत्रैवेति । आदर्शो मूलप्रतिराचाराणाम् । सदा सुक्षेत्रमिव गुणानाम् । गुणकणा इत्यादिलुप्तोपमा सर्वत्र योज्या ॥ ४७–४८ ॥ अपि च । ४९) **सुसिणिद्ध** – सुस्निग्धघाससंतुष्टगोधनालोकमुदितगोपालैः । अन्यच्च । वरवल्लकीवेणुनिवहेषु गेयारवभरितदिक् । वल्लकी वीणा वेणुर्वंशः तत्समूहेषु वाद्यमानेषु इत्यर्थः । गेयं च गीतम् । 'दिक्प्रावृषोः सः' [हेम०

---

1) B omits जो. 2) = शोकवियुक्त. 3) P संनिवेसो, J कयणिवेसु, B संनिवेसु. 4) = शिष्य-[=क्षा]स्थानमिव, B सिक्खढ्ढाणं. 5) P व्व, B व. 6) PJB पुन्नाणं. 7) PJ जंमुप्पत्ति. 8) J सम्मूहाण. 9) = आदर्शमिव आचाराणां. 10) = सदा. 11) B सुखित्तं. 12) J गुणाण. 13) = सुस्निग्धतृण, B सुसिणिद्ध. 14) = मुदित, B मुईय. 15) P गोयालो, J गोआला, B गोवालो. 16) B चरि. 17) B °गाहणणि°. 18) P no Danda. 19) PB double Danda. 20) B कर्तुक 21) B को appears to have been corrected into यो. 22) B °परलोक°. 23) B °मादिचार°.

सर-संड-मंडियासा-मुहो[1][2] । सुस्साय[3]-फल-भरोणमिय[4]-वच्छयलावासिय[5]-पहिय[6]-जण[7]-समाउलो । सव्वोवसग्ग-भय[8]-रहिओ । चाउव्वण्ण-समाउत्तो[9] । णिच्चूसव-वड्ढियाणंदो[10] । विविह-काणणोवसोहिय-भूमि-भाओ । विविह-कुसुमामोय-वासिय-दियंतरालो[11] । अणवइण्ण[12]-कलि-कालो । अइट्ठ-पावो[13] । अपरिच्चत्त[14]-धम्मो । अणुवलक्खिय-पयावो[15] । अपणट्ठ[16]-सोहो । अणुवजाय-चोर-रायभओ । अपरि[17]-मिय-गुण-गण[18]-णिवासो[19] त्ति । जहिं च[20] । काम-वरिसी भयवं पज्जण्णो[21] । काम-दुहाओ[22] सुरहीओ । सइ[23]-फलाओ वणप्फईओ । अवंझाओ जुवईओ त्ति[24] । जहिं च[25] । 5

दूरुण्णय-गरुय-पओहराओ कोमल-मुणाल-वाहीओ[26] ।
सइ महुर-वाणियाओ जुवईओ [27]णिण्णयाउ व ॥ ५० 10

८-१-१९] इति दिसो ॥ ४९ ॥ गद्यानि[28] । सुहावगाह—सुखावगाहननिर्मल-जलाशयः । तरुणतरूद्यानर्द्धि[29]रमणीयः । कमलसरःखण्डमण्डिताशामुखः । सुखादुफल-भरावनतवृक्षतलावासितपथिकजनसमाकुलः । सर्वोपसर्गरहितः । चातुर्वर्ण्यसमायुक्तः । नित्योत्सववर्धितानन्दः । विविधकाननोपशोभितभूमिभागः । विविधकुसुमामोदवासित-सकलदिगन्तरालः । अनवतीर्णकलिकालः । अदृष्टपापः । अपरित्यक्तधर्मः । अनुप- 15
लक्षितारिप्रतापः । अप्रणष्टशोभः । अनुपजातचौरराजभयः । किं बहुना । अपरिमितगुण-निवास इति । तत्र जलाशयाः सरोवराणि । तरुणतरूद्यानो अभिनववृक्षारामः । कमल-सरसंड, इति कमलप्रधानं सरस्तस्य पण्डं वनम् । चातुर्वर्ण्यं ब्राह्मणक्षत्रियवैश्यशूद्रा इत्यादि सुज्ञेयमिति न विव्रियते ॥ गद्यम् । जहिं च—यत्र च कामवर्षी पर्जन्यो मेघः कामं मनीषानुरूपं वर्षति । कामदुघा धेनवः सुरभयः कामम् अभीष्टं दुहन्त इति । 20
सदाफला वनस्पतयो वृक्षाः षड्ऋतुफलशालिनः । अवन्ध्या युवतयः । इति पुण्याधिक्य-प्रतिपादनार्थमिदम् ॥ यत्र च । ५०) दूरुण्णय—युवतयः स्त्रियो निम्नगा नद्य इव । स्त्रियः किंभूताः । दूरुन्नय इति दूरमत्यर्थम् उन्नतावुच्चौ पयोधरौ स्तनौ यासां ताः ।

---

1)=खंडसमूह. 2) P no Danda. 3) B सुसायफलहरोणय. 4)=अवनमित. 5)=वृक्षतल, P double Danda after वच्छयला. 6) B omits पहिय. 7) P omits जण, but J पहियजण. 8) B omits भय. 9) B समाजुत्तो, P no Danda here. 10) In J it looks like वड्ढिया°. 11) B वासियसयलदियंतचक्को. 12)=अनवतीर्ण. 13) P no Danda. 14)=अपरित्यक्त, B अपरिच्चित्त. 15)=प्रकृष्टताप, B °लक्खियारिपयावो. 16) B अणट्ठसोहो. 17) JB अपरमिय. 18) B omits गण. 19) PJ निवासो, B निवासु. 20) B puts double Danda before and after जहिं च. 21)=मेघः, J पज्जुण्णो, P no Danda. 22) P कामु, B काम; B often reads उ for ओ. 23) J सयं for सइ of P, B सफलाउ वणस्सईउ. 24) B omits त्ति; J has a number ॥ ५० ॥ after त्ति. 25) P omits जहिं च given by JB. 26)=एकत्र बाहू. 27) PJB नि°. 28) The phrase गद्यानि or गद्यम् is written by B usually at the close of the Prākrit passage concerned, here, for instance, after णिवासो त्ति; and then the Sanskrit commentary is given. 29) B °नरिद्धि°.

अच्छउ ता णिय-छेत्तं सेसाइ[1] वि जत्थ पामर-वहूहिं ।
रक्खिज्जंति मणोहर-गेयारव-हरिय-हरिणाहिं[2] ॥ ५१

इय[3] एरिसस्स सुंदरि मज्झम्मि[4] सुजणवयस्स[5] रमणीयं ।
णीसेस-सुह[6]-णिवासं णयरं णामं[7] पइट्ठाणं[8] ॥ ५२

तं च पिए वर-णयरं वण्णिज्जइ जा विहाइ[9] ता रयणी ।
उद्देसो[10] संखेवेणं[11] किं पि वोच्छामि णिसुणेसु ॥ ५३

जत्थ वर-कामिणी-चलण-णेउरारावमणुसरंतेहिं ।
पडिराविज्जइ[12] मुह-मुक्क-किसलयं[13] रायहंसेहिं ॥ ५४

जण्णग्गि-धूम-सामलिय-णहयलालोयणेक्क-रसिएहिं ।
णच्चिज्जइ ससहर-मणि-सिलायले[14] घर-मयूरेहिं ॥ ५५

ण तरिज्जइ[15] घर-मणि-किरण-जाल-पडिरुद्ध-तिमिर-णियरम्मि[16] ।
अहिसारियाहिं[17] आमुक्क-मंडणाहिं पि संचरिउं ॥ ५६

कोमले मृणालवद्बाहे भुजौ यासां ताः । सदा मधुरवाणीकाः । नदीपक्षे पयोभराः कोमलमृणालान्वहन्तीति वाहा धारिण्यः मधुरपानीयाश्च ॥ ५० ॥ **५१) अच्छउ** – आस्तां तावन्निजक्षेत्रं यत्र मनोहरगेयारवहृतहरिणाभिः पामरवधूभिः । सेसाइ[17] वि शेषाणामपरेषां प्रतिवेश्मिकानाम् अपि क्षेत्राणि रक्ष्यन्ते ॥ ५१ ॥ **५२) इय** – हे सुन्दरि इति ईदृशस्य सुजनपदस्य मध्ये विख्यातं प्रसिद्धं निःशेषगुणनिवासं प्रतिष्ठानं नाम नगरम् ॥५२॥ **५३) तं च पिए** – तच्च प्रिये वरनगरं तैस्तैरपरैर्गुणैर्यावद्वर्ण्यते तावद् विभाति रजनी रात्रिः । तस्मात्संक्षेपेण कमपि उद्देशं कतिपयपदार्थस्वरूपं वक्ष्यामि भणिष्यामि शृणु ॥ ५३ ॥ **५४) जत्थ** – यत्र वरकामिनीचलननूपुरारावमनुसरद्भी राजहंसैः प्रतिराव्यते । कथम् । मुखमुक्तबिसलतं यथा भवति । हंसरवानुकारिनूपुरध्वनिमाकर्ण्य मुखात्कमलनालं त्यक्त्वा हंसाः प्रतिशब्दायन्त इति ॥ ५४ ॥ **५५) जण्णग्गि** – यज्ञाग्निधूमश्यामलितनभस्तलालोकनैकरसिकैर्गृहमयूरैः । शशधरमणिशिलातले चन्द्रकान्तमणिकुट्टिमे नृत्यते यत्रेति गम्यते । मेघाशङ्कया क्रीडामयूरैर्नृत्यमासूत्र्यते ॥ ५५ ॥ **५६) ण तरिज्जइ** – यत्र गृहमणिकिरणजालप्रतिरुद्धतिमिरप्रसरे सति । आ समन्तान्मुक्तमण्डनाभिरप्यभिसारिकाभिरसतीभिः संचरितुं न शक्यते । गृहमणिदीपो मणिमयकुड्यानि वा यत्र स्फटिकमयमन्दिरोदरदीपप्रकटितबहिरुद्योते दुष्टाभिसारिकाभिरपि परिभ्रमितुं न तरिज्जइ[18]

---

1) J सिज्झा for सेसा. 2) B हरिणेहिं. 3) = एतस्यऽदृशस्य[?]. 4) P मज्जंमि, J मज्झंम्मि, B मझंमि. 5) = सुजनपदभ्या[= दस्य]. 6) B गुण for सुह. 7) B नामे. 8) P पहिट्ठाणं, JB पइ°. 9) P पहाइ, JB विहाइ. 10) P उद्देशो सं°, J उद्देसो सं°, B उद्देसं सं°. 11) B संखेविण किं पि हु वु°. 12) = पति[= प्रति]रव आचर्यते. 13) P विसलयं, JB किसलयं. 14) P सिलायडे, JB सिलायले. 15) = न शक्यते. 16) B writes this verse twice; in the second version we have some variants. पसरंमि for णियरम्मि, °सारिया वि for सारियाहिं. 17) B सेसा पि. 18) B न खु याति for न तरिज्जइ.

साणूर-थूहिया-धय-णिरंतरंतरियं-तरणि-कर-णियरे[3] ।
परिसेसियायवत्तं गम्मइ संगीय-विलयाहिं ॥ ५७
सरसावराह-परिकुविय-कामिणी-माण-मोह-लंपिक्कं[9] ।
कलयंठि-उलं चिय कुणइ जत्थ [12]दोच्चं पियाण सया ॥ ५८
णिद्दय-रय-रहस-किलंत-कामिणी-सेय-जल-लवुप्फुसणा ।
पिज्जंति जत्थ णासंजलीहि[16] उज्जाण-गंधवहा ॥ ५९
घर-सिर-पसुत्त-कामिणि-कवोल-संकंत-ससि-कला-वलयं ।
हंसेहि अहिलसिज्जइ मुणाल-सद्धालुएहि जहिं ॥ ६०
मरहट्ठिया-पओहर-हलिद्द-परिपिंजरंबुवाहीए ।
धुव्वंति[20] जत्थ गोला-णईए [21]तद्दियसियं पावं ॥ ६१
अह णवर तत्थ दोसो जं गिम्ह-पओस-मल्लियामोओ ।
अणुणय-सुहाइँ माणंसिणीण [24]भोत्तुं चिय ण देइ ॥ ६२

न शक्यते ॥ ५६ ॥ ५७) साणूर – संगीतवनिताभिर्नर्तकीभिर्यत्र परिशेषितातपत्रं मुक्तच्छत्रं गम्यते । कस्मिन् सति । साणूर इति । साणूरं देवगृहं तत्र स्तूपिकासु आमलसारकेषु ध्वजपताकाभिर्निरन्तरम् आच्छादितस्तरणेः सूर्यस्य करनिकरः किरणसमूह इति ॥ ५७ ॥ ५८) सरस – यत्र कलकण्ठीकुलं कोकिलासमूहः सदा प्रियाणां दौत्यं दूतत्वं कुरुते । किंभूतम् । सरस इति सरसः सद्यस्को योऽपराधः तेन परिकुपितानां कामिनीनां मानमपनयति इत्यर्थः ॥ ५८ ॥ ५९) णिद्दय – यत्र निर्दयरतिरहःक्राम्यत्कामिनीखेदजललवोत्पुंसका उद्यानगन्धवहा गृहारामवाता नासाञ्जलिभिर्नासिकापुटैः पीयन्ते । निर्दयं निष्करुणं यद्रतिरहःसुरतैः क्रान्तं तेन क्लाम्यन्तीनां ग्लानिमापन्नानां कामिनीनां खेदजलकणान्[25]उल्लुञ्छयन्ति स्फोटयन्ति ॥ ५९ ॥ ६०) घरसिर – यत्र मृणालश्रद्धालुभिः बिसास्वादनरसिकैर्हंसैः गृहशिरःप्रसुप्तकामिनीनां कपोलसंक्रान्तशशिकलावलयोऽभिलष्यते । ललनागल्लसंक्रान्तं चन्द्रबिम्बमेव कमलनालाशङ्कया मरालैराकांक्ष्यते ॥ ६० ॥ ६१) मरहट्ठिया – यत्र महाराष्ट्रिका वनिताः पयोधरहरिद्रापरिपिञ्जराम्बुवाहिन्यां गोलानद्यां तद्दैवसिकं तद्दिनोत्पन्नं[26] पातकं धुव्वंति स्फेटयन्ति । पावनत्वात् स्नानमात्रेण शुध्यन्ति । तस्याश्च प्रतोलीद्वार एव वहमानत्वादिति ॥ ६१ ॥ ६२) अह णवर – अथ नवरं केवलं तत्र देशे दोषोऽपगुणः यः ग्रीष्मप्रदोषमल्लिकामोदो मनस्विनीनां मानिनीनाम् अनुनयसुखानि

1) = देवगृहशिषर. 2) P °तरियं, JB °तरिय. 3) B णिकरे. 4) = परिशेषितातपत्रं, P एरिसेसियातवत्तं, JB as above. 5) J गम्मय सं°, [गम्मए]. 6) B वणियाहिं for विल°. 7) P सहसा°, JB सरसा°. 8) B मोस. 9) = चौरं. 10) B कूलं for उलं. 11) P विय, JB चिय. 12) = दुच्चं. 13) B रइ. 14) P रहसं, B रहस. 15) B लवफुसणं. 16) P °हिं, JB °हि. 17) B सिरि. 18) B कामिणी. 19) = कपोलसंक्रां[त]शशिलतावलयं, P लया for कला of JB. 20) J वुव्वंति. 21) = तदि[= द्दि]नसज्जं, B तद्दिवसियं. 22) B गिंभ. 23) = विचकिलामोदः. 24) = भोक्तुमेव, P विय, JB चिय. 25) B looks like °नुलुंखयंति. 26) B °त्रपातकं.

अह णवर तत्थ दोसो जं फलिह-सिलायलम्मि तरुणीण ।
मयण-वियारा दीसंति वाहिर-ठिएहि वि जणेहिं ॥ ६२*१
अह णवर तत्थ दोसो जं वियसिय-कुसुम-रेणु-पंडलेण ।
मइलिज्जंति समीरण-वसेण घर-चित्त-भित्तीओ ॥ ६३
5 तत्थेरिसम्मि णयरे णीसेस-गुणावगूहिय-सरीरो ।
भुवण-पवित्थरिय-जसो राया सालाहणो णाम ॥ ६४
जो सो अविग्गहो वि हु सव्वंगावयव-सुंदरो सुहओ ।
दुद्दंसणो वि लोयाण लोयणाणंद-संजणणो ॥ ६५
कुवई वि वल्लहो पणइणीण तह णयवरो वि साहसिओ ।
10 परलोय-भीरुओ[12] वि हु वीरेक्क-रसो तह च्चेय ॥ ६६

प्रसादनसौख्यानि भोक्तुमेवानुभवितुमपि न ददाति । मल्लिकापुष्पपरिमले प्रसर्पितमात्र एव झटिति मानिनीमानो विलीयते सांत्वनं नापेक्षत इति ॥ ६२ ॥ ६२*१) अह णवर – अथ नवरं तत्र दोषो यत्स्फटिकशिलातले आकाशस्फटिकमयगृहे तरुणीनां मदनविकाराः कामविक्रियाः नखादिचिह्नानि बहिःस्थितैरपि जनैर्दृश्यन्ते । दर्पणवत्प्रतिबिम्बेनेति भावः
15 ॥ ६२*१ ॥ ६३) अह णवर – अथ नवरं तत्र दोषो यद्विकसितकुसुमरेणुपटलेन समीरणेन वायुना गृहभित्तिचित्राणि मलिनीक्रियन्ते । गाथात्रयेऽपि निन्दास्तुतिरूपेणो-त्कर्षज्ञापनम् ॥ ६३ ॥ ६४) तत्थेरिसम्मि – तत्र ईदृशे नगरे निःशेषगुणावगूढ-शरीरः सर्वाङ्गीणगुणमयो भुवनप्रविस्तृतयशा राजा शातवाहनो नाम । विद्यते इति शेषः । 'अतसीसातवाहने लः' [हैम० ८-१-२११] । 'क ग च ज' [हैम० ८-१-१७७] इति
20 सालाहणो ॥ ६४ ॥ ६५) जो – यः सो अविग्रहोऽपि सर्वाङ्गावयवसुन्दरः सुभगः । ननु योऽविग्रहोऽशरीरः स कथं सर्वाङ्गावयवसुन्दरो भवति । अथ च प्रतापमात्रेण वशीकृत-सर्वरिपुत्वाद् अविग्रहो युद्धरहितः । अथवा अः विष्णुः स एव विग्रहः शरीरं यस्य सः । 'नाविष्णुः पृथिवीपतिः' इति वचनात् । सर्वाङ्गानि नयनवदनहस्तपादादीनि तैः सुन्दरः सुलक्षणः । अथवा स्वाम्यमात्यादीनि सप्त राज्याङ्गानि तैः सुन्दरः सुभगः सौभाग्यवांश्च ।
25 दुद्दंसणु त्ति दुर्दर्शनोऽपि लोकानां लोचनानन्दसंजननः । यो दुर्दर्शनो दुष्टं दर्शनं लोचनं यस्येति कृत्वा स कथं लोचनानन्दसंजननः इति विरोधः । अथ च दुःखेन दृश्यते इति दुर्दर्शनो द्रष्टुमशक्यः सामान्यलोकानां तेजसानेकपरिवृतत्वाच्च ॥ ६५ ॥ ६६) कुवई – कुपतिरपि वल्लभः प्रणयिनाम् इति चित्रम् । कुत्सितः पतिः कुपतिरपि विरोधः । अथ च कुः पृथ्वी तस्याः पतिः स्वामी नरेन्द्रः इत्यर्थः । प्रणयिनां स्नेहिनां वल्लभः प्रीतिदायी ।

---

1) This verse is given only in B. 2) B पलिह. 3) B विहसिय. 4) J वडलेण. 5) B मयलि°. 6) B वरभित्तिचित्ताई. 7) B तत्थेरिसए. 8) B अविग्गहो. 9) =अविरोधपक्षे पृथ्वीपतिः, B कुवइ वि विच°. 10) PB पणइयाण, J as above. 11) P नयवरो, J णयधरो, B णयपरो. 12) P भीरुउ, J भीरुओ, B भीरुउ.

सूरो वि ण सत्तासो[1] सोमो वि कलंक-वज्जिओ[2] णिच्चं ।
भोई वि ण दोजीहो तुंगो वि समीव-दिण्ण[3]-फलो ॥ ६७
बहुलंत[4]-दिणेसु ससि व्व जेण वोच्छिण्ण[5]-मंडल-णिवेसो ।
ठविओ तणुयत्तण-दुक्ख-लक्खिओ[6] रिउ-जणो[7] सव्वो ॥ ६८
णिय-तेय-पसाहिय-मंडलस्स ससिणो व्व जस्स लोएण ।
अक्कंत-जयस्स[8] जए पिट्ठी[9] ण [10]परेहि संचविया[11] ॥ ६९
ओसहि-सिहा-पिसंगाण वोलियाँ[12] गिरि-गुहासु रयणीओ ।
जस्स [13]पयावाणल-कंति-कवलियाणं पिव रिऊणं ॥ ७०

तथा यो नतपरो नताः नमस्कृताः परे शत्रवो येनेति स कथं साहसिकः । अथ च नयो न्यायः तत्परः तन्निष्ठः । यद्वा नताः परे वैरिणो यस्येति । अथवा न च परे[14] अन्ये वा यस्येति । यदुक्तम् ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

साहसिकः शूरवृत्तिः । परलोक[15]भीरुकोऽपि वीरैकरसः तथा चैव । परे ये लोकाः तेभ्यो भीरुर्यः स कथं वीरकर्मैकरसिकः । अथ च परलोकान्नरकादेर्भीरुर्भयाकुलः । वीरश्च दानधर्मयुद्धवीरः ॥ ६६ ॥ ६७) **सूरो**—सूर्योऽपि न सत्राशः । अथ च शूरः पराक्रमी न सत्रासो निर्भय इति । सोमोऽपि नित्यं कलङ्कवर्जितः । चन्द्रः कलङ्कपङ्किल एव भवति । अयं तु सोमः स्पृहणीयदर्शनः । सह उमया कीर्त्या वर्तते सोम इति वा । भोग्यपि सर्पोऽपि न द्विजिह्वः । अथ च भोगी भोगवान् न द्विजिह्वः खलः । तुङ्गोऽपि समीपदत्तफलः । विरोधराहित्ये तुङ्गो मानोच्चः सेवकानां तात्कालिकफलदायी च ॥ ६७ ॥ ६८) **बहुलंत**—येन व्युच्छिन्नमण्डलनिवेशो गतराष्ट्रः सर्वोऽपि रिपुलोकः तनुत्वदुःखलक्षितो दुर्बलः स्थापितः कृतः । क इव । बहुलान्तदिनेनामावास्यया शशी चन्द्र इव । सोऽपि तदा मण्डलरहितः क्षीणश्च भवति ॥ ६८ ॥ ६९) **णियतेय**—यस्य नरेन्द्रस्य शशिनः इव निजतेजःप्रसाधितमण्डलस्य अन्यच्चाक्रान्तजगतो जगति विश्वे परेण शत्रुणा लोकेन च पृष्ठं न सत्यापितं न दृष्टम् । चन्द्रपक्षे पृष्ठं परभागः । 'पृष्ठे वानुत्तरपदे' [हैम० ८-१-१२९] इति पिट्ठी । [नरेन्द्रपक्षे][16] संग्रामे इति गम्यम् ॥६९॥ ७०) **ओसहि**—गिरिगुहासु भूधरकन्दरासु ओषधिशिखा[17]पिशङ्गानां रिपूणां यस्य भूपस्य प्रतापानलकान्तिकवलितानामिव रजन्यो रात्रयः वोलिया व्यतिक्रान्ताः । सर्वापहारं नाशिता हि रिपवो भयाक्रान्ता गत्वा गिरिगुहासु शेरते स्म । तत्र च जाज्वल्यमानौषधीकान्तिपिङ्गल-

---

1) = सत्रासः, द्वि० सत्राशः. 2) J कलंकि. 3) B दिन्नहलो. 4) = कृष्णपक्षान्तदिने, B बलंतदिणेण. 5) = व्युच्छिन्न. 6) J लक्खिउं, B लक्खिउ. 7) B रिउयणो. 8) = आक्रांतजयस्य, द्वि० आक्रांतप्रयतः. 9) B पिट्ठी. 10) PB परेण, J परेहि. 11) = दृष्टा. 12) = व्युत्क्रांता. 13) P पयावानल, JB पयावाणल. 14) B परो अन्ये. 15) B भीरुः कोपि. 16) B shows some gap. 17) B शिपापि°.

[1]आलिहियइ जो वम्मह-णि[2]भेणं णिय-वास-भवण-भित्तीसु ।
[3]लडह-विलयाहिँ णह-मणि-किरणारुणियग्ग-ह[4]त्थेहिँ ॥ ७१

हियए [5]च्चेयं विरायंति[6] [7]सुंदर परिचिंतिया वि सुकईण ।
जेण विणा [8]दुहियाण व मणोरहा कव्व-विणिवेसा ॥ ७२

इय तस्स महा-[10]पुहईसरस्स इच्छा-पहुत्त-विहवस्स ।
कुसुमसराउह-दूओ व्व [11]आगओ सुयणु महु-मासो ॥ ७३

पत्थाणं पढमागय-[12]मलयाणिल-पिसुणियं वसंतस्स ।
[13]बहुलच्छलंत-कोइल-रवेण साहंति व वणाइं ॥ ७४

[14]गहिऊण चूय-मंजरि[15] कीरो परिभमइ पत्त-लाहत्थो ।
ओसरसु सिसिर-[16]णरवइ पुहई लद्धा वसंतेण ॥ ७४*१

शरीरास्ते यत्प्रतापवह्निविच्छुरिता इव रेजुरित्यर्थः ॥ ७० ॥ ७१) **आलिहियइ**—यः श्रीशालवाहनः नृपो नखमणिकिरणारुणिताग्रहस्ताभिर्लटभवनिताभिः प्रधाननायिकाभिः मन्मथमिषेण कन्दर्पव्याजेन निजवासभवनभित्तिषु आलिख्यते चित्र्यते । तस्य लोकातिशायि सौन्दर्यमुक्तम् । 'वनिताया विलया' [हैम० ८-२-१२८] इति विलया ॥ ७१ ॥ ७२) **हियए च्चेय**—हे सुतनु हे सावित्रि येन नरेन्द्रेण विना कवीनां प्रबन्धविधायिनां परिचिन्तिता मनसि धृता अपि काव्यविनिवेशा हृदय एव विलीयन्ते इति । क इव । दुःखितानां मनोरथा इव । दरिद्राणां ह्यभिलषितानि चिरं चिन्तितान्यपि मनस्येव मज्जन्ति । तदुक्तम् ।

उन्नम्योन्नम्य तत्रैव दरिद्राणां मनोरथाः ।
पतन्ति हृदये व्यर्था विधवास्त्रीस्तना इव ॥

७३) **इय तस्स**—इति तस्य एतावता तस्य मनोरथपथातिगदातृत्वमुक्तम् ॥ ७२ ॥ ७३) **इय तस्स**—इति तस्य महापृथ्वीश्वरस्य इच्छाप्राप्तविभवस्य मनीषितसंपदः । हे सुतनु कुसुमशरायुधदूत इव मधुमासो वसन्त आगतः अवतीर्णः ॥ ७३ ॥ ७४) **पत्थाणं**—वनानि काननानि बहलोच्छलत्कोकिलरवेण प्रथमागतमलयानिलपिशुनितं वसन्तस्य प्रस्थानं साधयन्तीव अत्रावतरणं कथयन्तीव ॥ ७४ ॥ ७४*१) **गहिऊण**—[गृहीत्वा चूतमञ्जरीं कीरः परिभ्रमति पात्रलाभार्थः । अपसर शिशिरनरपते पृथ्वी लब्धा वसन्तेन] ॥ ७४*१ ॥

---

1) P आलिक्खिज्जइ, B आलिहियइ. 2) = मिषेण, P निहेण, J निभेण, B मिसेण. 3) = रम्य, P लडहं, JB लडह. 4) J गुच्छेहिं for हत्थेहिं(?), B हत्थाहिं. 5) PB च्चिय, J च्चेय. 6) P विलायंति, J विरायंति, B विलयायंति. 7) P सुइर, B सुयणु. 8) B दु for सु. 9) = यथा दुःखितानां मनोरथाः तं अप्राप्य विलीयंते, B द्रुहियाण. 10) P मुहई°, J पुहई°, B पुहवीस°. 11) B उवगउ for आगओ. 12) P °यानिल, JB °याणल. 13) B बकुलछ°, [बहलुच्छ°]. 14) This verse is found only in J. 15) [°मंजरिँ]. 16) J नरवइ.

मउलंत-मउलिएसुं [1]वियसिय-वियसंत[2]-कुसुम-णिवहेसु ।
सरिसं चिय ठवइ पयं वणेसु लच्छी वसंतस्स ॥ ७५
वहुएहि वि[3] किं परिवड्ढिएहिँ बाणेहिँ कुसुम-चावस्स ।
एक्केणं चिय[4] [5]चूयंकुरेण [6]कज्जं ण [7]पज्जत्तं ॥ ७६
घिप्पइ[8] कणयमयं पिव पसाहणं जणिय-तिलय-सोहेणं[9] ।
अब्भहिय-जणिय-सोहं [10]कणियार-वणं वसंतेण ॥ ७७
वियसंत[11]-विविह-वणराइ-कुसुम-सिरि-परिगया महा-तरुणो ।
किं पुण वियंभमाणो[12] जं [13]णं कुणइ मल्लियामोओ ॥ ७८
पढमं चिय कामि-यणस्स कुणइ मउयाइँ पाडलामोओ ।
हिययाइँ सुहं [14]पच्छा विसंति[15] सेसा वि कुसुम-सरा ॥ ७९

७५) **मउलंत** – वनेषु वसन्तस्य लक्ष्मीः सदृशं तुल्यमेव पदं स्थापयति निवेशयति समकालमेव स्वागमनं व्यनक्तीति । केषु । मुकुलीभवन्मुकुलितेषु । मुकुलीभवन्ति अङ्कुराणि कुड्मलाकारतामापद्यमानानि मुकुलितानि च कोशरूपाणि तेषु । अन्यच्च विकसित[16]विकसत्कुसुमनिवहेषु । विकसितानि पूर्वं विकासमापन्नानि विकसन्ति च तत्कालमुज्जृम्भमाणानि यानि कुसुमानि पुष्पाणि तेषां निवहाः समूहास्तेषु । कोऽर्थः । वसन्ते प्रवर्तमानमात्रेऽपि सर्वपुष्पाणि विकासोन्मुखान्यथ[17] जातानि ॥ ७५ ॥ ७६) **बहुएहि** – बहुभिः परिवर्धितैर्बाणैः शरैः अपि कुसुमचापस्य कामस्य किं प्रयोजनं विना अपि पर्याप्तमित्यर्थः । यतः एकेनैापि चूताङ्कुरेण सहकारपुष्पोद्गमेन भण कथय किमपर्याप्तम् । कन्दर्पस्य किं किं न साधितमित्यर्थः ॥ ७६ ॥ ७७) **घिप्पइ** – जाततिलकशोभेन वसन्तेनाभ्यधिकजनितशोभं कर्णिकारवनं कनकमयं प्रसाधनं मण्डनमिव गृह्यते । तिलको वृक्षविशेषो विशेषको वा । अपरोऽपि शोभाप्रियो ललाटे तिलकमाधाय कनकमयाद्याभरणानि परिधत्ते । इत्युक्तिश्लेषः ॥ ७७ ॥ ७८) **वियसंत** – विविधवनराजिकुसुमश्रीपरिगता महातरवो महाप्रमाणा वृक्षाः विकसन्तु तावद्विकासमाप्नुवन्तु । न च असाध्यं तैः किमपि साधनीयम् । किं पुनर्विजृम्भमाणो विकसन् यन्न कुर्यान्मल्लिकामोदः । तन्नास्ति यन्न साधितं मल्लिकापुष्पपरिमलेन । अत एव शेषवृक्षाणां विकासमात्रमेवावशिष्टं मल्लिकयैव पर्याप्तत्वात् ॥ ७८ ॥ ७९) **पढमं चिय** – प्रथममेव पाटलामोदः कामिजनस्य हृदयानि मृदूनि कोमलानि कुणइ विधत्ते । पश्चाच्छेपा अपि कुसुमशराः सुखम् अनायासेन विशन्ति प्रविशन्ति । प्रथमं हि कामिमनांसि पाट-

1) = विकसितविकसतं. 2) B विहसंत. 3) J मिं, [वहुएहिं वि]. 4) B विय. 5) PB भूयं°, J चूयं°. 6) P कंजं न पज्जत्तं, J कंजंणण पज्जत्तं, B भण किं न पज्जंतं. 7) = पर्याप्तं. 8) = गृह्यते. 9) B सोएण. 10) = कर्णिका[र], J °यारिवणं. 11) B विहसंतु. 12) = विजृंभमाणो. 13) PB जन्न, J जण्ण for जं ण. 14) B पच्छा हिययाइ सुहं. 15) P विज्झंति, JB विसंति. 16) B विकसत्कुसुमानि for विकसित. 17) B °न्ययजातानि.

पज्जत्त-वियासुवेल्ल-गुंदि-पब्भार-णूमियं-दलाइं ।
पहियाण दुरालोयाइँ होंति मायंद-गहणाइं ॥ ८०

अपहुत्त-वियासुड्डीण-भमर-विच्छाय-दल-उड्डुब्भेयं ।
कुंद-लइयाएँ वियलइ हिम-विरहायासियं कुसुमं ॥ ८१

आवज्झंत-फलुप्पंक-थोयं-विहडंत-संधि-बंधेहिं ।
मंद-पवणाहएहि वि परिगलियं सिंदुवारेहिं ॥ ८२

थोऊससंत-पंकय-मुहीए णिव्वणिएँ वसंतम्मि ।
वोलीण-तुहिण-भर-सुत्थियाए हसियं व णलिणीएँ ॥ ८३

लायींसोन्मादानि क्रियन्ते पश्चाच्छेपकुसुमैर्विध्यन्ते ॥ ७९ ॥ ८०) पज्जत्त – माकन्द-गहनानि आम्रवनानि पथिकानां दुरालोकानि भवन्ति । यतः कीदृशानीत्याह । पर्याप्तः[21] प्राप्तो यो विकासोऽत एव उविल्लः प्रसरणशीलः यो गुन्दिप्राग्भारो मञ्जरीभरस्तेन नमितानि नम्रीभूतानि दलानि पत्राणि येषां तानि । 'प्रसरेः पयल्लोवेल्लौ' [हेम० ८-४-४७] इति उविल्लः । गुन्दिर्मञ्जरी गुच्छो वा । नम्रीभूतबहलपत्रावलीपरिवेष्टितत्वात् दुरालोकत्वम् ॥ ८० ॥ ८१) अपहुत्त – अप्राप्तविकासोड्डीनभ्रमरविच्छायदलपुटोद्भेदं हिमविरहायासितं शीतकालवियोगदग्धं कुन्दलतायाः कुसुमं पुष्पं परिगलति भ्रश्यति । पुष्पश्च विगलइ य तदा[22] विकासाभावात् । प्रसह्य निर्गच्छद्भिर्भ्रमरैरेव विहितत्वाद्विच्छायते[23] ॥ ८१ ॥ ८२) आवज्झंत – मन्दपवनाहतैरपि अल्पानिलान्दोलितैरपि सिन्दुवारैः निर्गुण्डैः कुसुमैः परिगलितम् । यतः किंभूतैः । आवध्यमानफलोत्पङ्कस्तोकविघटमानसंधिबन्धैः । उत्पङ्कः समूहः । 'पंकोच्छेहसमूहेसु बहलए तह य उप्पंको ।' [दे० ना० १-१३०] इति देशीवचनांशः ॥ ८२ ॥ ८३) थोऊससंत – स्तोकोच्छ्वसत्पङ्कजमुख्या षट्पदकटाक्षनयनया व्यतिक्रान्ततुहिनभरसुस्थितया नलिन्या कमलिन्या हसितमिव । अन्ययापि पद्मिनीप्राप्तया नासिकया अतिक्रान्तजाड्यतया बाल्यदशया [24]यौवने भेदे जातपङ्कजाकारवदनया कटाक्षवत्या च सस्मितया भूयत इत्युक्तिः । स्मितं च किलिकिञ्चितभावे । यदुक्तं प्रभुश्रीहेमसूरिभिरलंकारचूडामणौ 'स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलापसंकरः किलिकिञ्चितम्' [७-४१] इति स्वाभाविकदशलीविकारेषु । जातयश्च पद्मिनीचित्रिणीशङ्खिनीत्रयम् । [26]लक्षणमासां वात्स्यायनादवसेयम्

1) P सुवे[=व्वे]ल्ल, J सुचिल्ल, B सुव्विल्ल. 2)=मंजरी, B गुच्छ for गुंदि. 3)=अनुमित, B णामिय. 4)=आम्रवनानि. 5) P °मुड्डीण, J °सुड्डीण, B °सुडीण. 6) B भ्रमर. 7)=दलपुटोद्भेद. 8) B कुंदलयाए. 9) J वियलिइ. 10) PJB आवज्झंत. 11)=उप्पंक उत्सेध. 12) B थोम. 13) J बंधेहि. 14) P पवणाहएहि स्वि, J °हएहिं वि, B पवाणहसहं वि. 15)=स्तोकोच्छ्वसंत. 16)=अवलोकिते. 17) B मुहीइ छप्पयकडक्खणयरीए [=मुहीइ छप्पय-कडक्ख-णयणाए]। 18) P च, JB व. 19) J णलणीए. 20) [पाटलामोदेन मृदूनि]. 21) B पर्याप्तिः. 22) B पुप्पस्य विगलइ पतया. 23) [विहतत्वाद्विच्छाययते]. 24) [यौवनभेदे]. 25) B खल्वयमासा वास्यनंदेवसेयं ।

मलय-समीर-समागम-संतोस-पणच्चिराहिँ[1] सवत्तो ।
वाहिप्पइ[2] णव-किसलय-कराहिँ[3] साहाहिँ महु-लच्छी ॥ ८४
दीसइ[4] पलास-वण-वीहियासु पप्फुल्ल[5]-कुसुम-णिवहेणं[6] ।
रत्तंवर-णेवच्छो णव-वरइत्तो व्व महु-मासो[7] ॥ ८५
परिवड्ढइ[8] चूय[9]-वणेसु विसइँ[10] णव[11]-माहवी-वियाणेसु[12] । 5
लुलइ व [13]कंकेलि-दलावलीसु मुइउ[14] व्व महु-मासो[15] ॥ ८६
अण्णण्ण-वण-लया-गहिय-परिमलेणाणिलेणं[16] छिप्पंती[17] ।
[18]कुसुमंसुएहिँ रुयइ[19] व परम्मुही तरुण-चूय[20]-लया ॥ ८७
वियसिय-णीसेस-वणंतराल[21]-परिसंठिएण कामेण ।
विवसिज्जइ[22] कुसुम-सरेहिँ[23] लद्ध-पसरेहिँ[24] कामि-यणो ॥ ८८ 10

॥ ८३ ॥ ८४) **मलय** – मलयसमीरो दक्षिणानिलस्तस्य समागमे संतोषेण नृत्यन्तीभिर्नृत्यमिवादधानाभिर्नवकिसलयकराभिर्नवपत्रहस्ताभिः शाखाभिर्मधुलक्ष्मीः वसन्तश्रीः वाहिप्पइ आकार्यते इव । 'व्याहृगेर्वाहिप्पः' [हैम० ८-४-२५३] इति वाहिप्पआदेशः । अथ चापरयापि प्रियागमादिकृष्टया मधुलक्ष्मीः प्रियसखी आहूयते [25]तदत्युंक्तिरहस्यम् ॥ ८४ ॥ ८५) **दीसइ** – पालाशवनवीथिकासु किंशुकवृक्षावलीषु 15 प्रोत्फुल्लकुसुमनिवहेन कृत्वा मधुमासो वसन्तो रक्ताम्बरनेपथ्यः कौसुम्भवस्त्रपरिधानो नववरयिता पाणिग्रहणप्रस्तावे वर इव दृश्यते । किंशुककुसुमावलीषु रक्तवस्त्रोत्प्रेक्षेति ॥ ८५ ॥ ८६) **परिवड्ढइ** – मुदित इव मधुमासश्चूतवनेषु परिवर्धते वृद्धिमिवाप्नोति । नवमाधवीवितानेषु अतिमुक्तकवल्लीनिकुञ्जेषु विकसति । [26]तद्विकाश्यनुवातेन वसन्तः किल कृष्यते । [27]*किंकिल्लिदलावलीषु अशोकपत्रश्रेणिषु लुठतीव । पत्रमय- 20 सुखशय्यायां स्वपितीवेति ॥ ८६ ॥ ८७) **अण्णण्ण** – अन्यान्यवनलतानां गृहीतः परिमलो येन[28] तेनानिलेन वायुना स्पृश्यमाना तरुणचूतलता पराङ्मुखी सती कुसुमाश्रुभिः पुष्पबाष्पैः रोदितीव । अथवा विमर्दोत्थः परिमलः इति । अपरापि तरुणी अन्यान्यवनिता परिमलानुषङ्गिणा प्रियेणालिङ्ग्यमाना पराङ्मुखीभूय स्थूलाश्रुपातै रुदितमिव व्यनक्ति । पवनप्रेंखोलनयान्यदिक्षु विक्षिप्ता सहकारलता [29]एवमुत्प्रेक्षते ॥ ८७ ॥ 25
८८) **वियसिय** – विकसितनिःशेषवनान्तरालपरिसंस्थितेन कामेन लब्धप्रसरैः प्रस्ता-

1) = प्रनर्तितानि, B पणच्चरीहि. 2) = आहूयते. 3) = कर्तृभिः. 4) B दीसउ. 5) PB पफुल्ल. 6) J णिवहेसु. 7) J महमासो. 8) J परियट्टइ. 9) P भूय°, J चूय°, B omits चूयवणेसु विसइ. 10) = विशतीव, P विसइ व नव°, J विसइ णव°. 11) B व णवमालई वियो[=या]णेसु. 12) = वितानेषु. 13) P कंकेल्लि, J कंकेलि, B किंकिल्लि. 14) = मुदित इव, P मुईउ, JB मुइउ. 15) B मासे. 16) P °मलेणानिलेन, JB °मलेणाणिलेण. 17) B छुपंती. 18) = पुष्पाश्रुभिः. 19) J रुयइ व्व परमुही. 20) P भूय°, JB चूय°. 21) = विवर. 22) = विवशः क्रियते, P विवसिज्जइ, J वियसियइ, B वियसिज्जइ. 23) PB °सरेहि, J सरेहिं. 24) P पसरेहिं, B °प्पसरेहि. 25) B आहूय तदुत्फक्तिरहस्यं. 26) B तदिकाश्यनुवानेन. 27) B किंकिलि. 28) B योनितिस्वनिलेन. 29) B इवमुत्प्रेक्षते.

इय[1] वम्मह-बाण[2]-वसीकयम्मि सयलम्मि जीव-लोयम्मि ।
महु-सिरि-समागमत्थाण-मंडवं उवगओ[3] राया ॥ ८९
सेवागय-सय[4]-सामंत-मउड-माणिक्क-किरण[5]-विच्छुरिए ।
सीहासणम्मि[6] वंदिण-जय-सद्द-समं समासीणो[7] ॥ ९०
परियरिओ[8] वार-विलासिणीहि[9] सुर-[10]सुंदरीहिँ व सुरेसो[11] ।
कणयायलो[12] व्व आसा-वहूहिँ सइ[13]-[14]वियसियासाहिं ॥ ९१
अह सो एक्काए समं णर-णाहो चंदलेहणामाए ।
सपरिहासं सुमणोहरं[15] च सुहयं समुल्लवइ ॥ ९२
अइ [16]चंदलेहे णं[17] णियसि[18] मलयाणिल[19]-कुसुम-रेणु-पडिहत्थं[20] ।
कामेण भुयण[21]-वासं व विरइयं दस-दिसा-यक्कं[22] ॥ ९३

वंकप्राप्तैः कुसुमशरैः कामबाणैः कामिजनो विवश्यते वशीक्रियते ॥ ८८ ॥ ८९) **इय वम्मह** – इति मन्मथचापवशीकृते सकलेऽपि जीवलोके राजा श्रीशातवाहनो मधुश्रीसमागमस्थानं मण्डपम् उद्यानविजयमन्दिरमुपागतः समाजगाम ॥ ८९ ॥ ९०) **सेवागय** – सेवागतशतसामन्तमुकुटमाणिक्यकिरणविच्छुरिते सिंहासने वन्दिजनजयशब्दाः तैः समं मागधकृतजयजयारावेण सह समासीनः उपविष्टः ॥ ९० ॥ ९१) **परियरिओ** – आसननिपीदनानन्तरं सदाविकसितमुखीभिः वारविलासिनीभिः परिकरितः । के इव । सुरसुन्दरीभिः देवाङ्गनाभिः सुरेश इव इन्द्र इव । आशावधूभिः दिक्कामिनीभिः कनकाचलः सुमेरुरिव परिवेष्टितः ॥ ९१ ॥ ९२) **अह सो** – अथानन्तरं स नरेन्द्रश्चन्द्रलेखानाम्न्या एकया वाराङ्गनया समं सार्धं सपरिहासं सनर्मवचनं सुमनोहरं रमणीयं न तु कटुकं सुखदं रोचमानम् । अथ च सुभगं यथा भवति तथा समुल्लपति भाषत इत्यर्थः ॥ ९२ ॥ ९३) **अइ** – अयीति कोमलालापे । हे चन्द्रलेखे न पश्यसि । 'दृशो णियच्छपिच्छ०' [हैम० ८-४-१८१] इति सूत्रेण णियः । मलयसमीरसमागमवशप्रसृत[23]कुसुमरेणुपरिपूर्णं दशदिक्चक्रं कामेन वासभुवनमिव रचितं

---

1) J ईय. 2) B चाव for बाण. 3)=उद्यानं. 4)=शत. 5) P किरण, B किरिण. 6) B सिंहासणंमि. 7) P समल्लीणो, JB समासीणो. 8) P परिवारिउ वार°, J परियरिओ वार°, B परियरिउ वर°. 9) P °सिणीहिं, JB °सिणीहि. 10) P सुंदरीहिं, B सुंदरीहि. 11)=इंद्र. 12) P कणयावलो, J कणयायलो, B कणयायलु. 13) P सय, J सइं, B सइ. 14) P वियसियमुहीहिं, J वियसियासाहिं, B विहसियमुहीहिं. 15) P सुमणोरमं च, J समणोहरं च, B समणोहर वा सु°. 16) P चंदलेहि, B चंदलेहे. 17)=न पश्यसि. 18) According to B, अइ चंदलेहे ण णियसि । is just a prose sentence, and the first line of the verse proper is read thus: मलय-समीर-समागम-वस-पसरिय-कुसुम-रेणु-पडिहत्थं ।. 19) P मलयानिल, J मलयाणिल. 20)=पूर्ण. 21) P वासभवणं व, J भुयणवासं व, B वासभुवणं व. 22) PB दसवसायक्कं, J दसदिसायक्कं. 23) B प्रसित for प्रसृत.

ता कीस तुमं केणावि[1] मयण-सर-बंधुणा मयंक-मुहि[2] ।
चिंचिल्लिया[3] सि सव्वायरेण सव्वंगियं अज्ज ॥ ९४

णव-चंपय-कुसुम-णिवेसियाणणो[4] केण[5] तुह णिडाल-यले ।
सज्जीवो विव लिहिओ[6] महु-पाण-परव्वसो महुओ[7] ॥ ९५

केण वि[8] महग्घ-मयणाहि[9]-पंक-जोएण तुह कवोलेसु ।
लिहियाओ पत्तलेहाओ[10] मयण-सर-वत्तणीओ[11] व्व ॥ ९६

केण व कइया[12] सहयार-मंजरी तुह कवोल-पेरंते ।
कर-फंस-विहाविय-कुसुम-संचया सुयणु णिम्मविया[13] ॥ ९७

केणज्ज तुज्झ तवणिज्ज-पुंज-पीए पओहरुच्छंगे ।
पत्तत्तं पत्तं[14] पत्त-लच्छि पत्तं लिहंतेणं[15] ॥ ९८

कृतम् । अस्तीति शेषः । पडिहत्थं देस्यं परिपूर्णम् । वासगृहमपि सुगन्धाढ्यपटवासपरिकलितं भवति ॥ ९३ ॥ ९४) **ता कीस** – तत्किमिति त्वं मृगाङ्कमुखि चन्द्रवदने केनापि मदनशरबन्धुना कामबाणवयस्येन सर्वादरेण सर्वाङ्गिकं सर्वाङ्गीणम् अद्य चिंचिल्लिया मण्डिता असि । 'मंडेश्चिंचचिंचअचिंचिल्लरीडटिविडिकाः' [हैम० ८-४-११५] इति [16]चिंचिल्लिया ॥ ९४ ॥ मण्डनमेवाह । ९५) **णवचंपय** – [नवचम्पककुसुमनिवेशितानने हे सुतनु] केन तव भालतले ललाटपट्टे सजीव इव मधुपानपरवशो मकरन्दास्वादेनालसो मधुपो भ्रमरो लिखितः चित्रितः इति ॥ ९५ ॥ ९६) **केण** – केन च महार्घमृगनाभिपङ्कयोगेन तव कपोलयोः गल्लयोः पत्रलेखाः लिखिताः चित्रवल्ल्यः कृताः । उत्प्रेक्ष्यते । मदनशरवर्तनयः इव कन्दर्पबाणमार्गा इव । अतः प्रवेशावसरः इति । मृगनाभिः कस्तूरिका ॥ ९६ ॥ ९७) **केण** – हे सुतनु चन्द्रलेखे केन वा तव कपोलपर्यन्ते संस्थापिता निश्चलीकृता करस्पर्शविभावितकुसुमसंचया सहकारमञ्जरी रचिता विहिता । करन्यास एव चित्रकुसमविस्तार[17]पुष्परूपापन्नो ज्ञेयः । 'स्पृशः फासफंसफरिसछिवछिहालुंखालिहाः' [हैम० ८-४-१८२] इति फंसः ॥ ९७ ॥ ९८) **केणज्ज** – हे [18]प्राप्तलक्ष्मि तपनीयपुञ्जपीते तव पयोधरोत्संगे पत्रं पत्रवल्लरीं लिखता केनाद्य दिने पात्रत्वं स्वस्य [19]रतवेद्यत्वं प्राप्तम् ।

---

1) B केण वि. 2) P मयंकमुही, B मियंकमुहिं. 3) = मंडितासि, P विंचिल्लिया, J चिंचिल्लिया, B चंचिल्लिया. 4) B निवेसियाणणे. 5) B केण सुयणु भालयले. 6) B finishes this line with लिहिओ. 7) P भमरो, J महुओ. 8) B व. 9) = मृगनाभिः, J मयणाहिं. 10) B पत्तलेखाम. 11) = मार्ग इव. 12) = कदा, B रइया. 13) B संठविया. 14) = रात्री पर्याप्ती. 15) B लिहिंतेण. 16) B चिंचिल्लि. 17) B विसार. 18) B प्राप्तलक्ष्मी. 19) B रत्तवियत्वं.

एक्केक्कम[2]-चयण-मुणाल-दाण-वलियद्ध[3]-कंधरा-बंधं ।
चलण-कमलेसु लिहियं केणेयं[4] हंस-मिहुण[5]-जुयं ॥ ९९[1]
इय[6] केण णियय-विण्णाण-पयडणुप्पण्ण-हियय-भावेण ।
अविहाविय-गुण-दोसेण पाइया सप्पिणी छीरं ॥ १००[7]
तं तह सोऊण णराहिवाहि[8] वियसंत-लोयणी-मुहीए[9] ।
दर-लज्जोणय[10]-वयणाए[11] पभणियं चंदलेहाए ॥ १०१
सो देव विद्ध[12]-कुसलो चित्तयरो जेण तुम्ह दारम्मि[13] ।
अवलंबिऊण[14] पत्तं तइया लिहिओ तुमं चेव ॥ १०२
सो च्चेय[15] पुणो संपइ [16]सिंघल-दीवाहि[17] आगओ एत्थ ।
तेणेयं मयण-महूसवम्मि सव्वं समालिहियं ॥ १०३
अह एवं स[18]प्परिहास-गोट्ठि-सुह-संठियस्स[19] णरवइणो[20] ।
लद्धावसरं एक्केण मंति-उत्तेण[21] उल्लवियं ॥ १०४

तपनीयं सुवर्णम् ॥ ९८ ॥ ९९) एक्केक्कम – एकैकं [22]चरणकमलयोः वदनमृणालदानवलितार्धकन्धराबन्धं मिथुनं हंसयुगम् इदं केन लिखितम् । चित्ररूपेण न्यस्तकन्धरा ग्रीवार्धवलिता वक्रीकृतेति विचित्रम् ॥ ९९ ॥ १००) इय केण – अयि केन निजकविज्ञानप्रकटनोत्पन्नहृदयभावेन अविभावितगुणदोषेण अज्ञातगुणागुणेन सर्पिणी क्षीरं दुग्धं पायिता । आत्मविज्ञानोत्कर्षज्ञापनाय केनेदमनुचितमाचरितमित्यर्थः ॥ १०० ॥ १०१) तं तह – तत्तथा नराधिपात् श्रुत्वा विकसल्लोचनमुख्या सुहृद्घनयनवदनया दरलज्जावनतवदनया चन्द्रलेखया प्रतिभणितं [23]निःशङ्कमसुक्तादरम् । ईषल्लज्जा [24]स्त्रीस्वभावत्वम् । न च रोपस्तादृशीनां नर्मपात्रत्वात् ॥ १०१ ॥ १०२) सो देव – हे देव राजन् स विद्धकुशलः चित्रकर्मनिपुणः चित्रकरः येन युष्माकं द्वारे प्रतोलीमुखे पत्रमवलम्ब्य तदानीं त्वमेव लिखितः ॥ १०२ ॥ १०३) सो चेय – स एव पुनः संप्रति इदानीं सिंहलद्वीपादत्रागतोऽस्ति । मदनमहोत्सवे कामपर्वणि तेनेदं सर्व समालिखितं सम्यक् चित्रितम् ॥ १०३ ॥ १०४) अह एवं – अथानन्तरम् एवं [25]पूर्वोक्तप्रश्नो-

---

1) B interchanges the places of verse Nos. 98 and 99. The order of PJ has been followed, and the Sanskrit commentary is arranged accordingly. 2) P एक्केक्कयण, J एक्केक्कमवयण, B इक्किक्कमवयण. 3) P वलियकंधरा, JB वलियद्धकंधरा. 4) P केणायं, JB केणेयं. 5) B मिहुणहंसयु[=जु]यं for हंस°. 6) B अजि[=यि] 7) P 99, J 101, B 102. 8) P puts No. 5 on °हि, perhaps indicating that it is Abl., B नराविहाउ 9) B लोयणमुहीण. 10) = अवनत. 11) B वयणाइं. 12) P चित्तकु°, J विद्धकु°, B चिद्दत्कु°. 13) B दारंमि. 14) B very corrupt. 15) B सो चेव. 16) B सिंहल°. 17) J °दीवाइ. 18) B सपरि°. 19) B संतिसेय°. 20) J °वयणो. 21) PB मंतिपुत्तेण, J मंतिउत्तेण. 22) Between एकैकं and चरण etc. B has a word of three letters which look like वृधंकृ. 23) B निसंकमुक्ता°. 24) B स्त्रभावबन्च. 25) B पूर्वेणक्तमिस्तोत्तर°.

सो देव चार-पुरिसो सिंघल[1]-वइणा णिरूविओ[2] मण्णे[3] ।
इमिणा विण्णाण-गुणेण चंदलेहा-घरे[4] वसइ ॥ १०५
एव-विहा[5] एव-विहे[6] अच्छंति णरेसराण[7] जे कडए ।
ते चर-पुरिसा लोए हि[8] जक्ख-णामा भणिज्जंति ॥ १०६
ता[9] भणियं णरवइणा[10] तस्सोवरि[11] सुयणु[12] सिंहलेसस्स ।
पेहिओ[13] विजयाणंदो पोट्टिस-वर-मंतिणा सहिओ ॥ १०६*१
तस्स कडयाउ अज्ज वि[15] णागच्छइ कोइ कहइउं[16] सच्चं ।
किं भणइ सिंहलेसो किं वा सेणाहिवो अम्हं[17] ॥ १०६*२
अज्जं चिय सिट्ठं हेरिएहिं[18] उयही-तडम्मि[19] संपत्तो ।
विजयाणंदो सह पोट्टिसेण परिवड्ढिय-पयावो[20] ॥ १०७
तह सो वि सिंघलेसो[21] तद्दियस[22]-णिरालसो सयं चेय ।
जवसंधण[23]-संपुण्णाइ कुणई[24] दुग्गाइ अविसण्णो[25] ॥ १०८

त्तरभङ्ग्या परिहासगोष्ठीसुखं [26]चर्चरीकेलिप्रियं यथा भवति संस्थितस्य नरपतेर्लब्धावसरम् एकेन मन्त्रिपुत्रेण उल्लपितं [27]निवेदितं कथाविक्षेपेण ॥ १०४ ॥ **१०५) सो देव** – हे [28]देव मन्ये शङ्के स सिंहलपतिना निरूपितश्चारपुरुषो हेरिकः । तर्हि चन्द्रलेखा किमस्य हेरिणं स्वगृहेऽवस्थापयतीत्याह । अमुना विज्ञानगुणेन चन्द्रलेखागृहे वसति । वैज्ञानिक इति कृत्वा सुखेन तिष्ठति ॥ १०५ ॥ **१०६) एवविहा** – [29]एवंविधविज्ञानादिदम्भेन एवंविधे चतुरा नरेश्वरस्य कटके ये अच्छंति तिष्ठन्ति ते चरपुरुषा यक्षनामानि लप्स्यन्ते । यक्षवत् परचेष्टितमुपविष्टा जानन्तीति यक्षनामानः[30] ॥१०६॥ **१०६*१) ता भणियं** – तावता हे सुतनु सावित्रि भणितं नरपतिना । मन्त्रिपुत्रं [31]प्रतीति शेषः । तस्य सिंहलेशस्य उपरि पुट्टिसवरमन्त्रिणा सहितो विजयानन्दः सांधिविग्रहिकः प्रहितोऽस्ति ॥ १०६*१ ॥ **१०६*२) तस्स** – तस्य कटकादद्यापि नागच्छति कश्चित्कोऽपि कथयति यत्सत्यमवितथम् । किं भणति सिंहलेशः शिलामेघनामा, किं वास्माकं सेनाधिपो विजयानन्दो भणतीति ॥ १०६*२ ॥ अथ मन्त्रिपुत्र आह । **१०७) अज्जं चिय** – अद्यैव [32]शिष्टं कथितं हेरिकैर्गूढपुरुषैः । कथमित्याह । पुट्टिसेन मन्त्रिणा सह विजयानन्द उदधितटे संप्राप्तः ॥ १०७ ॥ **१०८) तह सो** – तथा स च[1] सिंह-

---

1) B सिंहल. 2) P निरुविओ, J णिरूविओ, B णिज्जुविरु. 3) PJB मन्ने. 4) P would separate चदंलेहा घरे. 5) P एस्वविहा, JB एवविहा. 6) B एवविहे. 7) P नरेसराण, B नार(=नरे)सरिस्स. 8) P लोए हि, J omits हि, B लोयंमि. 9) This and the next verse are found only in B. 10) B नर°. 11) B तसोवेरि. 12) B सुजणु. 13) B पेहिउ, the commentary presupposes पहिओ. 14) B वुट्टिस. 15) B अज्जु विहेनाग°. 16) B कहइऊ सच्चं, [कहइ जं सच्चं]. 17) B अन्हा. 18) B हरिएहिं. 19) J उहईत°, B उवहीत°. 20)=परिवर्धितप्रतापः. 21) B सिंहलेसो. 22) B तद्दियह. 23) P जवसिंधण, J जवसेंधण, B असणिंधण. 24) P संमुण्णाइं कुणइं दुग्गाइं, JB do not nasalise इ. 25) B सविसन्नो. 26) B चम्तरिके°. 27) B निवातितं. 28) B उदवं मन्ये. 29) B एवं विविज्ञानादि°. 30) B यक्षमानानो. 31) B प्रतीत्य शेषः. 32) B सृष्टं.

विसमीकरेइ [1]उयही-तडाइँ जोएइ जुज्झ-भूमीओ [2]।
विजयाणंदेण समं महाहवं महइ णिक्कंपो ॥ १०९
भणियं च राइणा पिय-वयंस सो [3]च्चेय तत्थ पत्तट्ठो ।
विजयाणंदो णिय-संधिविग्गहे किं [4]इमेणम्हं ॥ ११०
जेणण्णे वि महामंडलाहिवा णिब्भया वि भेसविया ।
सो किं विजयाणंदो वंचिज्जइ[5] सिंहलेसेण[6] ॥ १११
अणवेलं साहिज्जसु एयं [7]तुह हेरिएण जं सिट्ठं ।
एसा रमणीया [8]मयण-चच्चरी [9]ताव वोलेउ ॥ ११२
एवं भणिऊण णराहिवेण सव्वाण [10]वार-विलयाण ।
दिण्णाइँ [11]महूसवियाइँ [12]वंदिणाणं च बहुयाइं ॥ ११३
तह संमाणिय[13]-णीसेस-पणइ-संतोस-वस-पसण्ण-मुहो ।
विण्णत्तो सुयणु पुरोहिएण उवसप्पिऊण पहू ॥ ११४

लेशस्तद्दिवसनिरालसः तद्दिनं यदा विजयानन्दः समुद्रतटं प्राप्तः तदारभ्यालस्यविवर्जितः
स्वयमेव स्वोपक्रमेणाविपन्नो विषादरहितः सन्नशनेन्धनसंपूर्णानि दुर्गाणि करोति । अशनं
15 धान्यादि इन्धनं काष्ठानि ॥ १०८ ॥ १०९) **विसमी** – विषमीकरोति उदधितटान्
समुद्रसैकतानि जलप्लावादिना विसंस्थुलानि करोति । सैन्यस्य दुःसंबाधाः जोएइ
गवेषयति युद्धभूमीः । निःकम्पो निश्चलचित्तो विजयानन्देन समं महाहवं महायुद्धं
महइ कांक्षति । 'कांक्षेराहाहिलंघाहिलंखवच्चवंफमहसिहविलुंपाः' [हैम० ८-४-१९२]
इति महः ॥ १०९ ॥ वसन्तोत्सवमनुस्मृत्याह । ११०) **भणियं च** – भणितं च राज्ञा
20 प्रियवयस्य निजसंधिविग्रहे स एव विजयानन्दः प्राप्तार्थः प्रतिष्ठां प्राप्तो निपुण इत्यर्थः ।
किमनेनास्माकं पर्याप्तमधुना राज्यचिन्तयेत्यर्थः ॥ ११० ॥ १११) **जेणण्णे वि** –
येनान्येऽपि महामण्डलाधिपा निर्भया अपि बिभीषिता भयं प्रापिताः । डिभी भये । भियः
षान्ताविति [14]सन्नन्तप्रयोगः । स किं विजयानन्दः सिंहलेशेन [15]शिलामेघेन वञ्च्यते मति-
विपर्यासं प्राप्यते ॥ १११ ॥ ११२) **अणवेलं** – [16]अणवेलं वेलान्तरम् अन्यवेलायां
25 तदन्यवारं साधय कथय एतत् यत्तु हेरिकैस्तत्र [17]शिष्टं प्रोक्तम् । कारणमाह । एष
रमणीयो नगरचर्चरीमहोत्सवारम्भः तावदतिक्रामतु ॥ ११२ ॥ ११३) **एवं भणि-
ऊण** – एवं भणित्वा नराधिपेन सर्वासां वारवनितानां वन्दिजनानां च महोत्सवोचितानि
बहुकानि प्रसाददानानि दत्तानि ॥ ११३ ॥ ११४) **तह संमाणिय** – तथा [18]संमा-

---

1) P उयहीतडाइं, J उहईतडाइ, B उलहीतडाइ. 2) = वांछति 3) B हच्छ (= त्थ). 4) B
इमेणं म्हां (= इमेणम्हं) 5) B वंचिज्जै. 6) PB सिंहलेसेण, J सिंघले°. 7) B जं हेरिएहिं तुव
सिट्ठं for तुह etc. 8) B वयर [= नयर] for मयण. 9) P ताम्व, JB ताव. 10) P वारवल°,
JB वारविल°. 11) = मधूत्सविकानि, B महोसवियाइ. 12) PJB वंदि°. 13) P सम्माणीय, B
समाणिय. 14 B इनन्त°. 15) B शिलामेघवंच्यातं तमितित्रिणजासंप्राप्यत ॥ 16) B अणुवेलंतरंतरं
आणवलत्र ॥ तइन्यवारं. 17) B सृष्टं. 18) B सन्मानित°.

देव [1]सुमज्झण-समओ सज्जं चिय मज्जणं विसूरेइ[2] ।
दिय-वर-सत्थो[3] दारे तुह णिच्च[4]-णिवेसिएक्क-मणो ॥ ११५
अह सो विसज्जियासेस-पणइ-पडिवण्ण-मज्जणारंभो ।
संचलिओ वंदिण-सय-समूह[5]-कय-जय-जयासद्दो ॥ ११६
ताव य संचलिय-महा-णरिंद[6]-वर-चार-रमणि[7]-संवलिओ ।
भड-भंड[8]-भोय-मीसो जाओ अत्थाण-संखोहो ॥ ११७
सहसुट्ठिय-णर-संमद्द-णोल्लि[9]णुम्मत्थि[10]याणणो पडिओ ।
पोक्करइ[11] थेर[12]-भट्टो अहो विणट्ठो विणट्ठो हं ॥ ११८
तो[13] सो सेवा-वाएण[14] विणडिओ कह वि[15] केहिँ वि वराओ ।
उक्खित्तो[16] पंक-गओ[17] व्व जर-गओ[18] राय-पुरिसेहिँ ॥ ११९
एत्थंतरम्मि ।
अण्णोण्ण[19]-मउड-संघट्ट-खुडिय[20]-माणिक्क-पयर-पक्खलिओ ।
सुइरेण सरइ[21] एक्केक्क-मंगण[22]-त्थंभिओ लोओ ॥ १२०

नितनिःशेषप्रणयिसंतोषवशप्रसन्नमुखः प्रभुः सुतनु सावित्रि पुरोहितेनोपसर्प्यागत्य विज्ञप्तः ॥ ११४ ॥ **११५) देव** – देव मध्याह्नसमयः । वर्तत इति शेषः । सज्जं चिय प्रगुणीभूतमेव मज्जनं स्नानं विसूरइ खिद्यते विनश्यतीत्यर्थः । 'खिदेर्जूरविसूरौ' [हैम० ८-४-१३२] इति विसूरः । नित्यनिवेशितैकमनाः नित्यस्थायी द्विजवरनिर्वहो ब्राह्मणसंघस्तव द्वारे वर्तते ॥ ११५ ॥ **११६) अह सो** – अथ स विसर्जिताशेष[23]-प्रणयिप्रतिपन्नमज्जनारम्भो वन्दिजनशतसमूहकृतजयजयरवः संचलितः स्नानमण्डपं प्रति ॥ ११६ ॥ **११७) ताव य** – तावता संचलितमहानरेन्द्रवरवाररमणीसंवलितः भटभण्डभोगमिश्रः आस्थानसंक्षोभो जातः । संवलितः संयुक्तः । भटः सुभटः भण्डाश्चतुरशीतिर्नर्मपात्राणि भोगा वयस्यास्तैर्मिश्रः कर्बुरितः ॥११७॥ **११८) सहसुट्ठिय** – सहसोत्थितनरसंमर्दप्रेरणोन्मूर्च्छिताननः पतितः सन् पूत्करोति स्थविरभटः अहो विनष्टो विनष्टोऽहम् । अहो इति परामन्त्रणे ॥ ११८ ॥ **११९) तो सो** – ततः स [24]सेवावातेन विनटितः कथमपि वराकः कैश्चिद्राजपुरुषैः पङ्कगतो जरद्गव इव वृद्धवृषभ इव उत्क्षिप्तः ऊर्ध्वीकृतः ॥ ११९ ॥ अत्रान्तरे । **१२०) अण्णोण्ण** – अन्योन्यमुकुटसंघट्टभ्रष्टमाणिक्यप्रकरप्रस्खलितो लोकः । एकैकमार्गपरिसंस्थितः पृथक् पृथक् मार्गाभि-

1) P सुमज्जण, J मज्झण्ण, B मिज्झन्न. 2) = खिद्यते. 3) B निवहो for सत्थो. 4) = नित्यदान. 5) P समूढ, JB समूह. 6) B नरेन्द्र. 7) B रमणी. 8) B भट्टभंड for भंडभोय. 9) = प्रेरण. 10) B °सुत्थि(=च्छि)याणणो. 11) = पूत्करोति. 12) B ठेर. 13) B ता. 14) = सेवावातेन, B वएण. 15) = कथंकथमपि, P कहकहवि, J कह वि, B कहि वि. 16) = उत्पाटितः, P हक्खुत्तो, J उक्खित्तो. 17) PJB गउ व्व. 18) = जरद्राव. 19) P अन्नन्न, J अण्णोण्ण, B अन्नन्न. 20) = पतित. 21) = निःसरति. 22) P मंगणत्थ°, J मंगुणत्थ°, B मग्गपरिसंठिओ लोओ. 23) B °ताशे याशे°. 24) B सेवापतेन.

केहि वि[1] वर-वार-विलासिणीहिँ वेसा[2] वि संठिया पुरओ ।
पेल्लिज्जंति सुवल्लह-जण-जोग्गेहिँ पिहु[3]-थणेहिँ ॥ १२१

कीए वि महा-संमद्द-सेय-तण्णाय[4]-णीवि-बंधाए ।
दुव्वोज्झो[5] उज्झिय-मेहलो वि जाओ णियंब-भरो[6] ॥ १२२

णिविच्चा[7]लिंगण-लालसाएँ हियइच्छिए समावडिए ।
वहु मण्णिज्जइ कीए वि [8]तुडिओ थूलामलो हारो ॥ १२३

कीए वि [9]मय-मयामोय-मिलिय-मुहला[10]लि-मउलियच्छीए ।
लद्धावसरो वि चिरेण कह वि वोलिज्जइ पएसो ॥ १२४

इय सण्णा-वाहिप्पंत[11]-परियणो कह वि राय-भवणाहि[12] ।
पवणासासिय-हियओ णिययावासं गओ लोओ ॥ १२५

राया वि [13]पवज्जंतेहिँ विविह-मंगल-णिहोस-मुहलेहिँ ।
तूरेहिँ पढंतेहिँ य [14]वंदिण-दिय-वर-समूहेहिँ ॥ १२६

मुखः सुचिरेण सरति गच्छति ॥ १२० ॥ १२१) केहि – काभिरपि वरवारविलासिनीभिः सुवल्लभजनयोग्यैः परिस्तनैः पुरतः संस्थिताः द्वेष्या अपि अनभिगमनीया अपि पीड्यन्ते । अतिसंमर्दादिति शेषः ॥ १२१ ॥ १२२) कीए वि – कस्या अपि महासंमर्दखेदार्द्रनीविबन्धाया उज्झितमेखलो भ्रष्टकाञ्चीगुणोऽपि नितम्बभारो दुर्वहो जातः । तत्कालमार्द्रीभूतमिति तण्णाय ॥ १२२ ॥ १२३) णिव्विच्चा – निबिडालिङ्गनलालसया कयाचित् हृदयेप्सिते मनीषिते समापतिते संघटिते स्थूलामलो हारस्त्रुटितोऽपि बहु मन्यते । खुडिउ त्ति 'त्रुटेस्तुट्टखुट्टखुडोक्खुडोल्लुक्कणिलुक्कलुक्कोल्लूराः' [हैम० ८-४-११६] ॥ १२३ ॥ १२४) कीए वि – कयाचिन्मृगमदामोदमिलितमुखरालिमुकुलिताक्ष्या लब्धावसरो प्राप्तगमनप्रस्तावोऽपि प्रदेशः कथमपि चिरेण वोलिज्जइ लंघ्यते ॥ १२४ ॥ १२५) इय सण्णा – इति संज्ञाव्याहियमाणपरिजनः कथमपि राजभवनात् पवनाश्वासितहृदयः निजकावासं गतो लोकः । संज्ञाः करपल्लवीमूलदेवीप्रभृतयः । तत्र

अहिकलसचक्कटंकणतलोयपउमाजवंकुरेहिँ जा[15] ।
ससहरकरसंवलिया एसा करपल्लवी भासा ॥
अआदौ[16] कादयः प्रोक्ताः खदौ चापि जडौ स्मृतौ ।
शेषवर्गविपर्यासो मूलदेवेन भाषितम् ॥

इत्यादि ॥ १२५ ॥ १२६-२७) राया वि – राजापि प्रवाद्यमानैः विविधमङ्गल-

---

1) J केहि म्वि, [काहिं वि] 2) = द्वेष्या अपि. 3) PJB पिवि for पिहु. 4) = आर्द्र, B तण्हाय. 5) P दुव्वोज्झो उज्जिय, JB °उज्झो उज्झि°. 6) B हरो. 7) P निभिच्चा°, J णिव्विच्चा°, B णिब्भिच्चा°. 8) = त्रुटित, B खुडिओ. 9) = मृगमद. 10) J मउलालि. 11) = व्याह्रियमाण. 12) P भवणेहि, JB भवणाहि. 13) = प्रवा[द्य]मानैः. 14) J वंदियदिय°. 15) B चा. 16) B आयांदो.

सव्वाहिं चिय [1]सव्वोसहीहिँ लीलाइ मज्जिऊण चिरं ।
सयल-समाणिय-देवाइ-तप्पणो[2] भवणमल्लीणो ॥ १२७
तत्थ वि गो-भूमि-सुवण्ण-वत्थ-तिल-[3]मीसियाइँ दाऊण ।
दाणाइँ दिय-वराणं भोयण-सालं समल्लीणो ॥ १२८
तद्देस[4]-यालिएहिं पणईहिँ समं पसण्ण-मण-भावो ।
भोत्तुं[5] विविहाहारं [6]सुरसं [7]कालाणुरूयं च[8] ॥ १२९
भोत्तुं तक्कालोइय-परियण-[9]परियालिओ [10]समल्लीणो ।
अंतो[11] अत्थाण-हरं [12]विरइय-वर-रयण-पल्लंकं[13] ॥ १३०
तत्थासीणो [14]सहिएहिँ सुकइ-छंदाणुवत्तिएहिं च ।[15]
[16]समुयं [17]सुह-संतुट्ठो णर-णाहो [18]एक्कसरियाए[19] ॥ १३१
[20]वाम-करोवग्गिय-वेत्त-दंड-दाहिण-करोत्थय-मुहेण ।
पहु-हियय-भाव-कुसलेण दारवालेण विण्णत्तो ॥ १३२

निर्घोषमुखरैस्तूर्यैः वन्दिद्विजवरसमूहैश्च पठद्भिः भोगवेलावेदपाठं कुर्वाणैः ॥ [सव्वाहिं-] । सर्वाभिरपि सर्वौषधीभिः लीलया चिरं मज्जित्वा स्नानं विधाय [21]सकलसंमानितदेवादि-तर्पणो भवनं सौधं अल्लीणो आलीनः प्रविष्टः । 'आलीङोल्ली' [हैम० ८-४-५४] इति अल्ली । युग्मम् ॥ १२६-१२७ ॥ १२८) तत्थ वि – तत्र द्विजवराणां ब्राह्मणो-त्तमानां गो[22]भूमिवस्त्रुतिलसुवर्णमिश्रितानि दानानि दत्त्वा भोजनशालां भोजनमण्डपं समा-लीनः ॥ १२८ ॥ तत्रापि सौधे । १२९) तद्देस – तद्देशकालिकैः प्रणयिभिः सह भोजनयोग्यैरनुचरैः समं सार्धं प्रसन्नमनोभावः प्रीणितचित्तः सरसं स्निग्धं कालानुरूपं-मृतुसंबद्धं विविधाहारं भुक्तः[23] ॥ १२९ ॥ १३०) भोत्तुं – भुक्त्वा इत्तो इतः स्थाना-द्भोजनमण्डपात् तत्कालोचितपरिजनपरिवारितो राजा विरचितवररत्नपल्यङ्कम् आस्थान-गृहं समालीनः ॥ १३० ॥ १३१) तत्थासीणो – [तत्रासीनः सुहृद्भिः सुकविच्छ-न्दानुवर्तिभिश्च ।] समुयं – समकं समकालं सुखसंतुष्टो नरनाथो राजा यावदेकवेला-याम् । जात इति शेषः । हे सुतनु सावित्रि तावत् सविषादहर्षप्रतीहारः प्रविष्टः ॥ १३१ ॥ १३२) वाम – वामकरोपगृहीतवेत्रदण्डदक्षिणकरस्थगितमुखेन प्रभुहृदय-

---

1) = सर्वौषधिभिः. 2) = देवादितर्पण. 3) B मीसिज्जाइ. 4) = तद्देशकालज्ञैः, J तद्देयस°. 5) = भोक्तुं, B भुत्तो. 6) B सरसं. 7) P °णुरुत्वं च, J °णुरूयं च, B °णुऊलं वा [?]. 8) P युग्मं (at the close of the verse, but preceding the number). 9) P परिवारिओ, JB परिया-लिओ. 10) P समुल्लीणो, J समल्लीणो, B समंली°. 11) B इत्तो for अंतो. 12) P विरईय, JB विरइय. 13) J [अत्थाणहरम्मि रइय°] °पल्लंके. 14) = सुहृद्भिः, [सुहिएहि]. 15) B omits this line. 16) = समुदं, B समयं; according to B this becomes the first line. 17) P सुह, JB सुह. 18) B जाव इक्क-परियाए for एक्कसरियाए. 19) B has an additional line, the second line of the verse, like this: ताव पइट्ठो सविसाय-हरिसिओ सुयणु परिहारो ॥ १३५ ॥. 20) B वामयरो°. 21) B शकलं. 22) [°भूमिवस्त्रतिल°] 23) B भुक्ताः.

देव दिसा-विजयाओ सेणाहिवई केणं[1] वि कज्जेण ।
जर-कप्पड-णेवच्छो[2] विजयाणंदो दुवारम्मि ॥ १३३
तो तं सहस त्ति णिसामिऊण सविसाय-[3]विम्हिय-मणेण ।
भणियं अमच्च-मुह-पेसियच्छिणा पुहइ-णाहेण ॥ १३४
हंहो भट्ट-कुमारिल णिसुयं [4]जं वेत्तिएण[5] संलत्तं[6] ।
ता किं विजयाणंदो एयावत्थंतरं पत्तो ॥ १३५
णीसेस-णीइ-सत्थत्थ-वत्थु-वित्थार-वित्थय[7]-मई वि ।
असहाओ ववगय-वाहणो [8]य कहमागओ [9]एत्थ ॥ १३६
ण[10] य भिच्चा णेह करी ण य तुरया णेय पोट्टिसो मंती ।
विजयाणंदस्स कहं कह जाया एरिसावत्था ॥ १३६*१
भणियं भट्ट-कुमारिलेण[11] देव[12] विसमा जयम्मि [13]कज्ज-गई ।
मण्णे तहावि एसो केण वि कज्जेण संपत्तो ॥ १३७
किं जहा[14] ।
परिवड्ढिय-पहु-संभावणाण एवंविहे महाकज्जे ।
[15]असमत्त-पेसणाणं[16] मरणं चिय[17] सहइ[18] पुरिसाण ॥ १३८

भायकुशलेन द्वारपालेन विज्ञप्तः । वामहस्तेन दण्डं धृत्वा दक्षिणहस्तेन मुखमावृत्य
च वेत्रिणा राजा विज्ञापयांचक्रे ॥ १३२ ॥ १३३) देव – देव दिग्विजयात्तु सेना-
पतिर्विजयानन्दः केनापि कार्येण जरत्कर्पटनेपथ्यो[19] जीर्णवस्त्रपरिधानो द्वारे वर्तते
॥ १३३ ॥ १३४) तो तं – ततस्तत् सहस त्ति णिसामिऊण प्रतर्कितमेव इति निशम्य
श्रुत्वा सविषादविस्मितमनसा अमात्यमुखप्रेषिताक्षेण पृथिवीनाथेन भणितम् ॥ १३४ ॥
१३५) हंहो भट्ट – हंहो इति सहसा साश्चर्यभाषणे । भट्टकुमारिल श्रुतं तद्वेत्रिणा
यच्छिष्टं[20] कथितम् । तत्किम् । किमिति विजयानन्द एतावदवस्थां प्राप्तः ॥ १३५ ॥
१३६) णीसेस – निःशेषनीतिशास्त्रार्थवस्तुविस्तारमतिरपि असहाय एको व्यपगत-
वाहनः पादचारी कथमत्रागतः ॥ १३६ ॥ १३६*१) ण य – [न च भृत्याः नेह
करी न च तुरगाः नैव पोट्टिसो मन्त्री । विजयानन्दस्य कथं कथं जाता ईदृशावस्था]
॥ १३६*१ ॥ १३७) भणियं – भणितं कुमारिलेन नरपते विषमा जगति कार्य-
गतिः । मन्ये तथापि [21]केनापि कार्येण संप्राप्तः ॥ १३७ ॥ [किं यथा ।] १३८)
परिवड्ढिय – परिवर्धितप्रभुसंभावनानाम् एवंविधे महाकार्ये असमाप्तप्रेषणानाम् असिद्ध-

1) P केणा°, J केण, B किणा°. 2) B णेवत्थो. 3) B विंभिय 4) B तं. 5) = वेत्रिकेण. 6) B जं सिट्ठं for संलत्तं. 7) P विच्छिय, J विस्थय, B विस्थर 8) B वि. 9) B इत्थं. 10) This verse is found only in P, but not in JB, the actual readings of P are न य, नेह, न य and नेय in the first line and एरसा in the second. 11) [कुमारेण]. 12) B omits देव. 13) B कज्जागई. 14) B omits किं जहा. 15) = असमाप्त. 16) = यस्मिन्कार्ये प्रेषिता, P पेसणाण. 17) P विय, JB चिय. 18) J सुहइ. 19) B °नैपथ्यो. 20) B यत्सृष्टं. 21) B केण.

ता जइ [1]कहावि एसो सिंहल-रायाहि[2] परिहवं पत्तो ।
ता एत्थ तुम्ह [3]दारे णूणं [4]णल्लियइ जीयंतो ॥ १३९
अह सो च्चिय[5] जोइक्खो[6] णिय-[7]कज्ज-गईए किं वियारेण ।
आणेह मा विलंबह दीसउ[8] ता से मुह-च्छाया ॥ १४०
तो तक्खण-रायाणत्त-दारवालाणुमग्ग-संलग्गो । 5
[9]सच्चविओ [10]कु-घडंतुत्तमंग-कमलो णरिंदेण ॥ १४१
[11]समइच्छिऊण सुंदरि[12] आणत्तं से सुहासणं पहुणा ।
उवविट्ठो[13] भट्ट-कुमारिलस्स पय-पेसियच्छि-जुओ ॥ १४२
अह तत्थ सुहासण-[14]कय-परिग्गहो [15]णिज्जणं विहेऊण ।
[16]खण-मेत्त-[17]समासत्थो [18]सच्छरियं पुच्छिओ पहुणा ॥ १४३ 10

कार्याणां पुरुषाणां मरणमेव सहइ शोभते । [19]एवं संभावनया प्रहितस्यासिद्धकार्यस्य पुंसः नगरागमनान्मृत्युरेव श्रेयान् । उक्तं च श्रीचक्रपाणिविजयमहाकाव्ये ।

यः स्वामिसंभावितकार्यसिद्धिरसिद्धकार्योऽपि विहस्य पृष्टः ।
अधोमुखोऽनुत्तरदानमूढः स चेज्जनो जीवति को विपन्नः ॥

इति ॥ १३८ ॥ **१३९) ता जइ**—तद्यदि कदाचित् सिंहलेशादेष परिभवं प्राप्तः 15 तदात्र युष्माकं द्वारं नूनं निश्चितं जीवन् नल्लियइ नोपसर्पति । ['उपसर्पेरल्लिअः' हैम० ८-४-१३९, इति] सूत्रात् ॥ १३९ ॥ **१४०) अह सो**—अथ अथवा किं विचारेण विमर्शेन निजकार्यगतौ[20] निजस्वरूपज्ञापने[21] स चैव ज्योतिष्को दीपः । तमानयत[22] मा विलम्बध्वं दृश्यते तावत्तस्य मुखच्छाया वदनशोभा । कुमारिलवचनान्नरपतिना भावयित्वा निजहृदय आदेशो दत्तः । द्वारपाल [तं] शीघ्रं प्रवेशय [इति] 20 ॥ १४० ॥ **१४१) तो तक्खण**—तत्क्षणतो राज्ञाज्ञप्तद्वारपालानुमार्गसंलग्नो नरेन्द्रेण सच्चविओ दृष्टः । किंविशिष्टः । कुघडंत इति कुः पृथ्वी तस्यां घटमानम् उत्तमाङ्गकमलं शिरःपद्मं यस्येति भूमिमिलन्मस्तक इत्यर्थः ॥ १४१ ॥ **१४२) समइच्छिऊण**—हे सुन्दरि सावित्रि प्रभुणा राज्ञा आलिंग्य से तस्य सुखासनं भद्रासनादि आज्ञप्तम् आदिष्टम् । भट्टकुमारिलस्य पदप्रेपिताक्षियुग उपविष्टः । राजसमक्षमपरत्र नम- 25 स्कृतावनधिकार इति । पददत्तदृष्टिः दृष्टनमस्कृत इति भावः ॥ १४२ ॥ **१४३) अह तत्थ**—अथ तत्र सुखासनकृतपरिग्रहो निर्जनमेकान्तं विधाय कृत्वा क्षणमात्रसमासीनो विजयानन्दः प्रभुणा साश्चर्यं पृष्टः । अच्छरियं इति 'अतो रियाररिज्जरीयम्' [हैम०

1) B कज्जावि [=कयाइ]. 2) P puts No. 5 on हि. 3) B दारं. 4) = न लीयते । न श्लिष्यति. 5) = स एव. 6) = दीप. 7) P कज्जगईए किं, J कज्जगईहि कं, B कज्जागइइ किं. 8) B 30 दीसइ. 9) = विलोकितः. 10) P कुप्पडंतु°, J कुवडंतु°, B कुघडत्तु°. 11) = सस्पृश्य. 12) P सुंदरि. J सुदरि, B सुदूरि. 13) B उवइट्ठो. 14) B किय. 15) = निर्जनं विधाय. 16) = क्षणमात्रसमाश्वस्तः, P खणमेत्त, J खणमित्त, B खणमत्त. 17) B समासीणो. 18) = सत् आश्चर्यं (=साश्चर्यं). 19) B त्रव. 20) B °गतो. 21) B ज्ञापत्तो. 22) B तस्मानियतः.

हंहो तुह विजयाणंद एत्थ [1]एवंविहं समागमणं ।
णीसेस-जुत्ति-रहियं [2]अहियं [3]हिययं म्ह दूमेइ ॥ १४४

तो [4]अणुयंपाणुगयं वयणं णिय-सामिणो सुणेऊण ।
परिओस-वस-विसट्टंत-लोयणं तेण विण्णत्तं ॥ १४५

देव महंती [5]खु कहा एसा सुमणोरहाणं संभूई ।
कोऊहलेण सीसइ अवहिय-हियया णिसामेह ॥ १४६

मलयायलाहिवे वसिकयम्मि [7]समियम्मि [8]पंडि-रायम्मि ।
पारद्धे रयणायर-पर-[9]पारुत्तार-[10]परियम्मे ॥ १४७

भणियं अमच्च-सिरि-पोट्टिसेण मा [11]ता करेह परियम्मं ।
सहस त्ति दंड-सज्झो ण होइ अम्हं सिलामेहो ॥ १४८

सामण्णो वि ण तीरइ दुग्गत्थो [12]जोहिउं पर-भडेहिं ।
सो [13]उण विहि[14]-संपुण्णो सूरो चाई सुभिच्चो य ॥ १४९

८-२-६७] इति रियः ॥ १४३ ॥ १४४) **हंहो तुह**—हंहो विजयानन्द तव एवंविधमत्र समागमनम् । निःशेषयुक्तिरहितमधिकमस्माकं हृदयं दुनोति । 'दूडो दूमः' [हेम० ८-४-२३] इति दूमेइ ॥ १४४ ॥ १४५) **तो अणुयंपा**—ततोऽनुकम्पानुगतं करुणासारं वचनं निजस्वामिनो निशम्य परितोषवशविकसल्लोचनं तेन विज्ञप्तम् । 'विकसेः कोआसविसट्टौ' [हेम० ८-४-१९५] इति विसट्टंत ॥ १४५ ॥ १४६) **देव महंती**—देव । खु निश्चये [हेम० ८-२-१९८] । स्वमनोरथानां संभूतिरुत्पत्तिः एषा महती कथा कौतूहलेन कुतुकेन शिष्यते निगद्यते । अवहितहृदयाः सावधानमानसाः निशाम्यत आकर्णयत ॥ १४६ ॥ तामेवाह[15] । १४७) **मलया**—मलयाचलाधिपे वशीकृते स्वात्मसात्कृते निहते च पाण्ड्यराजनि पाण्ड्यदेशाधिपे प्रारब्धे रत्नाकरपरपारोत्तरणकर्मणि ॥ १४७ ॥ किमित्याह । १४८) **भणियं**—भणितममात्यश्रीपोट्टिसेन । मा तावत्कुरुत परिकर्म प्रारम्भम् । यतः शिलामेघः सिंहलद्वीपाधिपोऽस्माकं सहसा दण्डसाध्यो न भवति ॥ १४८ ॥ १४९) **सामण्णो**—सामान्योऽपि एकग्रामाधिपतिरपि दुर्गस्थः कृतदुर्गपरिग्रहः प्रतिभटैः शत्रुभिः योधितुं न शक्यते । स पुनः शिलामेघस्त्रिभिः संपूर्णः । किं तत् त्रिकमित्याह । शूरः संग्रामधीरः, त्यागी दान-

---

1) P एवंविह, JB एवंविहं. 2) B हिययं अम्हाणं दूमेइ for अहियं etc. 3) P हिययम्ह. 4) = अनुकंपानुगत, B अणुकंपा°. 5) = निश्चये, J महाइक्खु. 6) J सुमणोहराण. 7) P समयंमि, J समियम्मि, B णिहियंमि. 8) PB पंडु°, J पंडि°. 9) B पारुत्तरणपरि°. 10) = परिकर्म 11) B मं तं for मा ता. 12) J जोहिउ. 13) J सोऊण. 14) B सुप्पुण तिहि for सो etc. 15) B puts this phrase at the beginning of the commentary on the next verse.

जुत्तिण्णुओ [2]सहम्मो [3]अहिएहिँ अलंघिओ महा-माणी ।
मंतुच्छाह-पहाणो [4]दुक्खं जोहिज्जइ परेहिं ॥ १५०
[5]णय-विक्कमोवहोज्जा [6]सव्वाण वि पत्थिवाण एस [7]मही ।
ण उणेक्क-विक्कम-रसा हवंति सिरि-[8]भाइणो पुरिसा ॥ १५१
ता साम-णए संते [9]संते [10]पुरिसाण [11]भेय-विण्णाणे ।
दाणे [12]वि [13]संपडंते को दंडे आयरं कुणइ ॥ १५२
जं जह [14]कमेण भणियं [15]पुव्वायरिएहिँ [16]अत्थ-सत्थेहिं ।
तं तह [17]पडिवज्जंता सिरीए पुरिसा वरिज्जंति ॥ १५३
ता पेसिज्जउ दूओ [18]सामेकालाव-मुहल-[19]पत्तट्ठो ।
[20]पर-हियय-भाव-कुसलो [21]दच्छो [22]कालण्णुओ धीरो ॥ १५४

वीरः, सुभृत्ययुक्तः सत्यपरिवारश्चेति ॥ १४९ ॥ १५०) जुत्तिण्णुओ – युक्तिज्ञः उपायनिपुणः । सधर्मः धर्मो जयति नाधर्म इत्यायतिवलवान् । अहितैः शत्रुभिरलंघितः । महामानी परोत्सेकमसहिष्णुः । मन्त्रोत्साहप्रधानः शक्तित्रयपरिकलितः इत्यर्थः । ईदृशश्च परैर्वैरिभिः दुःखं कष्टेन योध्यते अभिभूयते ॥ १५० ॥ १५१) णय – सर्वेषामपि पार्थिवानां नरेन्द्राणाम् एषा मही नयविक्रमोपभोग्या । नयश्च न्यायो विक्रमः शौर्यता ताभ्यां भोक्तुं शक्या । न पुनरेकविक्रमरसाः पुरुषाः श्रीभाजनं भवन्ति ॥१५१॥ १५२) ता साम – तस्मात् सामनये तथा भेदविज्ञाने विद्यमाने दाने च संपद्यमाने को नाम सुविचारः पुमान् दण्डे चतुर्थोपाये आदरं कुरुते ॥ १५२ ॥ १५३) जं जह – यद्यथा क्रमेण भणितं पूर्वाचार्यैरर्थशास्त्रे तत्तथा प्रतिपद्यमाना आद्रियमाणाः पुरुषाः श्रिया व्रियन्ते । यदुक्तं नीतिशास्त्रे ।

आदौ साम प्रयोक्तव्यं ततो दानं समाचरेत् ।
भेदं वा साधयेत्प्राज्ञः पश्चाद्दण्डमपि श्रयेत् ॥

अन्यच्च ।

उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ।
नीचमल्पप्रदानेन समं तुल्यपराक्रमैः ॥

इत्यादि ॥ १५३ ॥ १५४) ता पेसिज्जउ – तस्मात् प्रेष्यतां दूतः सामैकालापमुखरप्रासार्थः । परहृदयभावकुशलो मनोगतभावज्ञो दक्षः प्रबलो वेदग्ध्यवांश्च कालज्ञः प्रस्ता-

1) = युक्तिज्ञो, P जुत्तिन्नुओ, J जुत्तिणुओ, B जुत्तिणउ. 2) = सधर्म्मः, J सहमो. 3) = अहितैः. 4) P दुक्ख, JB दुक्खं. 5) = नयविक्रमोपभोग्या, J णवियक्कमो°. 6) P सव्वाणं च, JB सव्वाण वि. 7) B विही. 8) P भाइणो, J भायणो, B भावणं [=भायणं]. 9) B omits one संते. 10) B पुरुसाणं तह भेय°. 11) = भेदविज्ञाने. 12) B य. 13) = संपद्यमाने. 14) PB कामेण, J कमेण. 15) = पूर्वाचार्यैः. 16) = अर्थशास्त्रैः, P अत्थसत्थेहिं, J सत्थअत्थेहिं, B अत्थसत्थम्मि. 17) B पडियज्जंता. 18) = सामैकालापमुखरप्रासार्थः. 19) = कुशल. 20) P परहियय, J परिहि°, B परिहरियय. 21) B दक्खो. 22) = कालज्ञो.

जइ सो तेणं चिय उ[1]वणमेइ ता साह[2] किं पयासेण[3] ।
वायाए जो विवज्जइ विसेण किं तस्स दिण्णेण ॥ १५५
णिसुयं[4] मए वि जह तस्स सयल[5]-जिय-लोय-सार-संभूया ।
लीलावइ त्ति णामेण पिय-सुया [6]जीवियब्भहिया ॥ १५६
तिस्सा सुजम्म-दियहे केण वि असरीरियाए[7] वायाए ।
देवेणं[8] समाइट्ठं सिट्ठं देवण्णुएहिं[9] पि ॥ १५७
जह जो इमीए वर-बालियाए होही वरो त्ति वर-समए ।
सो सयल-पुहइ-णाहो लहिही[10] दिव्वाउ[11] सिद्धीओ ॥ १५८
[12]ता जइ कहावि सो अम्ह सामिणो तं कुमारिया-रयणं ।
उवणेइ ता ण सिद्धं किं वा एत्थ म्ह पुहवीए[13] ॥ १५९
अण्णं च एत्थ एवं-विहाण रयणाण भायणो[14] म्ह पहू ।
इय जाणिऊण सामं तेण समं वहु-मयं अम्ह ॥ १६०
तं तह सोऊण मए अमच्च-सिरि-पोट्टिसाहिं[15] णीसेसं ।
भणियं अलं म्ह[16] दूएण ता सयं चेयं[17] वच्चामो ॥ १६१

वौचित्यवेदी धीरो धैर्ययुक्तः । एवं परदर्शितविभीषिकाभिरव्याकुलः एवंविधो दूतः प्रहीयतामिति ॥ १५४ ॥ १५५) जइ सो – यदि स शिलामेघनृपस्तेनैव दूतेन [18]उपनतिस्तामेति आज्ञां मन्यते इति । तस्मात् शाधि कथय किं प्रयासेन सैन्यसंवाहनसंग्रामारम्भादिकेन । अमृतेन यो विपद्यते तस्य विषेण दत्तेन किम् । तथा यः साम्ना साध्यते किमर्थं तत्र दण्डादि प्रयुज्यते । अमृतेन वा पाठान्तरे वायाए इति वाचा ॥ १५५ ॥ १५६) णिसुयं – श्रुतं च मया यथा तस्य सकलजीवलोकसारसंभूता नाम्ना लीलावती जीविताभ्यधिका प्रियसुता । अस्तीति शेषः ॥१५६॥ १५७) तिस्सा – तस्याः सुजन्मदिवसे केनापि देवेन अशारीरिकया वाचा देववाचा दैवज्ञैः ज्यौतिषिकैश्च शिष्टं समादिष्टम् । देवेनाशिष्टं च कथितं ज्यौतिषिकैः ॥ १५७ ॥ किमादिष्टमित्याह । १५८) जह जो – यथा योऽस्याः वरबालिकायाः प्रधानाङ्गनायाः वरसमये पाणिग्रहणावसरे वरो भविष्यति । स सकलपृथ्वीनाथो दिव्याः सिद्धीः लप्स्यते ॥१५८॥ १५९) ता जइ – तद्यदि कदाचिदेवोऽस्मत्स्वामिनस्तत्कुमारिकारत्नम् उपनयति ढौकयति तदा पृथिव्यामस्माकं किं न सिद्धम् ॥ १५९ ॥ १६०) अण्णं च – अन्यच्चात्र भूपीठेऽस्मत्प्रभुरेवंविधानां [रत्नानां] भाजनम् इति ज्ञात्वा तेन शिलामेघेन समं सहास्माकं साम बहुमतम् । प्रथमोपायोऽभ्युपगतः ॥ १६० ॥ १६१) तं तह – तत्तथा अमात्य-

---

1) =उपनमति. 2) B सहि [=साहि] 3) J पियासेण. 4) B णिसुयं च मए जह तस्स सयलजिय°. 5) =सकलजीवलोकसारसंभूता. 6) =जीविताभ्यधिका. 7) J असरिरियाए. 8) P देवेण, J देव्वेण, B दिव्वेण. 9) =दैवज्ञैरपि, B दिव्वण्णु°. 10) B लहिहइ. 11) B सव्वाउ. 12) B तो जइ कया वि एस म्ह. 13) J पुहइए. 14) B भायग म्ह [=°णं म्ह] 15) P puts No. 5 on हि 16) PJB अलम्ह. 17) P चेय वच्चामो, J सेय वच्चामो, B किं न वच्चम्ह. 18) B उपनमितिस्तमेति.

सो जेण मज्झ दंसण-सिणेह-संभावणा-परिग्गहिओ ।
देइ[1] च्चिय मह पहुणो तं णियय[2]-कुमारिया-रयणं ॥ १६२
भणियं पुणो वि सिरि-पोट्टिसेण एवं-विहम्मि कज्जम्मि ।
ण विरुज्झइ तुह[3] गमणं सिंघल[4]-दीवाहिवाहुत्तं[5] ॥ १६३
अह एवं वहुसो मंतिऊण गोसम्मि[6] णियय-कडयाओ ।
संचलिओ परमेसर परिमिय-परिवार-[7]परियरिओ ॥ १६४
तो तं सिरि-कुल-भवणं महुमह-वासं दिसा-वहू-णिलयं ।
[8]भुवण-परिहा-णिवद्धं व सायरं झत्ति संपत्तो ॥ १६५
पडिछंदं[9] पिव गयणंगणस्स वसुहावरोह[10]-सिचयं व ।
रिद्धिं[11] व महा-पलयस्स जम्म-भूमिं [12]व भुवणाण[13] ॥ १६६
[14]दट्ठुं तमंबुरासिं णरवइ परिचिंतियं हि[15] हियएण ।
दुक्खुत्तारो एसो जह भणिओ पोट्टिसेण म्ह ॥ १६७
दीसइ पडु-पवणुग्गय[16]-पडिरव-पडिपुण्ण-दस-दिसा-यक्को ।
हल्लंतुवेल्ल[17]-महल्ल-लहरि-माला-उल्लोल्लोलो[18] ॥ १६८

श्रीपोट्टिसान्निःशेषं श्रुत्वा मया भणितम् । अलमस्माकं दूतप्रेषणेन । स्वयमात्मनैव किं न व्रजामि इति ॥ १६१ ॥ १६२) **सो जेण** – स येन कारणेन मम दर्शनस्नेहसंभावनापरिगृहीतः सन्मम प्रभोर्निजकुमारिकारत्नं तद्ददात्येव । दर्शनानुगृहीतो दाक्षिण्यात् स्वकन्यां दास्यत्येव इत्यर्थः ॥ १६२ ॥ १६३) **भणियं** – भणितं च पुनः श्रीपुट्टिसेन एवंविधे कार्ये सिंहलद्वीपाधिपं प्रति तव गमनं [न] विरुध्यते[19] । स्वामिकार्ये साहसिकं कर्म कुर्वाणानां युक्तमेव सुभृत्यानामित्यर्थः । आहुत्तं प्रति-अर्थे ॥ १६३ ॥ १६४) **अह एवं** – अथैवं बहुशोऽनेकवारं मन्त्रयित्वा गोसम्मि प्रभाते निजकटकात् । हे परमेश्वर राजनाम परिमितपरिवारपरिकरितः अल्पपरिच्छेदः संचलितः प्रस्थितः ॥ १६४ ॥ १६५) **तो तं** – ततस्तं श्रीकुलभवनं लक्ष्मीकुलगृहं मधुमथनिवासं नारायणवसतिं दिग्वधूनिलयं दिङ्नायिकाश्रयम् । भुवनपरिखानिबद्धं भुवनमेव परिखा खातिका तया बद्धं वेष्टितं सागरं समुद्रं झत्ति शीघ्रं संप्राप्तः ॥ १६५ ॥ १६६–१६७) **पडिछंदं** – प्रतिच्छन्दं प्रतिबिम्बमिव गगनाङ्गणस्य । वसुधावरोधसिचयमिव पृथिवीश्रोणितटवस्त्रमिव । ऋद्धिमिव महाप्रलयस्य । प्रलयकालसमृद्धिस्तमोरूपा संहाररूपत्वात् । समुद्रस्यापि कृष्णत्वादित्थमुत्प्रेक्षा । जन्मभूमिमिव भुवनानाम् ॥ [**दट्ठुं** –] दृष्ट्वा तमम्बुराशिं

---

1) =ददात्येव. 2) B णिययं. 3) P तुय, JB तुह. 4) PB सिंहल, J सिंघल. 5) =आहुत्तं । अभिमुखं. 6) =प्रभाते. 7) =परिकरितः. 8) =भुवनान्येव परिखा. 9) J पडिच्छंदं. 10) = पृथ्वीनितंबसिचयमिव. 11) P रिद्धि व, J रिद्धिं च, B रिद्धि व्व. 12) P भूमि च, JB भूमिव्व. 13) P भुयणाण, B रयणाण. 14) =दृष्ट्वा. 15) PJ परिचिंतियम्हि, B परिचिंतयम्हि. 16) B पणुद्दय. 17) =चलंतउद्वेलमहांतमालाकुलेन उल्लोलः, J हल्लंतुवेल्ल. 18) J उलोलो. 19) B विरुध्यातां.

णिंत[1]च्छरो वि रामाणुलंघिओ णिव्विसो वि विसमइ[2]ओ ।
करि-तुरय-वज्जिओ वि हु पडिरक्खिय-महिहरु[3]ग्घाओ ॥ १६९
असुरो वि सया मत्तो मत्तो वि [4]अमुक्क-णियय-मज्जाओ ।
[5]मज्जाय-संठिओ वि हु विरसो वि[6] सवाणिओ च्चेव[7] ॥ १७०
साहेइ जम्मि[8] अज्ज वि पयडो [9]पवय-वइ-[10]साहसुप्फालो ।
महि-[11]मंडलग्ग-हत्थो व्व राम-चरियाइँ से[12]उ-वहो ॥ १७१
दीसंति सिरि-[13]सुवास-हर-रइय-कुसुमोवयार-सारिच्छा ।
वेला-वण-वीइ[14]-वि[15]इण्ण-रयण-घडिया [16]तडुच्छंगा ॥ १७२

नरपते[17] चिन्तितं हृदयेन । एष समुद्रो दुःखोत्तारोऽस्माकं [यथा] भणितः पोट्टिसेनेति । युग्मम्[18] ॥ १६६–६७ ॥ १६८–७०) दीसइ – समुद्रो दृश्यते इति संबन्धः । विशेषणान्याह । पटुपवनोद्धतप्रतिरवप्रतिपूर्णदशदिक्चक्रः । हलंत कम्पमान उव्वेल्ल प्रसरणशील महालहरीमालाकुलोलोलः । महल्लादिशब्दा महत्त्ववाचका बाहुल्यात् ज्ञेयाः । उल्लोलश्चञ्चलः ॥ [णिंत –] निर्गच्छदप्सरा अपि रामानुलङ्घित इति विरुद्धम् । प्रथमपक्षे रामाः स्त्रियः ताभिरनुलङ्घितः इति । अथ च निर्गता अप्सरसो रम्भादयो यस्मात्, रामेण दाशरथिना अनुलङ्घितः आक्रमितः । निर्विषोऽपि विषमय इति विरुद्धम् । अथ च कालकूटनिर्गमाद्विषरहितः, विषं च पानीयं तन्मयः । करितुरगवर्जितोऽपि परिरक्षितमहीधरोद्घातः । करी हस्ती एरावणनामा । तुरगो अश्वः उच्चैःश्रवाभिधः । महीधरा नरेन्द्राः पर्वताश्च ॥ [असुरो –] असुरोऽपि सदा मत्तः । न विद्यते सुरा मदिरा यत्र, मथनावसरे निर्गमात् । अथवा अ विष्णुः स एव सुरो देवो यत्रेति । मत्त इव मत्तोऽपारसंभृतित्वादुन्मत्त इव । मत्तोऽपि अमुक्तनिजकमर्यादः । सुरादिमत्तो विमर्यादः न गण्यः इति १ मर्यादासंस्थितोऽपि विरसोऽपि सवाणिज्यकः इति विरुद्धम् । विरसस्य दुष्करं वणिक्कर्म । अथ च विगतो [19]रसपट्टो यत्रेति सपानीयश्चेति । विरुद्धालङ्कारेण [20]समुद्रस्तुतिः ॥ १६८–७० ॥ १७१) साहेइ – यत्र महीमण्डलाग्रहस्त इव प्लवगपतिसाहसकथकः सुग्रीववीरकर्मप्रतिपादकः प्रकटः सेतुपथः सेतुर्वा अद्यापि रामचरितानि साहइ इति कथयति । 'कथेर्वज्जरपज्जरोप्पालपिसुणसंघबोल्लचवजंपसीससाहाः' [हैम० ८-४-२] इति उप्पालः साहश्च आदेशौ ॥ १७१ ॥ १७२) दीसंति – यत्र वेलावनवीचिविकीर्णरत्नघटितास्तटोत्संगाः श्रीसुवासगृहरचितकुसुमोपचारसदृक्षाः दृश्यन्ते । तरलतरङ्गास्तीरविक्षिप्तरत्नपुञ्जाः लक्ष्मीवासभवने पुष्पप्रकारा इवो-

---

1) = निर्यदप्सरोपि. 2) P विसमईओ. 3) = उद्घातः. 4) P वि ण मुक्क, J वि असुक्क, B वि यमुक्क. 5) P मज्जायथु वि विरसो विरसो वि, JB मज्जायसंठिओ वि हु विरसो. 6) J अ. 7) P चेव, JB चेव. 8) = यस्मिन्. 9) = सुग्रीवसाहसकथकः, P पवयवई, J पवयवइ. 10) B साहसुप्फलो. 11) J मंडलग्गिहत्थो. 12) PB सेयवहो, J सेउवहो. 13) J सवास. 14) J वीई. 15) = वीचिविक्षिप्त. 16) P तंडुच्छंगा, J 'दु' for डु, B तडु'. 17) B नरपति. 18) B युग्मं is put at the close of the gāthās Nos. 166–67. 19) B रसपडो. 20) B समुद्रश्रुति.

अज्ज वि तड-वियसिय[1]-सुरहि-कुसुम-संदोह-वासियासेहिं[2] ।
वारुणि-विणिग्गमो केसरेहिँ[3] साहिज्जए जँम्मि[4] ॥ १७३
लक्खिज्जइ अज्ज वि[5] गुंजिरालि-उल-वलय-वाउल-लँयाहिं[6] ।
मँहणुत्तिण्णेरावण-मग्गो[7] सत्तच्छय-तरूहिं ॥ १७४
सेविज्जइ सँरसोहंस[8]-कँणइ[9]-भवणेसु सिद्ध[10]-मिहुणेहिं ।
जम्मि लवंगेला-वण-परिमल-परिवासिओ पवणो ॥ १७५
तत्थ सुरासुर-सिर-मउड-कोडि-[11]परिहट्ट-पाँय[12]-वीढंकं ।
रामेसरं णँमेऊण[13] जाण-वत्तं समारूढो ॥ १७६
अकुलीणे वि सुँयम्मे[14] चलण-विहूणे वि दच्छ-पँय[15]-गमणे ।
वहु-गुणमए वि लहुए णीर-प्पणए वि वहु-संगे ॥ १७७
तो परिमिय-परिवारो आरूढो एँरिसम्मि[16] वोहित्थे[17] ।
जा लंघिमो ण उँयहिं[18] ता णरवइ एँक्कसरियाए[19] ॥ १७८

त्प्रेक्षते ॥ १७२ ॥ १७३) अज्ज वि – अद्यापि यत्र विकसितसुरभिकुसुमसंदोहवासिताशैः केसरैः बकुलैः वारुणीविनिर्गमो मदिरानिःसारणं कथ्यते इत्युत्प्रेक्षा ॥ १७३ ॥ १७४) लक्खिज्जइ – अद्यापि गुञ्जनशीलालिकुलवलयव्याकुललतैः सप्तच्छदतरुभिः सप्तपर्णवृक्षैः मथनोत्तीर्णैरावणमार्गो लक्ष्यते प्रकाश्यते । सप्तच्छदपरिमलस्य हि गजदानसमानत्वात् ॥ १७४ ॥ १७५) सेविज्जइ – यत्र सरसोहंसकँणइ[20]भवणेसु नव्यश्रीखण्डलतागृहेषु सिद्धमिथुनैः दिव्यैंदम्पतीभिः[21] लवङ्गेलावनपरिमलपरिवासितः पवनः सेव्यते ॥ १७५ ॥ १७६) तत्थ – तत्र सुरासुरश्रीमुकुटकोटि[परि]घृष्टपादपीठाङ्कं रामेश्वरं नत्वा तीर्थं प्रणम्य यानपात्रं प्रवहणं समारूढः ॥ १७६ ॥ १७७-७८) अकुलीणे – ततः परिमितपरिवारः ईदृशे वोहित्थे यानपात्रे आरूढः । [22]कीदृश इत्याह । अकुलीनेऽपि सुकर्मणि । योऽकुलीनः कुलरहितः स कथं सुकर्मा शोभनकृत्यकारीति विरोधः । अथ च कौ पृथिव्यां न लीनो नीरमध्यगामित्वात्, सुचर्मणि शोभनचर्मावनद्धे । अन्यच्च । यश्चरणविहीनः स कथं दक्षपादगमनः । अथ च चरणविहीनः पवनचारित्वात्, दक्षं यथा भवति पयोगामी च । तथा बहुगुणमयः परितो यः स कथं लघुको जनामान्यः । अथ च बहवो गुणा रज्जवो बन्धनानि तैर्निर्वृत्तः । लघुगः शीघ्रगामी । निर्गतप्रणयोऽपि निःस्नेहोऽपि कथं बहुसंगो बहुप्रीणकः । अथ च नीरप्रणये जलमये बहुजीवसंगे ।

---

1) = विस्तारित. 2) = आशा. 3) = बकुलैः. 4) P जम्हि, JB जम्मि. 5) B वि उंजिरालि. 6) = व्याकुलशाखाभिः. 7) = मथनोत्तीर्णऐरावणमार्गः. 8) = चंदनलताभुवनेषु. 9) B कणय. 10) J सिद्धि. 11) P °हट्ट, J °हट्ट, B °हिट्ट. 12) = परिघृष्टपादपीठाङ्कं. 13) PJ नमे°, B not readable. 14) = सुकर्म्मे, B reads some of the adjectives in the Nom. sing.: सुयम्मो, विहूणो and गमणो. 15) = पदं, द्वि० पानीयं. 16) = ईदृशे. 17) = प्रवहणे, J वोहित्थे. 18) PB उमही, J उयहीं. 19) = एकदा. 20) B °कनकभवनेषु. 21) B दिवयंतीभि°. 22) B कीदृशः.

उम्मूलंतो [1]थल-तरु-वणाइँ आसा-मुहाइँ पूरंतो ।
संखोहंतो दीवंतराइँ [2]उद्धाइओ पवणो ॥ १७९
तो सो तुंगय[3]राणिल-संखोहिय-जल-पणुल्लणुल्ल[4]लिओ ।
पुव्वोवहिं[5] संपत्तो गोला-स[6]रि-संगमं पोओ ॥ १८०
तत्थ वि विसम-सिलायड-सं[7]चुण्णिय-संधि-बंधणो[8] सहसा ।
सय-खंड विसंघडिओ असमंजस-कज्ज-बंधो[9] व्व ॥ १८१
भिण्णम्मि तम्मि पोए सव्वेहिँ वि[10] जाण-[11]वत्तिएहिँ अहं ।
एक्क-फलए णिसण्णो गोला-मुह-दार[12]मुवणीओ ॥ १८२
तत्थ लवणंबु-णिब्भर-सोत्तुव्व[13]त्तंत-विम्हलंगेण[14] ।
ते जाण-वत्तिया [15]पुच्छिय [16]म्हि [17]साहेह को कत्थ ॥ १८३
सिट्ठं[18] च तेहिँ णरवइ अहो-मुहत्थं विसण्ण-वयणेहिं ।
तं[19] तुम्ह [20]परियणं भट्टउत्त कालेण [21]परिगिलियं ॥ १८४

प्रतियानपात्रेण यावदुदधिं न लङ्घयामस्तावन्नरपते । इक्कसरियाए समकालम् । 'इक्कसरियं झगिति संप्रति' [हेम० ८-२-२१३] इति सूत्रम् । [22]युगलकम् ॥ १७७-७८ ॥ किं जातमित्याह । १७९) **उम्मूलंतो** – तावता तटरुहवनान्युन्मूलयन्निव आशामुखानि दिग्वदनानि पूरयन् [द्वीपान्तराणि] संक्षोभयन् पवनो वायुरुद्धावितः प्रसृतः इति ॥ १७९ ॥ १८०) **तो सो** – ततः स पोतस्तुङ्गत[23]रानिलसंक्षोभितजलप्रेरितोल्वणोल्लसितः । गोलासरित्संगमे पूर्वोदधिं संप्राप्तः ॥ १८० ॥ १८१) **तत्थ वि** – तत्रापि विषमशिलात[24]लसंचूर्णितसंधिबन्धनः सहसा असमञ्जसकार्यबन्धः इव शतखण्डं विसंघटितः । प्राकृते बाहुल्यात् 'विंशत्यादेर्लुक्' [हेम० ८-१-२८] इति निर्देशात् पूर्वोदधिशतखण्डयोरनुस्वाराभावः ॥ १८१ ॥ १८२) **भिण्णम्मि** – भिन्ने च तस्मिन् पोते सर्वैरपि यान[25]पात्रिकैरेकफलके निषण्णोऽहं गोलामुखद्वारमुपनीतः समानीतः॥१८२॥ १८३) **तत्थ** – तत्र लवणाम्बुनिर्भरस्रोत[26]उद्वर्तनविह्वलाङ्गेन मया ते [27]यानपात्रिकाः पृष्टाः । कथयत कोऽत्र । जीवन् समागमः इति शेषः ॥ १८३ ॥ १८४) **सिट्ठं च** – नरपते स्वामिन् विषण्णवदनैस्तैर्यानपात्रिकैरधोमुखस्थं यथा भवति एवं शिष्टं कथितं च । कथमित्याह । स युष्मत्परिजनो भट्टपुत्र विजयानन्द कालेन दैवेन परिगिलितः ॥ १८४ ॥

---

1) J doubtful on वणाइं or वराइं, B वहुतरुवराइ for थल°. 2) = उद्धावितः, P उद्धाईउ. J उद्धाईओ, B उद्धाइउ. 3) P तुंगयरानिल, J तुंगयराणिल, B तुंगवराणिल. 4) = पणुलणं । प्रेरणं, P °णुलसिओ, J °णुल्ललिओ, B °णुल्हसिओ. 5) P पुव्वोयहि, JB पुव्वोवहि. 6) J सिरि. 7) B perhaps संचूरिय. 8) J चंधणो. 9) B वंधव्व. 10) J सि. 11) PB वत्तिएहि, J वित्तिएहिं. 12) = उपनीतः. 13) = उद्वर्त्तमान. 14) B विब्भलंगेण. 15) = पृष्टा मया. 16) B म्मि. 17) P साहेहि, JB साहेह. 18) = कथितं. 19) P तें, J तं, B सो. 20) B परियणो. 21) = कवलितं, B perhaps परिगिलिओ. 22) युगलकम् is written at the close of gāthās. 23) B °भरानिल. 24) B °तलसंपूरित. 25) B यानयात्रिकैः. 26) B श्रोत्रोद्वर्तन. 27) B यानपादक प्रिष्टः.

किं कीरइ हय-देव्वाहि जेण तुम्हं[1]-विहा वि सप्पुरिसा ।
पावंति अहम्म-जणोइयाइँ[2] वसणाइँ संसारे ॥ १८५
ता वच्च[3] सरीर[4]-धणाण होंति सुलहा पुणो वि [5]सविहवा ।
तं जह[6] झीणो वि ससी पावइ तं चेय[7] चिर-रिद्धिं[8] ॥ १८६
एवं णरणाह णिसामिऊण [9]तडि-वडण-दूसहं वयणं । 5
कह-कह वि मए मच्चू[10]-मुहाहि विणियत्तिओ अप्पा ॥ १८७
परिचिंतियं [11]हि णो ते सहाइणो[12] [13]णेय ईहियं कज्जं ।
ण य सो णिय-वेक्खेवो ण सामि-संभावणा ण जसो ॥ १८८
ण तहा पहाण-परियण-विणास-दुक्खं पि दूमए हिययं ।
जह हियय-समीहिय-कज्ज-णिप्फलो मह[14] समारंभो ॥ १८९[15] 10
पहु-पेसण-पत्तट्ठा[16] पारद्ध-णिरालसेक्क-णिव्वहणा ।
परितुलिय-[17]च्छूढ-भरा अण्णे[18] च्चिय के वि ते पुरिसा[19] ॥ १९०
अम्हारिसेहिँ कत्तो णय-पोरिस-वुद्धि-देव्व[20]-रहिएहिं ।
सिज्झंति महीवइणो एद्दह-मेत्ताइँ कज्जाइं ॥ १९१

इति ॥ ३३३ ॥ ३३४) जेणेसा – येन हेतुनैषापि महानुमती [16]यथेच्छं कनकाचलमनोहरेषु देशेषु प्रदेशेषु सखीजनेन समकं सार्धं रममाणा दिवसं न विरज्यते समग्रं दिनं क्रीडन्ती न विरमति । एषापि सुज्ञानापि [17]तद्बालस्वभावमेतदलङ्घ्यमित्यर्थः ॥ ३३४ ॥ ३३५) अण्णम्मि – अन्यस्मिन्निशाविरमे अनयाहं भणिता हे प्रियसखि अस्माकम् अदृष्टपूर्वो मलयाचलः तस्मात्तत्र किं न व्रजावः । 'द्विवचनस्य बहुवचनम्' [हैम० ८-३-१३०] इति वच्चम्ह ॥ ३३५ ॥ ३३६) चंदण – चन्दनतरुशिखरारूढमाधवीवरलताचलान्दोले तत्र सिद्धकुमारीभिः समं रन्त्वा समागमिष्यावः । स्वगृहमिति शेषः ॥ ३३६ ॥ ३३७) भणियं – भणितं च मया प्रियसखि इतः अलकापुरीसकाशात् अन्योऽपि कोऽपि बहुगुणमनोहरः अधिकगुणः उद्देशः प्रदेशः अस्ति । नास्तीत्यर्थः ॥ ३३७ ॥ ३३८) तद्दियसासण्ण – अहं भणामि । निजजन्मभूमेः हे सखि तद्दिवसोत्पन्नप्ररूढहृदयविश्रम्भवर्धितरसात् स्वर्गोऽपि लघुकः । देवलोकोऽप्यप्रमाणमित्यर्थः ॥ ३३८ ॥ ३३९–४०) तह वि – तथापि यदि जलनिधिजलभरितकन्दराभोगं लवलीलवङ्गैला[18]लतावनगहनमनोहरं मलयं मलयाचलं गन्तुं महसि आकांक्षसि ॥ [ता जा –] तस्मात् यावत् सूरः सूर्योऽपि सुरेशदिग्वध्वां पूर्वदिशि

---

1) B जहित्थं. 2) =सहि[=खि]काजनेन 3) =अपूर्वः. 4) P मलयाचलो, JB मलयायलो. 5) PB चंदणतरु, J चंदयणयरु. 6) PB °यलंदोले, J यरिंदोले. 7) P अन्नो कोवि, J अण्णो वि कोवि, B अस्रो[=ण्णो] वि कोवि. 8) B perhaps तद्दियहास°. 9) P वड्ढियरसीए, J वट्टिरसाए, B वड्ढियरसाउ. 10) P पलहुउ, JB लहुओ. 11) P जइ हसि, JB जइ महासि. 12) P कंदराभोयं, J कंदरोहोयं, B कंदराहोयं. 13) =तत् यावत् न, B जाव for जा ण 14) =पहुच्चइ. 15) J सच्चाइं. 16) B यथेत्थं. 17) B तवाल°. 18) B °लावनलतावन°.

तो तोरविय-विमाणाउ तक्खणं णिय-सही[1]-यणेण समं ।
संचलियाओ णहंगण-समीर-विहुयालयालीओ[2] ॥ ३४१
पत्ताओ णियय-परिणाह-भरिय-दक्खिण-दिसा-मुहाहोयं[3] ।
जल-णिहि-वेला-रयणोवयार-कय-परि[4]सरं मलयं ॥ ३४२
दिणयर-फुरिय-णियंबं सिहर-पहोलंत[5]-बहल-तम-धूमं ।
दहिऊण जयं पुंजइय संठियं पलय-जलणं व ॥ ३४३
चंदण-क[6]प्पूर-लवंग-संग-सिसिरेहिँ[7] णिज्झर-जले[8]हिं ।
[9]वडवाणल-पज्जलियस्स जलहिणो कुणइ [10]सेयं व ॥ ३४४
गुरु[11]-सिहरावडण-विसट्ट[12]-णिज्झर-प्पवह-सीयर-च्छाओ[13] ।
[14]सहइ सिलायल-संघाय-घोलिरो[15] तारया-णियरो ॥ ३४५
अंतो-रमंत-सुर-सिद्ध-मिहुण-मुहलेसु जत्थ [16]ण विसंति ।
पत्तल-लया-हरेसुं लज्जायंति व्व रवि-किरणा ॥ ३४६

रागम् अरुणत्वं नोद्वहति तावद्भावः येन सर्वाण्यपि रमितानि क्रीडितानि प्रभवन्ति परिपूर्णीभवन्ति। 'प्रभौ हुप्पो वा' [हेम० ८-४-६३] इति प्रपूर्व [17]पहुप्पंति । [18]युग्मम् ॥ ३३९-४० ॥ ३४१) तो तोरविय – ततस्त्वरितविमानाः नभोऽङ्गणसमीरवि[19]धुतालकालयः व्योमवातकम्पितकेशकलापाः तत्क्षणं निजसखीजनेन सार्धं संचलिताः । सखीति । [20]सही इति बहुवचनम् ॥ ३४१ ॥ ३४२) पत्ताओ – निजकपरिणाहभरितदक्षिणदिङ्मुखाभोगम् । जलनिधिवेलारत्नोपचारकृतपरिकरं समुद्रकल्लोलविक्षिप्तमणिभिः परितो वेष्टितं मलयं मलयाचलं प्राप्ताश्च ॥ ३४२ ॥ ३४३) दिणयर – तमेव मलयाचलं दिनकरस्फुरितनितम्बम् अत्युन्नतत्वान्मध्यभागस्थितसूर्यम् । शिखरघू[21]र्णमान बहलतमोधूमं सूर्यस्य मध्यभागवर्तित्वादुपरि गिरेरन्धकारं तदेव धूमतया कल्पितम् । तं कमिव । जगद्दग्ध्वा पुञ्जीभूय संस्थितं [22]प्रलयज्वलनमिव प्रलयकालानलमिव । मलयं प्राप्ता इति शेषः ॥ ३४३ ॥ ३४४) चंदण – यो मलयाचलः चन्दनलवङ्गकर्पूरसंगशिशिरेण निर्झरजलेन वडवानल[23]प्रज्वालितस्य जलनिधेः सेकं सेचनमिव करोति ॥ ३४४ ॥ यत्र [24]च । ३४५) गुरु – पृथुलशिलातलघूर्णनशीलतारकानिकरो नक्षत्रसमूहो गुरुशिखरापतनविसर्पन्निर्झरप्रवहशीकरच्छायः शोभते । उच्चैस्तरगिरिशिलातटवर्तिनः तारकाः यत्र निर्झरणोच्छलितजलकणा इव राजन्ते । 'घूर्णो घुलघोलघुम्मपहुल्लाः' [हैम० ८-४-११७] इति पहोलः ॥ ३४५ ॥ ३४६) अंतो – यत्रान्ता-

1) P सहि, B सही. 2) =अलकावलयः, P °लवालीओ, JB °लयालीओ. 3) =भोगं, P मुहीहोउं, J मुहा for मुही of P, B मुहाभोयं. 4) B परियरं. 5) =प्रसरत्. 6) B °णलवंगकप्पूरसं°. 7) B सिसिरेण. 8) B जलेण. 9) PB °वानल, J °वाणल. 10) =सेकमिव. 11) B has a phrase जत्थ य। at the beginning of this gātha. 12) P विसट्ठ, JB विसट्ट. 13) =अनुकार. 14) P सहइ, J सहय, B सोहइ पिहुलसिलायडपहोलिरो तारयानियरो । for सहइ etc. 15) =घोलमानः. 16) P निवसंति for ण विसंति of JB. 17) B बहुप्पंति. 18) Page 57, note 13. 19) B विधुता. 20) B सहेति. 21) B °घूर्म्ममाण°. 22) B प्रलयवातेनमिव. 23) B प्रक्षालितस्य. 24) B वा.

सेविज्जंति वियंभिय[1]-णियडायव-भय-भुयंगमामुक्का ।
आसण्ण-दिणयरोहंस-पायवा सिद्ध-मिहुणेहिं ॥ ३४७

अवि य ।

सुर[2]-वहु-कड्ढिय[3]-हिय-कुसुम-मुक्क-पलहूससंत[4]-कप्पलयं ।
चंदण-विडवंदोलण-सुह-सीयल[5]-पसरिय-समीरं ॥ ३४८

मरगय-कडय-विणिग्गय-जरढत्तण-णिव्वडंत-तण[6]-णिवहं ।
फलिह[7]-सिलायल[8]-पसरिय-फंस-मुणिज्जंत-णइ-सोत्तं ॥ ३४९

जलहर-जल-विच्छोलिय[9]-सुहिय-सुहासीण[10]-मुणि-यण[11]-समूहं ।
सिहरंतरिय-णहंगण-पच्छाइय-दस-दिसाहोयं[12] ॥ ३५०

इय विविह-मणहरुज्जाण-कणइ[13]-भवणालि[14]-रइय-पेरंतं ।
सुर-सिद्ध-सुह-णिवासं[15] अच्चंत-मणोहरं मलयं ॥ ३५१

अह तस्स महा-गिरिणो णियंब[16]-भाएक्क-देस-कय-सोहं ।
बहु[17]-विह-तरु-कुसुमामोय-वासियासं वरुज्जाणं ॥ ३५२

रममाणसुरसिद्धमिथुनमुखरेषु पत्रलतिकागृहेषु लज्जायमाना इव रविकिरणा न प्रविशन्ति ॥ ३४६ ॥ ३४७) सेविज्जंति – यत्र विजृम्भितनिकटातपभयभुजंगमामुक्ताः आसन्नदिनकरश्रीखण्डपादपाः सिद्धमिथुनैः सेव्यन्ते । सूर्यातपभयात् सर्पमुक्ताश्चन्दनवृक्षाः सिद्धैः सेव्यन्ते ॥ ३४७ ॥ अपि च । ३४८–५१) सुरवहु – कलापकेन मलयं स्तौति । सुरवधूकरकर्षितकुसुममुक्तप्रलघूच्छ्वसितकल्पलतम् । चन्दनविटपान्दोलनसुखशीतलप्रसृतसमीरम् ॥ [मरगय –] मरकतकटक[18]विनिर्गतजरठत्वप्रकटीभवत्तृणनिवहम् । स्फटिकशिलातटप्रसृतस्पर्शज्ञायमाननदीस्रोतः[19] ॥ [जलहर –] जलधरजलप्रक्षालितसुखितसमासीनमुनिजनसमूहम् । शिखरान्तरितनभोगणप्रच्छादितदशदिशाभोगम् ॥ [इय –] इति विविधमनोहरोद्यानलताभवनालिशोभितपर्यन्तम् । सुरसिद्धसुखनिवासमत्यन्तमनोहरं मलयगिरिम् । प्राप्ता इति शेषः ॥ देवाङ्गनाभिः कृतपुष्पावचयनात् लघुकाः कल्पलताः । मरकतकटकं गरुडोद्गारिभूमिः । 'ज्ञो जाणमुणौ' [हैम० ८-४-७] इति मुणिज्जंत । '[पृथक्] स्पष्टे णिव्वडः' [हैम० ८-४-६२] इति णिव्वडंत । कणई[20] लता । वनालिः वनश्रेणी ॥३४८-५१॥ ३५२) अह तस्स – [अथ तस्य महागिरेः नितम्ब-]भागैकदेशकृतशोभम् । बहुविधतरुकुसुमामोदवासिताशं वरोद्यानम् । वर्तते इति शेषः ॥३५२॥

---

1) = विजृंभितनिवियताय, P वियंचिय, JB वियंभिय. 2) = सुरवधू, B सुरवहुकरकड्ढियकुसुम°. 3) = त्रोटित, B कड्ढिय. 4) = अलघुसत्तीडवतृसंत. 5) P सीयलं, B सीयल. 6) B तिण. 7) = स्फटिक. 8) B सिलायड. 9) = विमुक्त. 10) B समासीण. 11) P जण, JB यण. 12) PB दिसाभोयं, J दिसाहोयं 13) P कणई, J कणइ, B कणय. 14) = लताभवन. 15) P निवास, J णिवास (?), B णिवासं 16) B gives a short portion of the gāthā, i. e., upto णियंब, and then follows the Sanskrit commentary on the remaining part. 17) P त्रिहुविह, J बहुविह. 18) B कटचि. 19) B श्रोत्रं. 20) B कनकलता.

सुपसत्थ-विविह-विहग-उल-राव-संवलियं[1]-भमर-रव-मुहलं ।
मुहलालि-मुह-विसट्टंत-कुसुम-वस-सुरहि-[2]गंधवहं ॥ ३५३

गंधवह-परिमलालिद्ध-पूग[3]-संदोह-[4]मंद-वइ-वेढं[5] ।
वइवेढासण्ण-[6]णवंव-लुंबि-लंवंत-[7]कइ-णिवहं ॥ ३५४

[8]कइ-णिवह-विहंडिय-पउर-फल-रसासार-सित्त-तरु-मूलं ।
तरु-मूल-[9]पइट्ठिय-पुप्फलाइ-परिपूइयाणंगं ॥ ३५५ 5

इय विविह-वेल्लि-वेल्लहलं[10]-पल्लवंतरिय-तरणि-कर-णियरं[11] ।
रइ-वम्मह-वास-हरं व मणहरं महिहरुज्जाणं ॥ ३५६

[12]तस्स वि मज्झुद्देसे विचित्त-मणि-[13]कुट्टिमंगणं भवणं ।
जं पेच्छिऊण देवा वि णिय-घराणं विरज्जंति ॥ ३५७ 10

तस्स भवणस्स पुरओ मणहर-मणि-कुट्टिमे [14]समासीणा ।
उज्जाण-वण-सिरी विव एक्क च्चिय बालिया दिट्ठा ॥ ३५८

वीणा-विणोय-वस-वलियं[15]-कंधरुद्ध[16]च्छि-[17]पेच्छिरीए तहिं ।
सच्चवियं म्ह[18] विमाणं णह-मग्ग-परिट्ठियं तीए ॥ ३५९

३५३–५६) सुपसत्थ – उद्यानं वर्तते इति गाथाचतुष्टयेन संबन्धः । सुप्रशस्तविविध-विहगकुलरावसंवलितभ्रमररवमुखरम् । मुखरालिमुखविकसत्कुसुमासवसुरभिगन्धवहम् ॥ [गंधवह –] गन्धवहपरिमलालीढपूगकसंदोहवेद्धवृतिवेष्टम् । वृतिवेष्टासन्ननताम्रलुम्बिलम्बमानकपिनिवहम् ॥ [कइणिवह –] कपिनिवहविखण्डितप्रचुरफलरसासारसिक्ततरुमूलम् । तरुमूलपरिस्थितपुष्पलावीपरिपूजितानङ्गम् ॥ [इय विविह –] इति विविधवल्लीविस्तृतपल्लवान्तरिततरणिकरनिकरम् । रतिमन्मथवासगृहमिव मनोहरं महीधरोद्यानं पर्वतारामो विद्यते । कुसुमासवः पुष्पमकरन्दः । पुष्पलाव्यः पुष्पावचयकारिण्यो मानिन्यः इति । विल्लहला विस्तृता । [19]कलापकम् ॥ ३५३-५६ ॥ ३५७) तस्स वि – तत्रापि मध्योद्देशे विचित्रमणिकुट्टिमाङ्गणं भवनं प्रासादोऽस्ति । यद् दृष्ट्वा देवा अपि निजगृहेभ्यो विरज्यन्ते । निजगृहाणामपि न स्मरन्तीत्यर्थः ॥ ३५७ ॥ ३५८) तस्स – तस्य [20]भवनस्य पुरतोऽग्रतो मनोहरमणिकुट्टिमे सुखासीना उद्यानवनश्रीरिव एकैव वरबालिका दृष्टा ॥ ३५८ ॥ ३५९) वीणा – वीणाविनोदवशवलितकंधरोर्ध्वाक्षिदर्शनशीलया तया

---

1) P संचलिय, JB संवलिय. 2) P मंप for गंध of JB. 3) B पूय. 4) B वद्ध for मंद. 5) = वृत्तिवेष्टं. 6) = नवाम्र[= म्र], P नवंव, J णवंध, B निरंब for णवंब. 7) = वानरलत्तहं[= निवहं]; P कइ, J कई, B करु. 8) P कइ, J कय, B कवि. 9) B परिट्ठिय. 10) = स्फुरंत. 11) PJB नियरं. 12) B तत्थ वि. 13) B कुट्टिमं महाभवणं. 14) B सुहासीणा. 15) P वलिंयं, JB वलिय. 16) = ऊर्द्ध. 17) P पेच्छ°, J पेच्छि°, B पिच्छि°. 18) PJB °वियम्ह. 19) कलापकम् is put at the close of gāthās. 20) B भुवनस्य. 30

भणियं च णिवद्धंजलि-पणास-पडिवण्ण-हियय-सब्भावं ।
सब्भुट्ठाणमविम्हरियं-विणय-महुरक्खरं वयणं ॥ ३६०
अवयरह भयवईओ णिय-पय-कमलोवयार-कय-सोहं ।
पेच्छह एयं उज्जाण-भवणयं णंदणं-वणं व ॥ ३६१
तो तीए वयण-परिओस-वस-वियंभंत-भाव-वेसंभं ।
हिययं चिय अवयरियं पच्छा सणियं विमाणं म्ह ॥ ३६२
अह तत्थ सुहासण-कय-परिग्गहं भट्टउत्त अम्हेहिं ।
सा पुच्छिया जुयाणी सुंदरि साहेहं का तं सि ॥ ३६३
कस्सेसो विविह-विचित्त-पत्त-विच्छित्ति-पलहुओ हत्थो ।
कस्स व इमाउ वर-वलईओ सु-सराउ दीसंति ॥ ३६४
कस्स व णीसेस-कला-कलाव-संसूययाइँ एयाइं ।
वत्तण-फलयाइँ विचित्त-वत्तणा-वट्ट-लिहियाइं ॥ ३६५
कस्स व इमाइँ दरियारि-दप्प-दलणोइयाइँ दीसंति ।
विविहाउहाइँ सुंदरि चंदण-चच्चिक-रइयाइं ॥ ३६६

तत्र नभोमार्गपरिस्थितमस्माकं विमानं दृष्टम् ॥ ३५९ ॥ ३६०) भणियं च – निवद्धाञ्जलिः यथा भवति प्रणामप्रतिपन्नहृदयसद्भावं साभ्युत्थानम् अविस्मृतविनय-मधुराक्षरं वचनं भणितं च ॥ ३६० ॥ ३६१) अवयरह – हे भगवत्यः अवतरत अत्रागच्छत निजपदकमलोपचारकृतशोभं नन्दनवनमिवेदम् उद्यानभवनं पश्यत ॥ ३६१ ॥ ३६२) तो तीए – ततस्तस्या वचनपरितोषवशविजृम्भमाणभावविश्र-म्भम् अस्माकं हृदयमेवावतीर्णम् । पश्चाच्छनैर्मन्दं विमानमवतीर्णम् ॥ ३६२ ॥ ३६३) अह तत्थ – अथ तत्र हे भट्टपुत्र सुखासनकृतपरिग्रहं सा कुमारी यूनी तरुणी पृष्टा हे सुन्दरि कथय का त्वमसि ॥ ३६३ ॥ ३६४) कस्सेसो – कस्यैष विविध-विचित्रप्रासविच्छित्तिप्रलिखितो हस्तः । [19]प्रलघुको वा पाठान्तरे [20]मनोज्ञः इत्यर्थः । कस्य वा इमाः सरसा वरवल्लक्यः रम्यवीणा दृश्यन्ते ॥ ३६४ ॥ ३६५) कस्स व – कस्य वा इमानि निःशेषकलाकलापसंसूचितानि विचित्रपट्टिकापृष्ठलिखितानि वर्तन-फलकानि चित्रपट्टिका इत्यर्थः ॥ ३६५ ॥ ३६६) कस्स व – कस्य वा [21]इमानि दृप्तारिदर्पचूर्णनोचितानि चन्दनचर्चकरचितानि विविधायुधानि दृश्यन्ते हे सुन्दरि [22]

---

1) P अब्भु°, JB सब्भु°. 2) = अस्मृत्वा. 3) PJB नंदण. 4) B विय. 5) = पश्चात् शनैः विमानात् वयं. 6) P विमाणम्ह, J not specified, B विमणम्हे. 7) B जुवाणी. 8) P साहेहि, JB साहेह. 9) = का त्वमसि. 10) = विच्छिश्वासौ प्रलघुकश्च, B पहलिउ for पलहुओ. 11) J कस्से. 12) J वरिवलइओ. 13) B सरसाउ for सुसराउ. 14) J हत्त for फल°. 15) B विचित्तपट्टियावंधलिहियाइं. 16) = दृप्तारि. 17) B दप्पव[=चु]ण्णणुइयाइ. 18) = चर्चनन्यासानि, B व [=च]चक. 19) B प्रलघु वा. 20) B मन्योन्यः. 21) B इमानिः°. 22) B °दर्प वर्ण°.

कस्स व एसो दीसइ सर[1]-जंते सुयणु पोत्थय-णिहाओ[2] ।
कस्सेयं साहसु विस्सयम्म[3]-वासं व वर-भवणं ॥ ३६७

तं तह सोऊण ममाहि तीए[4] भाउय पुणो समुल्लवियं ।
भयवइ सुणेह सीसइ जह तुह कोऊहलं एयं ॥ ३६८

एत्थत्थि मलय-महिहर-सिहरोवरि सुप्पवद्ध[5]-पायारा । 5
बहु-विह-तरु-कुसुमामोय-वासियासेस-पेरंता ॥ ३६९

सिद्धंगणाणणंवुरुह-सिरि-विलासोवसोहिय[6]-णिवेसा ।
अमर-जण-लोहणिज्जा महा[7]-पुरी केरला णाम ॥ ३७०

तत्थ सुराहिवई विव[8] सिद्धाहिवई तिलोय-विक्खाओ ।
मलयाणिलाहिहाणो[9] मेरु व्व अलंघिय-त्थामो[10] ॥ ३७१ 10

तस्स वि[11] चित्ताणुगया कमला[12] णामेण पढम-पिय-जाया ।
तिस्सा[13] एक्को च्चिय[14] माहवाणिलो णाम पिय-तणओ ॥ ३७२

तस्सेयं उज्जाणं विज्जा-भवणं च [15]णिम्मियं पहुणा ।
[16]मलयाणिलेण पिय-सुय-सिणेह-संवद्ध-हियएण ॥ ३७३

विचित्रप्रहरणानि विलोक्यन्ते ॥ ३६६ ॥ ३६७) कस्स व – कस्य वा एष शर- 15
यन्त्रे स्थापनिकायां हे सुतनु पुस्तकनिकायो दृश्यते । साहसु कथय । कस्येदं विश्वकर्म-
वास इव वरभवनं सौधम् ॥ ३६७ ॥ ३६८) तं तह – तत्तथा तया मत्तः श्रुत्वा
मत्सकाशादाकर्ण्य भ्रातर्विजयानन्द पुनः समुल्लपितम् । भगवति शृणु शिष्यते कथ्यते
यदि तव कौतूहलम् एतत् ॥ ३६८ ॥ ३६९-७०) एत्थत्थि – अत्र मलयमहीधर-
शिखरोपरि सुप्रबद्धप्राकारा दुर्ग्रहदुर्गा बहुविधतरुकुसुमामोदवासिताशेषपर्यन्ता ॥ [सिद्धं- 20
गणा –] सिद्धाङ्गनानां वदनाम्बुरुहश्रीविलासोपशोभितनिवेशा अमरजनालोकनीया
केरला नाम पुर्यस्ति । युग्मम्[17] ॥ ३६९-७० ॥ ३७१) तत्थ – तत्र पुर्यां सुराधिपति-
रिव त्रिदशनाथ इव त्रिलोकविख्यातो मेरुरिव अलङ्घितस्थामा दुर्जयबलो मलयानिला-
भिधानः सिद्धाधिपतिरस्ति ॥ ३७१ ॥ ३७२) तस्स वि – तस्य च चित्तानुगता
नाम्ना पद्मा प्रथमप्रियजाया । तस्या एक एव माधवानिलो नाम प्रियतनयः ॥ ३७२ ॥ 25
३७३) तस्सेयं – तस्येदमुद्यानं माधवानिलस्य प्रियसुतस्नेहसंबद्धहृदयेन मलयानिलेन पित्रा
प्रभुणा स्वामिना विद्याभवनमिव निर्मितं कृतम् । पुत्रस्नेहात्पित्रा कारितोऽयमाराम इति

---

1) = त्रिगटी. 2) B नियाउ. 3) = विश्वकर्म. 4) B त्तर करणं भाउय[= तीइ (करणं) भाउय].
5) P सुपवद्धपायावा, JB सुप्पवद्धपायारा. 6) B विलासेण सो°. 7) B महाउरी. 8) B इव.
9) P °याऽनिलाभिहा°, J °याणिलाहिहा°, B °यानिलाहिसहाणो. 10) = वलं. 11) B य. 12) B 30
पउमा. 13) B तस्सा. 14) J चिय. 15) P च निम्मियं, B विणिम्मियं. 16) PB मलयानिलेण,
J मलयाणिलेण, so also with माधवानिल. 17) युग्मम् put at the end of gathās.

अहमेत्थ तस्स उज्जाण-वालिया माहवीलया णाम ।
आ जम्ममेक्क[1]-पंसू-पकीलिया णवर तेण समं ॥ ३७४
एवं सोऊण मए भणिया सा भट्टउत्त[2] धण्णासि ।
जिस्सा मलय-णिवासम्मि एरिसी सामि-संपत्ती ॥ ३७५
5 भणियं पुणो वि माहविलयाए भयवइ तुमं[3] पि साहेह ।
के तुम्हेत्थम्हाणं[4] सहलीकय-जीव-[5]लोगाओ ॥ ३७६
सिट्ठं च मए तिस्सा[6] सुंदरि एवं-विहाउ[7] अम्हे वि ।
अंदोलण-सुह-कोऊहलेण मलयं पवण्णाओ ॥ ३७७
तो तीए सरहसुप्फुल्ल[8]-वयण-णयणाए अम्ह उल्लवियं ।
10 एसो सो दोल-हरो रमह जहिच्छाइ ता एण्हिं[9] ॥ ३७८
ताव महाणुमईए सहसा भणियाउ णियय[10]-वयंसीओ ।
अंदोलह ता तुम्हेत्थ[11] होइ जेणम्ह परिवाडी ॥ ३७९
तो[12] पढमयरंदोलण-दोहल-आलुंखि[13]एक्क-भावाहिं[14] ।
परियालिज्जइ खण[15]-वम्महो व्व वालाहि[16] दोल-हरो ॥ ३८०

---

15 भावः ॥ ३७३ ॥ ३७४) अहमेत्थ – अहमत्र माधवीलता नाम तस्योद्यानपालिका । नवरं केवलम् । तेन समं माधवानिलकुमारेण सार्धमा जन्म एकपांसुभिः क्रीडिता । बालकालस्नेहालीढेति भावः ॥ ३७४ ॥ ३७५) एवं सोऊण – [एवं श्रुत्वा मया भणिता सा भट्टपुत्र धन्या असि । यस्याः मलयनिवासे ईदृशी स्वामिसंपत्तिः] [17]प्रभुसामग्री ॥ ३७५ ॥ ३७६) भणियं – भणितं च पुनर्माधवीलतया भगवति इदमपि कथय का
20 अत्र यूयम् अस्माकं सफलीकृतलोका इति प्रश्नः ॥ ३७६ ॥ ३७७) सिट्ठं च – शिष्टं च तस्याः पुरतो मया हे सुन्दरि एवंविधा वयमपि आन्दोलनसुखकौतूहलेन मलयं गिरिं प्रपन्नाः आगताः ॥ ३७७ ॥ ३७८) तो तीए – ततस्तया सरभसोत्फुल्लवदनकमलया अस्माकम् उल्लपितम् । एते ते दोलागृहाः । पुंनपुंसकत्वात् पुंस्त्वप्रयोगः । तस्मादत्र यथेच्छया रमध्वम् ॥ ३७८ ॥ ३७९) ताव – तावन्महानुमत्या
25 सहसा निजवयस्यो भणिताः स्वसख्यः आदिष्टाः आन्दोलयत[18] क्रीडत तावद्यूयमत्र येनास्माकं परिपाटिर्भवति वारकः समायाति ॥ ३७९ ॥ ३८०) तो – ततः प्रथमतरान्दोलनदोहलास्पृष्टैकभावाभिः बालाभिः क्षणमन्मथ इव पर्वकन्दर्प इव दोलागृहं परिचाल्यते क्रीड्यते दोलाक्रीडया । 'स्पृशः फासफंसफरिसछिवछिहालुंखालिहाः' [हैम०

---

1) J °पंसूए की°, B आजम्म इक्कसिक्कसिकीलिया णवरि. 2) PB भट्टपुत्त, J भट्टउत्त. 3) B इमं.
25 4) B °म्हाणे[= णं] जीवियफलदाणदाटाउ. 5) P लोयाओ, J लोगाओ, B see earlier reading. 6) P तस्सा, JB तिस्सा. 7) B विवाहाउ. 8) B णयणवयणाइ. 9) = इदानीं. 10) = निजसखीः. 11) P तुम्हेत्थ, J तुम्हेहिं, B तुम्हित्थ. 12) B ता. 13) = स्पृष्ट, देश्य. 14) P एक्कभावाहिं, J एक्कभावाओ, B इक्कभावाइ. 15) = उत्सवकाम इव. 16) P वालाए, JB वालाहि. 17) B preserves only the last word. 18) B °लत:.

कीए वि पढम-संगम-मणोरहुक्कंठियाएँ व पियाए।[1]
अक्कम्मइ पेम्म-परव्वसाएँ[2] दइओ[3] व्व दोल-हरो ॥ ३८१

सो तीए सुरय-रस-लालसाए [4]मज्जाविऊण तह रमिओ।
जह अण्णाण वि बहुसो विसेस-रमियव्वओ[5] जाओ ॥ ३८२

इय वारोसारंदोलिरीहिँ[6] भणियं चिरेण[7] अम्हे पि।
रमियं[8] एत्थ जहिच्छं संपइ दे रमह तुम्हे वि ॥ ३८३ 5

ता[9] अम्हेहिँ वि भाउय तत्थ जहिच्छाए कीलिऊण चिरं।
आसीणाउ तहिं चिय पुणो वि मणि-कुट्टिमुच्छंगे ॥ ३८४

जा [10]इर मुहुत्त-मेत्तं[11] वीसमिउं [12]पडिवहं पवज्जामो।
तो[13] सो सिद्ध-कुमारो तत्तो च्चिय[14] आगओ सहसा ॥ ३८५ 10

तो[15] सव्वाहिँ वि सव्वायरेण एसो[16] त्ति सो भणंतीहिं।
सच्चविओ जक्ख-कुमारियाहिँ कोऊहलेण चिरं ॥ ३८६

तो पढम-परोक्खणुराइरीहिँ[17] बालाहिं सच्चविज्जंतो।
अल्लीणो मह माहविलयाए संमुयं[18] समीवम्मि ॥ ३८७

८-४-१८२] इति आलेखियः ॥ ३८० ॥ **३८१) कीए वि**–कयापि प्रथमसंगम- 15
मनोरथोत्कण्ठितया प्रेमपरवशया स्नेहमूढया प्रियया इव दोलागृहो वल्लभ इवाक्रम्यते
आश्लिष्यते इति भावः ॥ ३८१ ॥ **३८२) सो तीए**–स तया सुरतरसलालसया
क्रीडालम्पटया मदयित्वा क्षीवतां नीत्वा तथा रमितः। यथा अन्यासामपि [19]नायिकानां
बहुशो विशेषरमणीयको जातः। दोलापक्षे [20]मज्जाविऊण अतिवेगतामापाद्य। सुरतं
निधुवनम्। दोलापक्षे सुष्ठु रमणं रतं क्रीडा तद्रसः आसक्तिः ॥ ३८२ ॥ **३८३)** 20
इय–इति वारोत्सारकमेकस्यान्दोलनानन्तरमपरस्य क्रीडनेन क्रमान्दोलनेन क्रीडन-
शीलाभिरस्माभिश्चिरेण भणितम्। युष्माभिश्चिरं रतं संप्रति वयमपि क्रीडामः ॥ ३८३ ॥
३८४) ता अम्हेहिं–ततोऽस्माभिरपि भ्रातस्तत्र यथेच्छया चिरं क्रीडित्वा तत्रैव पुन-
र्मणिकुट्टिमोत्सङ्गे आसीना उपविष्टाः। सर्वत्र बहुवचनं कविना गौरवार्थमुक्तम् इति
ज्ञेयम् ॥ ३८४ ॥ **३८५) जा इर**–यावत्किल मुहूर्तमात्रं विश्रम्य प्रतिपथं प्रप- 25
द्यामहे पश्चाद् व्याघुटनं कुर्मः तावता स सिद्धकुमारः सहसा तत्रैवागतः ॥ ३८५ ॥
३८६) तो सव्वाहिं–ततः [सर्वाभिरपि] सर्वादरेण एष स इति भणन्तीभिः यक्ष-
कुमारिकाभिः कौतूहलेन दृष्टः ॥ ३८६ ॥ **३८७) तो पढम**–ततः प्रथमपरोक्षा-

1) PJB मणोहरुक्कं°. 2) P पेमपरवसाए, J पेम्मपरव्वसाए, B पिम्मपरव्वसाउ. 3) B बालाउ for दइओ व्व. 4) PB मव्वाविऊण, J मच्छाविऊण. 5) B रमिउव्वउ. 6)=परिपाट्या, B वारोसारं°. 7) B चिरेण तं ताहिं. 8) B रमियं म्हेहि ज°. 9) P ता अम्हेहि मि, J not specified, B तो अम्हेहि वि. 10)=किल, B किर. 11) B मत्तं. 12) P पहिवहं, JB पडिवहं. 13) B ता सो. 14) J चिय. 15) P तो सव्वाहि मि, J not specified, B ता सव्वाहि वि. 16) B एस त्ति. 17) B °राइणीहिं, J °राइरीहिं, B °राइणीहि. 18) B समयं. 19) B नायकानां. 20) B मज्जावि°. 30

तो[1] दूर-कय-पणामो भाउय भणिओ मए वि सो तत्थ ।
होहि जहिच्छिय-कामो जियसु चिरं बंधवेहिँ समं ॥ ३८८
भणियं च तेण भयवइ जं महसि तुमं म्ह[3] किं पि तं होउ ।
णूणं सव्वाइ मि मंगलाइँ अज्जम्ह जायाइं ॥ ३८९
अज्जे अज्ज कयत्था एसा तियसेसरस्स वि[6] दुलंघा[7] ।
जो[8] तुम्ह चलण-कमलोवयार-राइंकिया भूमी ॥ ३९०
एवं तेण भणंतेण तत्थ वलियच्छिणा मुहं दिट्ठं ।
सहस त्ति महाणुमईए साहिलासच्छि-विच्छोहं ॥ ३९१
ववएस-विवत्तंतेक्क-णेत्त-पेरंत-पेच्छियव्वेहिं ।
पुणरुत्तं तेण सकोउएण दिट्ठा महाणुमई ॥ ३९२
तं च सविलास-कोमल-घडंत-पडिलक्ख-लोयणं दिट्ठं ।
दट्ठूण महाणुमईए रूव-सोहा समारूढा ॥ ३९३
तो[15] फुरिय-विलासं सुंदरं पि सविसेस-सुंदरं जायं ।
किसलय-पसाहियाए सकुसुममंगं लयाए व्व ॥ ३९४

नुरागिणीभिर्बालाभिर्विलोक्यमानो मम माधवीलतायाश्च समीपे समकं सहसा आलीनः उपाविक्षत । अपूर्वकथारूपादिश्रवणात्परोऽनुभावः ॥ ३८७ ॥ ३८८) **तो दूरकय**– तावता[17] दूरकृतप्रणामः कुमारो भ्रातर्विजयानन्द मयापि तत्र स भणितः । कथमित्याह । यथेप्सितकामो भव जीव चिरं बान्धवैः सार्धम् ॥ ३८८ ॥ ३८९) **भणियं च**– भणितं च तेन भगवति यत्कांक्षसि अम्ह अस्मत्तः तत्किमपि ते भवतु । नूनं सर्वाण्यपि मङ्गलानि [अद्य] अस्माकं जातानि ॥ ३८९ ॥ ३९०) **अज्जे**– आर्ये अद्य कृतार्था एषा त्रिदशेश्वरस्यापि दुर्लङ्घ्या मही या युष्मच्चरणकमलोपचाररागाङ्किता । कमलानि हि लक्ष्मीनिवासा भवन्ति । तदङ्किता मही श्लाघ्यैव भवति ॥ ३९० ॥ ३९१) **एवं तेण**– एवं भणता त्र्यस्रवलिताक्षेण तिर्यक्कृतनयनेन सहसा साभिलाषाक्षिविक्षोभं तेन कुमारेण महानुमत्याः मुखं दृष्टम् ॥ ३९१ ॥ ३९२) **ववएस**– व्यपदेशविवर्तमानैकनेत्रपर्यन्तप्रेक्षितव्यैः सकौतूहलेन तेन पुनरुक्तं मुहुर्मुहुः सा महानुमती दृष्टा ॥ ३९२ ॥ ३९३) **तं च**– तत्सविलासकोमलघटमानप्रतिलक्ष्यलोचनं दृष्टं [18]माधवानिलनिरीक्षितं दृष्ट्वा महानुमत्याः कन्यायाः रूपशोभा समारूढा जाता ॥ ३९३ ॥ ३९४) **तो फुरिय**– ततः स्फुरितविलाससुन्दरं स्वभावसुभगं तस्याः

---

1) B ता. 2) J भणियं. 3) P तुमं म्ह किं पि, J not specified, B तुमं महं पि. 4) P सव्वाइ मि, J सव्वाइं मि, B सव्वाइ वि. 5) J ससर for सर. 6) P य, J वि, B omits. 7) B दुल्लंघा. 8) B जं. 9) P कमणो°, J कमलो°, B कवलो°. 10) = रागांकिता, J राइंकिया. 11) B तंसव°. 12) = अभिलाष. 13) B सकोऊहलेण. 14) PB रूव, J रूय. 15) J ता. 16) P कुसुमियमंगं लयापव्व, J सकुसुममंगलयाए व्व, B सकुसुमसंगलयाइ व. 17) B तावती. 18) B दृष्टं माधनल निरीक्षि°.

आणंद-वाह-पडिपूरियाइँ[1] जायाइँ तक्खणं चेयं[2] ।
अवसाय-सलिल-सित्ताइं कुवलयाइँ व णयणाइं ॥ ३९५

पसरइ विसट्ट-पम्हंतराल-परिलुलिय-तारयाहोया[3] ।
हिययाहिलास-मुह[4]-तरु-लय ब्व परिकोमला दिट्ठी ॥ ३९६

पुणरुत्तमुम्मुहा[5] होंति सज्झसूसास-पाविय-विसेसा ।
थणया लज्जोणय[7]-वयण-कमल-उण्णामणत्थं[8] व ॥ ३९७

णिययावेय[9]-पणोल्लण-विसम-समुवेल्लगाण[10]-पाउरणा[11] ।
पयडंति दंसणत्थं व थण-जुयं सरल-णीसासा ॥ ३९८

अंगं पवियंभिय-पुलय-जाल-संगलण-मासलं सहइ ।
अंतो-सव्वंग-विसंत-दइय-दिण्णुण्णय[12]-गुणं व ॥ ३९९

सेयं[13]-कणोहो रेहइ भंगुर-तिवली-तरंग-रिंगंतो[14] ।
लायण्ण-सलिल-णिब्भर[15]-थण-थलसाणं[16] व णीसंदो ॥ ४००[17]

अङ्गं सविशेषसुन्दरं रम्यतरं जातम् । दृष्टान्तमाह । किसलयप्रसाधितायाः लतायाः इव सकुसुमंमङ्गं[18] यथा सुन्दरं भवति तथा तदङ्गमपि तदानीं जातम् ॥ ३९४ ॥ **३९५) आणंदवाह** – तस्यास्तत्क्षणमेव नयने आनन्दाश्रुवाष्पपरिपूरिते जाते । कानीव । [19]अवश्यायसलिलसिक्तानि कुवलयानीव ॥ ३९५ ॥ **३९६) पसरइ** – विकसत्पक्ष्मान्तराल-परिलुलिततारकालोका हृदयाभिलाषसुखतरुलतेव परिकोमला दृष्टिः प्रसरति । नेत्रापाङ्गेन सचञ्चलं पश्यति इत्यर्थः ॥ ३९६ ॥ **३९७) पुणरुत्त** – साध्वसोच्छ्वास-प्रापितविशेषौ स्तनौ लज्जावनतवदनकमलोन्नामनार्थम् इव पुनरुक्तम् उन्मुखौ संमुखीनाविव भवतः ॥ ३९७ ॥ **३९८) णियथावेय** – निजावेगप्रेरणविषमप्रसर्पत्प्रावरणाः सरलनिःश्वासाः दर्शनार्थमिव स्तनयुगं प्रकटयन्ति माधवानलकुमारस्येति भावः ॥ ३९८ ॥ **३९९) अंगं** – प्रविजृम्भितपुलकजालसंगलनमांसलं तस्याः अङ्गम् । अन्तःसर्वाङ्गविशद्दयितदत्तोन्नतिगुणमिव राजते ॥ ३९९ ॥ **४००) सेय** – भङ्गुरत्रिवलीतरङ्गरङ्गन्[19] स्वेद[20]जलकणौघः तस्या लावण्यसलिलनिर्भरस्तनकलशयोः[21] निष्यन्दः इव राजते । 'राजेरग्घछज्जसहरीररेहाः' [हेम० ८-४-१००] इति रेहइ ॥ ४०० ॥

1) PB परि°, J पडि°. 2) P चेय, J चेय, B चेव. 3) P °भोया, J °होया, B °लोया. 4) PJB मुह. 5) P पुणुत्त°, JB पुणरुत्त°. 6) = उन्मुखौ, P °मुम्मुहा, B सम्मुहा. 7) P लज्जोणवयण, B लज्जोणयवयण. 8) P उन्नामणच्छं व्व, J उण्णामणत्थं व, B उन्नावणत्थं व. 9) = वेग. 10) P समुवेल्ल°, B समुव्विल्ल°. 11) = प्रावरणा. 12) = दत्तोन्नतगुणं, P दिन्नुन्नयगुणं च, J दिण्णुण्णयगुणं व, B perhaps दिन्नुनइगुणं व. 13) = स्वेदकणौघ. 14) PB रंगंतो, J रिंगंतो. 15) B णिज्झर. 16) = स्तनोरिव, P यलसाणं, B कलसाणं. 17) P 398, J perhaps 400, B 405. 18) B °मंगं. 19) B वेश्या. 20) B जालं. 21) B °निर्झरस्तनकलश इव.

परिसर-परिसंठिय-सहि-समूह-लज्जा-णिरोह-णित्थामा[1] ।
तंस-वलिया किलम्मइ[2] वम्मह[3]-पडिपेल्लिया दिट्ठी ॥ ४०१
पडिलक्ख-भग्ग-पसरं तस्स वि णिमिसंतरं जुयाणस्स ।
पडिरक्खिय-हिययावेय-लाहवं[4] घडइ णयण-जुयं ॥ ४०२
तो सो इमीए मुह-यंद-चंदिमा-सार-सलिल-सिप्पंतो[5] ।
सव्वंगं रोमंच-च्छलेण णेहो[6] व्व अंकुरिओ ॥ ४०३
ता दोण्हं[7] पि परोप्पर-मण-रक्खण-धीर[8]-संणिरुद्धाइं ।
असमत्तालोयण-दोहलाइँ तम्मंति[9] णयणाइं ॥ ४०४
दोण्हं पि पढम-दंसण-वस-पसरिय-सरस[10]-कोमल-विलासं ।
दोलायमाण-संगम-मणोरहं वेवए हिययं ॥ ४०५
इय एव[11] मए उवलक्खिऊण भणिया हला[12] महाणुमई ।
परिणमइ दिणं गमणम्मि सुयणु किं कीरइ विलंबो ॥ ४०६
एवं भणिऊण विचिंतियं हि[13] अण्णोण्ण-साणुरायाण ।
कज्जुज्जुयाण[14] हियए अण्णं पासट्ठियाणम्ह[15] ॥ ४०७

---

४०१) **परिसर**—परिसरपरिसंस्थितसखीसमूहलज्जानिरोधनिःस्थामा । मन्मथप्रतिप्रेरिता त्र्यस्रवलिता दृष्टिः क्लाम्यति ॥ ४०१ ॥ ४०२) **पडिलक्ख**—तस्यापि यूनः प्रतिलक्ष्यभग्नप्रसरं निमिषान्तरं निमेषमात्रं नयनयुगं परिरक्षितहृदयायासलाघवं[16] [17]घटते शीघ्रतां प्राप्नोतीत्यर्थः ॥ ४०२ ॥ ४०३) **तो सो**—ततः स युवा अस्या मुखचन्द्रचन्द्रिकासारसलिलसिच्यमानो रोमाञ्चच्छलेन सर्वाङ्गं स्नेह इवाङ्कुरितः ॥ ४०३ ॥ ४०४) **ता दोण्हं**—तावद्द्वयोरपि परस्परमनोरक्षणधैर्यसंनिरुद्धानि असमाप्तालोकनदोहदानि अक्षीणि ताम्यन्ति । दर्शनोत्सुकान्यपि पात्रवशाद्द्रष्टुमशक्तानि नेत्राणि खिद्यन्ते इति ॥ ४०४ ॥ ४०५) **दोण्हं पि**—द्वयोरपि कुमारकुमार्योः प्रथमदर्शनवशप्रसृतसरसकोमलविलासम् । दोलायमानसंगममनोरथं हृदयं कम्पते । सरसः[18] सस्नेहश्शृङ्गारो वा दोलायमानसंगमो भविष्यत्यावयोर्न वेति कम्पः ॥ ४०५ ॥ ४०६) **इय एव**—इत्येवमुपलक्ष्य मया भणितम् । हले सखि महानुमति दिनं परिणमते अस्तं याति । हे सुतनु निजस्थाने गमने किं विलम्बः क्रियते ॥ ४०६ ॥ ४०७) **एवं भणिऊण**—एवं भणित्वा [19]विचिन्तितवत्यस्मि माधवानिलमहानुमत्योरन्योन्यसानुरागयोः कार्योद्यतयोः

---

1) =दुर्बला. 2) =क्लाम्यति. 3) P धम्मह, JB वम्मह. 4) P हिययावेयलोहवं, J हिययावेयलाहवं, B हिययाउ[=या]सलाहवं. 5) =सिच्यमान 6) PJ नेहो, B नेहु. 7) B दोहिं. 8) P धीर, JB वीर. 9) =ताम्यंति, B तिम्मंति. 10) P सरसं, JB सरस. 11) P एवमाइ, JB एव मए. 12) B भणियं हले महाणुमइ. 13) P विचिंतियंम्हि, B विचिंतयम्हि. 14) =कार्योधन[=द्यत]योर्हृदयेऽन्यत् अगमनं. 15) =अस्माकं हृदये गमनं. 16) B हृदयास. 17) B घटतो. 18) B सरससस्नेह°. 19) B विचिंतवत्यसिन्मा°.

अह सो मए वि भणिओ कुमार एसोम्हं[1] परिणओ दियसो[2] ।
को लहइ तुम्ह दंसण-सुहस्स अमयस्स व[3] पमाणं ॥ ४०८
धण्णा ते जाण तुमं [4]अहणिसि पच्चक्ख-दंसणो सि सया ।
[5]अम्हं पि इहागमणेण [6]अज्ज सहलो इमो जम्मो ॥ ४०९
ता एक्कमेक्क तुम्हम्ह वसइ गमणागमेण [7]एत्ताहे । 5
अणुसीलिओ पवड्ढइ णेहो जह तह करेयव्वो[8] ॥ ४१०
एत्थम्ह महा-दिट्ठी-विसेहिँ [9]णाएहिँ [10]वोम-चारीहिं ।
[11]दूसंचारो मग्गो होही अत्थंगए सूरे ॥ ४११
तेण भयं मह हियए परिणमिओ वासरो विसज्जेह ।
दियसस्स को वि कालो कुमार णे संभरेज्जासु[12] ॥ ४१२ 10
भणियं च तेण भयवइ तुम्हेहि समं असंकियालावो ।
पुण्णमइयाण काण वि जायइ इह जीव-लोयम्मि[13] ॥ ४१३
ता अलमवरेण [14]पयंपिएण [15]एयं म्ह जं तए सिट्ठं ।
ता सोहणं कयं विसहराण मा [16]भाह एत्ताहे ॥ ४१४

मनीषितार्थोत्सुकयोर्हृदये अन्यत्पार्श्वस्थितानाम् अस्माकम् । चित्ते तदनयोर्नास्ति इत्यर्थः ॥ ४०७ ॥ 15 ४०८) अह सो – अथ सोऽपि मया भणितः कुमार एषोऽस्माकं परिणतो दिवसः प्रान्ते प्राप्तः । युष्मद्दर्शनसुखस्यामृतस्य च प्रमाणं परभागं को नाम लभते ॥ ४०८ ॥ ४०९) धण्णा – धन्यास्ते कृतपुण्यास्ते येषां सदा निरन्तरम् अहर्निशं रात्रिंदिवं प्रत्यक्षदर्शनोऽसि भवसि । अस्माकमप्यद्य भवतामत्रागमने इदं जन्म सफलं जातम् ॥ ४०९ ॥ ४१०) ता एक्कमेक्क – तावत् इत्ताहे इदानीं युष्माकम् 20 अस्माकं गमनागमनेनैक्यं[17] भवति एकरूपतास्ति । अयं स्नेहोऽनुशीलितः प्रतिपालितः यथा प्रवर्धते तथा कुर्याः ॥ ४१० ॥ ४११) एत्थम्ह – अत्रास्माकं सूर्येऽस्तंगते व्योमचारिभिर्महादृष्टिविषैर्नागैः सर्पैः मार्गः दुस्संचारो भविष्यति ॥ ४११ ॥ ४१२) तेण भयं – तेन कारणेन मम हृदये भयम् । परिणतो वासरोऽस्तंगतो दिवसः । विसृजतास्मान् प्रेषयत यावद्दिवसस्य कोऽपि कालोऽवशिष्यते इति । हे कुमार णे अस्माकं 25 संस्मरेः ॥ ४१२ ॥ ४१३) भणियं च – भणितं च तेन भगवति युष्माभिः सार्धमशङ्कितालापो जीवलोके इह केषांचित् पुण्यवतां जायते[18] ॥ ४१३ ॥ ४१४) ता अलमवरेण – तस्मादलं पूर्णम् अपरेण प्रजल्पितेन एतद्यदस्माकं पुरतो भणितं तत् शोभनं

---

1) B एसम्ह. 2) B दियहो. 3) B य. 4) P अहनिसि, J not specified, B अणमिस-. 5) PB अम्हं, J अज्जं. 6) PB अज्ज, J अम्ह. 7) = अतः परं. 8) B करिज्जासु. 9) = नागैः. 10) B वोमयारीहिं. 30 11) B दुस्संचारो. 12) B दूरे अलया नयरी कुमार णे संसरिज्जासु । for this second line. 13) B लोगंमि. 14) J पयंपियेण. 15) P एयम्ह, B एयंम्ह. 16) B भयइ for भाह. 17) B °नैक्ये. 18) B जायतां.

एसो खु पुरा भयवइ देवाण वि दुक्ख-संचरो मलओ ।
आसि महा-विस-णाओवरुद्ध-चंदण-वणाहोओ ॥ ४१५
दुप्परिहोज्जाइँ विहाविऊण ताएण सिद्ध-लोयस्स ।
चंदण-वणाइँ अहि-लंघियाइँ आराहिओ गरुलो ॥ ४१६
तेणेसो मह पिउणो दिण्णो णायारि णाम अंगुलिओ ।
गेण्हह पहवंति ण जेण तुम्ह ते विसहरा गयणे ॥ ४१७
अच्छंतु ताव ते वोम-चारिणो जे रसायले णाया ।
ताण वि विसं पणासइ दंसण-वह-संठिओ एसो ॥ ४१८
भणियं च मए ओप्पहँ कुमार एसो इमीए कुमरीए ।
हत्थाहत्थुवणीओ णीसेस-विसावहो होइ[13] ॥ ४१९
एवं सोऊणं सलज्ज-वयण-संगलिय-सेय-सलिलेण ।
उवलक्खासंके-णिरुद्ध-भाव-णिहुयं मणे हसियं ॥ ४२०
तो हत्थ-फंस-सुह-लालसेण अप्पा समप्पमाणेण ।
वामेण दाहिणं पीडिऊण हत्थेण से हत्थं ॥ ४२१

कृतम् इदानीं विषधरेभ्यो महानागेभ्यो मा बिभित मा भयं कुरुत । 'इण्हिं इत्ताहे इदानीमः' [हैम० ८-२-१३४] इत्ताहे ॥ ४१४ ॥ ४१५) एसो खु – हे भगवति पुरा पूर्वं सुनिश्चितं महाविषनागोपरुद्धचन्दनवनाभोगः एष मलयः शैलो देवानामपि दुःसंचार्यः आसीत् ॥ ४१५ ॥ ४१६) दुप्परिहोज्जाइं – तातेन मत्पित्रा अहिलङ्घितानि सर्पवेष्टितानि चन्दनवनानि सिद्धलोकस्य दुःपरिभोग्यानि विभाव्य गरुडः आराधितः सेवितः ॥ ४१६ ॥ ४१७) तेणेसो – तेन गरुडेन मम पितुर्मज्जनकस्य नागारिः नाम अङ्गुलीयको दत्तः मुद्रारत्नं दत्तम् । गृहीत भवन्तोऽपि । तेन भवतां गगने विषधरा न प्रभवन्ति नोपद्रवं करिष्यन्ति इत्यर्थः ॥ ४१७ ॥ ४१८) अच्छंतु – तिष्ठन्तु तावत्ते व्योमचारिणो नागाः । ये रसातले पाताले सन्ति दर्शनपथसंस्थितेऽमुष्मिन् तेषामपि विषं प्रणश्यति ॥ ४१८ ॥ ४१९) भणियं च – भणितं च मया, कुमार अर्पय, एषो अमुष्याः कुमार्याः [18]हस्ताहस्तोपनीतो निःशेषविषापहो भवति । स्वहस्तादेतस्या हस्ते क्षिप्तमिदं मुद्रारत्नं बाह्यमाभ्यन्तरं च विषम् अपहरिष्यतीति भावः ॥ ४१९ ॥ ४२०) एवं सोऊण – एवं श्रुत्वा सलज्जवचनसंगलितस्वेदसलिलेन कुमारेण उपलक्ष्य तदुक्तमवगम्याशङ्कानिरुद्धभावनिभृतं मनसि हसितं स्मितं कृतम् । भावश्चित्ताभिप्रायस्तेन निभृतं गुप्तम् ॥ ४२० ॥ ४२१-२२) तो हत्थ – ततो

1) B वि. 2) =आसीत. 3) PB वणाभोउ, J वणाहो°. 4) =दुःपरिभोग्यानि, P °भोज्जाई, J °होज्जा°, B °भुजाइ. 5) P विभाविऊण, JB विहावि°. 6) B आराहिउ. 7) J ताम्ब. 8) B पह. 9) B भए (=मए) य for च मए. 10) PB अप्पह, J उप्पह. 11) P °हत्थुवणाउ, J हत्थवणीउ, B हत्थवणीओ. 12) =विषापहो भवति. 13) B होउ. 14) B भणिऊण 15) B °सग. 16) PJB निरुद्ध. 17) B नागारि. 18) B हस्तो हस्तो°.

णिमिओ[1] कणिट्ठ-जेट्ठंगुलीए सुइरेण तेण अंगुलिओ ।
जह तह[2] अम्हेहिँ वि[3] एक्कसेक्क-णिहुयं[4] मणे हसियं ॥ ४२२

तो तस्स मियंकस्स व कर-फंस-समुग्गएण सेएण ।
ससिमणि-घडिया वाउल्लिय[5] व वारीमई[6] जाया ॥ ४२३

तो[7] तक्खण-विविह-विलास-सोह-सुपसाहियं[8] सरीरं से ।
अण्णमयं[9] पिव घडियं वियंभमाणेण मयणेण ॥ ४२४

तो सज्झस-वस-परिवेविरीए अवलंबिऊण[10] कंठम्मि ।
सा माहवीलया भट्टउत्त भणिया इमीए तहिं ॥ ४२५

किं भणिमो सहि सव्वोवयार-णिव्वाहिरं म्ह[11] तइँ समयं[12] ।
हियं तहा वि भण्णसि एक्कसि[13] मं[14] सच्चविज्जासु ॥ ४२६

अह सायरेण[15] बहुसो सिणेहमइएहिँ सोवयारेहिं ।
वयणेहिँ महाणुमईए णत्थि तं जं ण सा भणिया ॥ ४२७

हस्त[16]स्पर्शसुखलालसेनात्मानमिव समर्पयता वामेन हस्तेन से तस्या दक्षिणं हस्तं पीडयित्वा ॥ [णिमिओ-] सुचिरेण तेन कुमारेण तथा कनिष्ठाप्रत्यासन्नाङ्गुल्याम् अङ्गुलीयको न्यस्तो निवेशितो यथा अस्माभिरप्येकैकं निभृतं चित्ते हसितम् । युग्मम्[17] ॥ ४२१-२२ ॥ **४२३) तो तस्स** – ततस्तस्य माधवानिलस्य मृगाङ्कस्येव करस्पर्शसमुद्गतेन स्वेदेन शशिमणिघटिता वाउल्लिय[18] व चन्द्रकान्तमयी पुत्तलिकेव सा कुमारी वारिमयी जाता स्वेदद्रवार्द्रा संपन्ना सात्त्विकभावेनेति । मृगाङ्कश्चन्द्रः । कराः किरणा हस्ताश्च ॥ ४२३ ॥ **४२४) तो तक्खण** – इति तत्क्षणविविधविलासशोभासुप्रसाधितं तस्याः शरीरं विजृम्भमाणेन कामेनामृतमयमिव घटितं सुतरां शोभायमानं कृतमित्यर्थः । प्रसाधितं मण्डितम् ॥ ४२४ ॥ **४२५) तो सज्झस** – ततः साध्वसवशपरिवेपमानया अनया तत्र सा माधवीलता हे भट्टपुत्र कण्ठेऽवलम्ब्यालिङ्ग्य भणिता ॥ ४२५ ॥ **४२६) किं भणिमो** – किं भणामः किमधिकं निवेदयामः । सखि अस्माकं हृदयं त्वया समकं सार्धं सर्वोपचारनिर्बाह्यं सर्वोपचारैः भक्तिरागैर्निर्गतम् । त्वया सह संलग्नमित्यर्थः । तथापि भण्यसे इक्कसि एकदा सत्यापयेः पश्येः ॥ ४२६ ॥ **४२७) अह सायरेण** – अथ बहुशोऽनेकधा सादरैः स्नेहमयैः सोपचारैः सगौरवैर्वचनैः तन्नास्ति यन्महानुमत्या

---

1) B णिसिओ. 2) B तह जह. 3) P अम्हेहि वि, J अम्हेहिम्वि, B अम्हेहि व. 4) P °मेक्कं विहु°. J °मेक्कणिहु°, B °मिक्कणिहु°. 5) = पुत्तलिका, B perhaps यढिउल्लिय व्व. 6) = जलमयी. 7) B इय for तो. 8) B सुयसा°. 9) PB अमयमयं, J अण्णमयं. 10) B अविलंबिऊण 11) = त्वयि, PB तइ, J तई. 12) = समदं. 13) = एकशः. 14) B मे. 15) P सायरेहिं, JB सायरेण. 16) B दक्ष for हस्त. 17) B युग्मम् is put at the end of the two gathās and then follows the commentary. 18) B °घटिया ताढिउल्लिउव्व.

भणियं च तीए सामिणि मा एवं भणसु मह मणो चेयं[1] ।
तुह चलण-कमल-दंसण-समूसुओ कीस गरुएसि[2] ॥ ४२८

इय एवं भणिरीए लग्गइ कंठम्मि दढयरं[3] जा ते ।
ता[4] सो सिद्ध-कुमारो मण्णइ आलिंगिओ त्ति अहं ॥ ४२९

तो अलया-गमण-सुहंकरेहिँ वयणेहिँ तोसियाए तहिँ ।
दिण्णो इमीएँ तिस्सा भाउय थूलामलो हारो[5] ॥ ४३०

एवं तं तत्थ विसज्जिऊण माहविलयं[6] समुच्चलिया ।
णियय-विमाणाहुत्तं[7] सव्वेण वि परियणेण समं ॥ ४३१

सहि-यण-तोरवियाएँ वि ण चलइ समयं पहावियाँ[8] तत्तो ।
अणियत्तंतं[9] चित्तं पडिवालइ अणुगया दिट्ठी ॥ ४३२

मा गम्मउ त्ति उवयार-कमल-संका-मिलंत-मुहलेहिँ ।
चलणालग्गेहिँ खणं णिरुंभमाण[10] व भमरेहिँ ॥ ४३३

अल्लियइ[11] जा विमाणं अहं पि से तं तह च्चियं[12] कुमारं ।
आउच्छिऊण[13] सुइरं सहस त्ति विमाणमारूढा ॥ ४३४

सा न भणिता ॥ ४२७ ॥ ४२८) भणियं च – भणितं च तया स्वामिनि मा एवं भण मम मन एव तव चरणकमलदर्शनसमुत्सुकम् । वर्तते इति शेषः । किमिति गुरूकरोपि मच्चित्तम्[14] इति ॥ ४२८ ॥ ४२९) इय एवं – इत्येवं भणन्त्यास्तस्याः यावत्सिद्धकुमारः कण्ठे लगति दृढतरं तावदहम् आलिङ्गितः इति मन्यते ॥ ४२९ ॥ ४३०) तो अलया – ततोऽलकागमनसुखंकरैर्वचनैस्तोपितयानया तत्र तस्याः हे भ्रातः स्थूलामलो हारो दत्तः । स्थूलो गरीयान् अमलो निर्मलश्च ॥ ४३० ॥ ४३१) एवं तं – एवं [15]तां तत्र माधवीलतां[16] विसृज्य सर्वेण परिजनेन समं निजविमानं प्रति समुच्चलिता । प्रतेराहुत्तः इत्याहुत्तः ॥ ४३१ ॥ ४३२) सहियण – सखीजनत्वरितापि सा ततः समकं प्रधावितुं न चलति । अनुगता दृष्टिरनिवर्तमानं चित्तं प्रतिपालयति प्रतीक्षते । स्नेहाद्दृष्टिश्चित्तं च न चलतीत्यर्थः ॥ ४३२ ॥ ४३३–३४) मा गम्मउ – उपचारकमलशङ्कामिलन्मुखरैः पुष्पप्रकरभ्रान्त्या चरणालग्नैर्भ्रमरैर्मा गम्यताम् इतः इति क्षणं निरुध्यमानेव[17] ॥ [अल्लियइ –] यावद्विमानमालीयते उपविशति तावदहमपि से माधवीलतायास्तथैव च कुमारमापृच्छ्य मुत्कलाप्य[18] सुचिरं सहसा विमानमारूढा ।

---

1) B अहियं for चेय. 2) = गौरवयसि. 3) B दिढयरं. 4) B तो. 5) P °मलाहारो, JB °मलो हारो. 6) B माहविलया. 7) = विमानाभिमुखं, PB °हुत्तं, J °होत्तं. 8) = ततः समं, B पहाविउं. 9) = अनिवर्तमानं. 10) J °माणव्व. 11) = यावन् विमानमारोहति. 12) B तहि च्चिय. 13) PB आपुच्छि°, J आउच्छि°. 14) B मच्चित्त इति. 15) B तो. 16) B °लतो. 17) B °माने च. 18) B मुकलाप्य.

हिययाणुवालणा[1]धाविएहिँ णयणेहिँ तद्दिसाहुत्तं ।
अलयं [2]उप्पुट्ठ-मुहीओ कह वि अम्हे हि[3] पत्ताओ ॥ ४३५

ताव य वियड-[4]णहंगण-गमण-वसायास-वियलियंसु-[5]भरो ।
णित्थामो [6]अवर-महीहरेंद-सिहरं गओ सूरो ॥ ४३६

आमुक्क-गयण-[7]मग्गो जणस्स दिट्ठीए लंघिओ सूरो ।
सिढिलिय-णिय-संठाणा गरुया वि [8]पराहवमुवेंति ॥ ४३७

अत्थायंतो वि हु अत्थ-सिहरिणा धारिओ सिरेण रवी ।
सूरो [9]अपच्छिमाए [10]दिसाए जण-वल्लहो होइ ॥ ४३८

उव्वहइ अत्थ-सेलो परिसर-परिसेस-पलहुय-मऊहं ।
परिपिंग-[11]केसरड्ढं कंचण-कमलं व रवि-बिंबं ॥ ४३९

दंसण-जोग्गं पि रहंग-मिहुण-दुव्विसह-दंसणं जायं ।
बिंबं [12]वियड-णहासोय[13]-कुसुम-[14]गुंछारुणं रविणो ॥ ४४०

णवरि [15]य कमेण जलणिहि-वेला-जल-विलुलिओ[16] [17]समोसरइ ।
तड-[18]पूइय-रुद्द-जवा-पसूय-पुंजो व्व दिवसयरो ॥ ४४१

---

[19]यमलम् ॥ ४३३–३४ ॥ ४३५) हिययाणु – हृदयानुपालनात् चित्तव्यावर्तनेन तद्दिङ्मुखं चालितैर्नयनैरूर्ध्वमुख्यो वयं कथमपि अलकां प्राप्ता स्वनगरीम् ॥ ४३५ ॥ ४३६) ताव य – तावता विकटनभोगमनवशायासविगलितांशुभरः सूर्यो निःस्थामो[20] निर्बलो निस्तेजाः अपरमहीधरेन्द्रशिखरं गतः ॥ ४३६ ॥ ४३७) आमुक्क – आमुक्तगगनमध्यस्त्यक्तव्योमाङ्गणः सूर्यो जनस्य दृष्टेर्लङ्घितो दूरीभूतः । शिथिलितनिजसंस्थानाः परित्यक्तस्वास्पदा गुरुका अपि महान्तोऽपि पराभवं प्राप्नुवन्ति ॥ ४३७ ॥ ४३८) अत्थायंतो – रविरस्तम् अयन्नपि अस्तशिखरिणा शिरसा धारितः । अर्थान्तरन्यासमाह । सूरोऽपि पश्चिमायां दिशायां जनवल्लभो भवति । शूरः पराक्रमी पुमान् पश्चिमदिशायां संकटे पतिते निस्तारकत्वात् सर्ववल्लभो भवतीति युक्तं शिरसि धारणमस्य ॥ ४३८ ॥ ४३९) उव्वहइ – अस्तशैलः परिसरपरिशेषप्रलघुमयूखं परिपिङ्गकेसराढ्यं रविबिम्बं सूर्यमण्डलं काञ्चनकमलमिवोद्वहति ॥ ४३९ ॥ ४४०) दंसणजोग्गं – विकटनभोऽशोककुसुमगुच्छारुणं रवेर्बिम्बं दर्शनयोग्यमपि रथाङ्गमिथुनदुर्विषहं जातम् । चक्रवाकयुग्मदुःसहं संपन्नं रजन्यां भाविवियोगत्वात् ॥ ४४० ॥ ४४१) णवरि य – नवरि

---

1) B perhaps चालिएहि for धाविएहिं. 2) = उत्पृष्टमुख्याः, B उड्ढमुहीउ कहं पि अम्हे वि पत्ताउ ।. 3) P हिं, B वि. 4) PJB °नहं°. 5) B हरो. 6) B अत्थमहीहरंमि सिहरं. 7) B मगारा [perhaps मज्झो]. 8) B पराहविज्जंति. 9) B सूरो वि प°. 10) B दिसाइ. 11) P केसरट्ठं, JB केसरड्ढं. 12) = विकट. 13) = नभ एव अशोकः. 14) B गुत्थारुणं. 15) P निवडिय, JB णवरिय. 16) P विलुलिओ, J विलुलिय, B विलुलिउं. 17) B समोसरउं. 18) B पूआरद्दयजवापसूणपुंज व्व दियसयरो ।. 19) See p. 75, note 17, but यमलम् for यु°. 20) B निस्थिरमा.

रवि-णिवडण-विहडिय-जलहि-सलिल-पायडिय[1]-रयण-कंति व्व ।
संगलण[2]-मासला णहयलम्मि[3] संझा[4] समुल्लसिया ॥ ४४२

काल-परिणाम-सिढिलस्स[5] सहइ णह-तरु-फलस्स दिणवइणो ।
अत्थइरि-सिला-वडणुच्छलंत-रस-सच्छहा संझा[6] ॥ ४४३

5 जायं पविरल-तिमिराणुविद्ध[7]-संझा-पहा-परिक्खित्तं ।
मय-भिण्ण-सामली-गंड-वास-कसणारुणं गयणं ॥ ४४४

ओहुत्त-गरुय[8]-दिवसयर-बिंब-भर-कड्डिया[9] इव मिलंति ।
गो-रेणु-संवलिज्जंत[10]-तिमिर-कलुसा दिसाहोया[11] ॥ ४४५

मुह-घडिय-वियड-रवि-कणय-पिंड-भारोणयग्ग[12]-भाएण ।
10 कसण-तुला-दंडेण व तमेण गयणे समुल्लसियं ॥ ४४६

जामिणि-वयणं वसुयाय-थोय[13]-परिकसण-कुंकुम-च्छायं ।
संझावसेस[14]-संवलिय-विरल-तिमिर-प्पहं सहइ ॥ ४४७

अनन्तरं क्रमेण जलनिधिवेलाजलविलुलितो दिवसकरः सूर्यः तटपूजारचितजपाप्रसून-पुञ्ज इव समवसरति ॥ ४४१ ॥ **४४२) रविणिवडण** – रविनिपतनविघटितजलधि-15 सलिलप्रकटीकृतरत्नकान्तिरिव । संगलनमांसला नभस्तले संध्या समुल्लसिता ॥ ४४२ ॥ **४४३) कालपरिणाम** – कालपरिणामशिथिलस्य नभस्तरुफलस्य दिनपतेरस्तंगिरिशिला-पतनोच्छलद्रसप्रभा संध्या शोभते ॥ ४४३ ॥ **४४४) जायं पविरल** – प्रविरल-तिमिरानुविद्धसंध्याप्रभापरिक्षिप्तं[15] गगनं मदभिन्नश्यामलागण्डपार्श्वकृष्णा[16]रुणं जातम् । श्यामा स्त्री गजघटा च । मदो दानं मदिरा च । गजकपोलो हि मदेन श्यामः सिन्दू-20 रेणारुणश्च भवति । श्यामा च स्त्री क्षीबा सती कृष्णारुणा भाव्यते । अन्धकारमिश्रा हि संध्या अत एव गजघटया मदोन्मत्तस्त्रिया चानुमिता ॥४४४॥ **४४५) ओहुत्त** – गोरेणुसंवलिततिमिरकलुषा दिगाभोगा अधोमुखगुरुकदिवसकरबिम्बभरकर्षिता इव मिलन्ति । गोधूलिमिश्र्यमाणतमोमलिना दिशः संपिण्डिता[17] इव लक्ष्यन्ते ॥ ४४५ ॥ **४४६) मुहघडिय** – गगने आकाशे मुखघटितविकटरविकनकपिण्डभारावनताग्रभागेन 25 कृष्णतुलादण्डेनेव तमसा समुल्लसितम् ॥ ४४६ ॥ **४४७) जामिणि** – संध्यावशेष-संवलितविरलतिमिरं *नभः परिकृष्णकुङ्कुमच्छायं सकज्जलाश्रुयामिनीवदनमिव शोभते

---

1) =प्रकटित. 2) =संकलनेन वहुला. 3) P मयलंमि, JB णहयलम्मि. 4) B संजा. 5) B सिढिलिय. 6) B संजा. 7) B °णुवद्धसंजापहायपरिकत्ते. 8) P अत्थयरिहुंतदि°, J ओहुत्तगरुयदि°, B उवहुत्तगरुअदि°. 9) P perhaps कट्टिया. 10) P संवलिज्जंति, JB संवलिज्जंत. 11) P दिसाभोया, JB दिसाहोया. 12) P पिंडभरणामियग्ग, JB पिंडभारोणयग्ग. 13) =पांशुपातस्तोकपरिकृष्णः, P वसुवायच्चोयपरि°, J वसुयायथोयपरि°, B व सकज्जलसु[=लंसु]परि°. 14) B संजावसेससंगलियविरलतिमिरे णहं. 15) B °परिक्षिप्ते. 16) B गंडवासकृष्णा.° 17) B सपिण्डिता.

रवि-[1]कण्णियम्मि वियडे मउलायंतम्मि [2]दियस-सयवत्ते ।
उड्डीण-[3]भमर-णियरो ब्व पसरिओ तिमिर-संघाओ ॥ ४४८
वेढिज्जइ[4] णियडोसहि-[5]विडवे [6]व्वं रविम्मि काल-परिणमिए ।
णह-चंदण-रुक्खो कसण-विसहरेणं पिव तमेण ॥ ४४९
[7]सूरायव-कमल-वणम्मि मउलिए फुरिय-तारया-कुमुयं ।　　5
दर-[8]दिट्ठ-तिमिर-सलिलं जायं सर-संणिहं गयणं ॥ ४५०
रवि-णिवडण-[9]विहडिय-जलहि-सलिल-[10]मग्गुग्गएण णीसेसं ।
[11]वडवाणल-[12]धूमेणं व तमेण [13]पच्छाइयं गयणं ॥ ४५१
तो[14] सजल-जलहराहिँ [15]वँ विणिम्मिओ अलि-उलाहिँ उप्पण्णो[16] ।
कलयंठि-कंठ-[17]कसणो [18]पवड्ढिओ तिमिर-संघाओ ॥ ४५२　　10
तममयमिव गयणयलं अंजण-णिम्मज्जि[19]याओ व दिसाओ[20] ।
कोसि[21]य-रुयाणुमेयं जायं रण्णं व [22]वंण-गहणं ॥ ४५३
अह दीसिउं[23] पय[24]त्ता सेलंतरियस्स रयणि-णाहस्स ।
पढमुल्लसंत-परिवियड-धवल-र[25]ह-धय-वड-च्छाया ॥ ४५४

॥ ४४७ ॥　४४८) **रवि**—रविकर्णिके विकटे दिवसशतपत्रे दिनकमले मुकुलायमाने उड्डीनभ्रमरनिकर इव तिमिरसंघातः प्रसृतः । रविरेव कर्णिका बीजकोशोऽत्रेति ॥ ४४८ ॥　४४९) **वेढिज्जइ**—नभश्चन्दनवृक्षः कृष्णविषधरेणेव तमसाऽन्धकारेण वेष्ट्यते । कस्मिन् सति । विकटौषधिविटप इव रवौ कालपरिणते सति ॥ ४४९ ॥　४५०) **सूरायव**—सूर्यातपकमलवने मुकुलिते स्फुरिततारकाकुमुदम् । दरदृ[26]ष्टतिमिरसलिलं सरःसंनिभं गगनं जातम् ॥ ४५० ॥　४५१) **रविणिवडण**—रविनिपतनविघटितजलधिसलिलमार्गोद्गतेन वडवानलधूमेनेव [तमसा] गगनं निःशेषं समन्तात् समुल्लसितम् ॥ ४५१ ॥　४५२) **तो सजल**—तावता सजलजलधरै*रिव निर्मितः अलिकुलादिवोत्पन्नः । कलकण्ठीकण्ठकृष्णस्तिमिरसंघातः प्रवर्धितः ॥ ४५२ ॥ ४५३) **तममयमिव**—गगनतलं तमोमयमिव जातम् अञ्जननिर्माजिता इव जाता दिशः । कौशिकरुतानुमेयं च भुवनतलमरण्यमिव जातम् । दिशोऽञ्जननिर्माजिता लिप्ताः । कौशिका उलूकाः ॥ ४५३ ॥　४५४) **अह दीसिउं**—अथानन्तरं शैलान्तरितस्य

1) =कर्णिका. 2) PB दिवस, J दियस. 3) P उड्डीणभमरनियरो व्व, J उड्डीणभमरणियरो व्व, B उड्डीणभवरणियरु व्व. 4) =वेष्ट्यते, J वेढिज्जइ. 5) =ओषधिविटाए[=टपे]नेव, B वियडो. 6) B विड व्व रविबिंबकाल°. 7) =सूर्यातप. 8) P दिट्ठि, JB दिट्ठ. 9) J णिव्विडण. 10) =मार्गोद्गतेन. 11) PJB वडवानल. 12) B धूमेणेव 13) B अच्छाइयं. 14) B ता. 15) P °हराहिं व, J °हराहिम्व, B जलहरेहि व. 16) PJB उप्पन्नो. 17) B किसणो. 18) P पवढ्ढिओ, J पवट्टिओ, B पवड्डिउ. 19) B णिमजियाउ व. 20) PB दिसाउ, J दिसाओ. 21) P कोसिसय°, JB कोसिय°. 22) P रत्तं व गयणयलं, J रण्णं व वणगहणं, B रन्नं व भुवणयलं. 23) P दीसिउं, J दिसियं, B दीसंति. 24) B पवत्ता. 25) B हर for रह. 26) B दरदिट्ठ.

दीसइ पेरंते तम-भरस्स परितलिण-ससहरालोओ ।
सयण-ट्ठिय-महुमह-रुद्ध-सेस-दुद्धोदहि[1]-जलं व ॥ ४५५
उम्मुह-फुरंत-पविरल-ससि-किरणालिहण-कव्बुरो सहइ[2] ।
तम-णिवहो तंसोसरिय[3]-णिज्झरो विंझ-सेलो व्व ॥ ४५६
तो जाया उययंतरिय-ससहरारुण-मऊह-विच्छुरिया[4] ।
कुवियाहिसारियायंव[5]-[6]दिट्ठि-भिण्णं[7] व पुव्व-दिसा ॥ ४५७
एत्थंतरम्मि एसा णीसेसं सहि-यणं[8] विसज्जेउं ।
वासहरमुवगया मयण-वाण-पहराउरावयवा[9] ॥ ४५८
ताव अहं पि[10] चिरागमण-संक-परिवेविरेण हियएण ।
अंबाए वसंतसिरीए पाय-मूलं समल्लीणा ॥ ४५९
भणिया य पुत्ति किं तुम्ह अज्ज णिय-मंदिरं पि विम्हरियं[11] ।
तो[12] कहसु कत्थ [13]रमियं किं वा भमियं[14] चिरं जेणं[15] ॥ ४६०
सिट्ठं च मए अंबम्हि[16] अज्ज मलयायलम्मि रमियाओ ।
चंदण[17]-तरु-सिहरारूढ-माहवी-कणइ[18]-डोल-हरे ॥ ४६१

रजनिनाथस्य चन्द्रमसः प्रथमोल्लसदुपरिविकटधवलगृहध्वजपटच्छाया दर्शयितुं प्रवृत्ता दृग्गोचरीभूतेत्यर्थः ॥ ४५४ ॥ ४५५) **दीसइ** – तमोभरस्य पर्यन्ते परितलिनशशधरालोकः शयनस्थितमधुमथनरुद्धशेषदुग्धोदधिजलमिव दृश्यते । शेषमुभयदिग्विक्षिप्तम् ॥ ४५५ ॥ ४५६) **उम्मुह** – उन्मुखस्फुरत्प्रविरलशशिकिरणालिखनकर्बुरस्तमोनिवहः पार्श्वोत्सारितनिर्झरः विन्ध्यशैल इव शोभते । विन्ध्यो हि श्यामलवर्णः प्रसिद्धः ॥ ४५६ ॥ ४५७) **तो जाया** – ततः उदकान्तरितशशधरारुणमयूखभिद्यमाना पूर्वा दिक् कुपिताभिसारिकावृन्ददृष्टिभिन्नेव जाता ॥ ४५७ ॥ ४५८) **एत्थंतरम्मि** – अत्रान्तरे मदनवाणप्रहारातुरा एषा वाला निःशेषसखीजनं विसृज्य वासगृहमुपगता ॥ ४५८ ॥ ४५९) **ताव अहं** – तावताहमपि चिरागमनशङ्कापरिवेपमानेन हृदयेनाम्बायाः वसन्तश्रियः पादमूलं गता ॥ ४५९ ॥ ४६०) **भणिया** – भणिता च हे पुत्रि किं युष्माकम् अद्य निजमन्दिरमपि विस्मृतम् । तस्मात्कथय कुत्र भ्रान्ता किं वा रतं येन हेतुना अत्रागमने चिरं कृतम् ॥ ४६० ॥ ४६१) **सिट्ठं च** – शिष्टं[19] च कथितं च मया अम्ब वयमद्य चन्दनतरुशिखरारूढमाधवीलतादोलागृहे मलयाचले रताः क्रीडिताः ॥ ४६१ ॥

---

1) P दुद्धोदहि, J दुद्धोअहि, B दुद्धोदधि. 2) J सरइ. 3) B पासो° for तंसो°. 4) PB विच्छरिया, J विच्छुरिया. 5) P °सारियायंव, B °सारियाविंद. 6) = आतांम्बु[=ताम्र]. 7) PJB भिन्न. 8) J णियं for यणं. 9) P °रावयरा, J °रावयवा, B °रा वाला. 10) P विराग°, JB चिराग°. 11) B वीसरियं. 12) B ता. 13) B भसिया. 14) B रइमियं. 15) J तेण. 16) P अंवंम्हि, J अम्बम्हि, B अंबम्हि. 17) P वंदण, JB चंदण. 18) = लता, B कणयदोलहरे 19) B यद् युष्म शिष्टे च कथितं.

जं तुम्ह पाय-मूलं एण्हिं ण समागया महाणुमई ।
तं सुइरंदोलण-खेयं-संग-सुंढियाइँ अंगाइं ॥ ४६२
एवं सोऊण अहं अंबाए विसज्जिया तहिं चेय ।
णवर ण दिट्ठा एसा तत्थ मए वास-भवणम्मि ॥ ४६३
परिचिंतियम्हि अंबो कत्तो सा मयण-बाण-तवियंगी ।
अच्छइ विणा वि अम्हेहिं जाणियं अहव किं अण्णं ॥ ४६४
जह एवं विवस-सरीर-चलण-वलि-विसम-भंगुरं सयणं ।
एवं च एत्थ कुसुमोवयार-मलियं कु-देसयलं ॥ ४६५
तह सयणाओ भूमी भूमीएँ पुणो वि संगया सयणं ।
सयणाहि वि चंद-मऊह-सीयलं भवणमारूढा ॥ ४६६
परिचिंतिऊण एयं सिणेह-वस-कायरेण हियएण ।
वहुसो परिभावंती मणि-भवणमहं समारूढा ॥ ४६७
तांव य उयय-धराहर-सिहर-ट्ठिय-ससि-मऊह-भिज्जंतो ।
पइसरइ गुहा-विवरंतरेसु सो तिमिर-संघाओ ॥ ४६८
णिम्मल-तारा-कुसुमोवसोहियं उयय-सेल-सिहराहिं ।
पसरियं-मऊह-वक्खो ससि-हंसो णह-सरं विसइ ॥ ४६९

४६२) **जं तुम्ह** — यद् युष्मत्पादमूलं महानुमती सांप्रतं न समागता । तत्सुचिरान्दोलन-खेदसंगखिन्नान्यङ्गानि । अतो नागतेति ॥ ४६२ ॥ ४६३) **एवं सोऊण** — एवं श्रुत्वाहमम्बया तत्रैव विसृष्टा । नवरं तत्र वासभवने मयैषा महानुमती न दृष्टा ॥ ४६३ ॥ ४६४) **परिचिंतियम्हि** — परिचिन्तितवत्यस्मि । अंबो इति खेदे । अस्माभिर्विना सा मदनबाणतप्ताङ्गी कं विद्यते अथवा ज्ञातं किमन्यत् ॥ ४६४ ॥ तदेवाह । ४६५–६७) **जह एवं** — यथैतद्विवशशरीरवलनवलिविषमभङ्गुरं शयनम् एतच्चात्र कुसुमोपचारमलितं[18] कुदेशतलं महीतलम् । विवशः परवशः । कामेनेति ॥ [**तह** –] यथा शयनाद्भूमौ संगता भूमेः पुनरपि शय्यासंगता शयनादपि चन्द्रमयूखशीतलं भवनं प्रासादमारूढा ॥ [**परिचिंतिऊण** –] एवं परिचिन्त्य स्नेहवशकातरेण हृदयेन बहुशः परिभावयन्ती विमृशन्ती अहं मणिभवनं समारूढा । कुलकम् ॥ ४६५–६७ ॥ ४६८) **ताव य** — तावता उदयधराधरशिखरस्थितशशिमयूखभिद्यमानस्तथा तिमिरसंघातः गुहाविवरान्तरेषु प्रतिसरति गच्छति ॥ ४६८ ॥ ४६९) **णिम्मल** — शशिहंसः प्रसृतमयूखपक्षः उदय-

1) P इन्हिं, J एण्हिं, B इम्हिं. 2) B खेद. 3) = श्रान्तानि. 4) Instead of this gāthā, B reads No. 467 here, though the Sanskrit commentary is rightly placed. 5) = आश्चर्ये. 6) P तिणा, JB विणा. 7) B एयं. 8) B जह. 9) P भूमीओ, J भूमीए, B भूमीउ. 10) J मयूह. 11) B °भवणं अहं. 12) P would separate ताव and य. 13) P उअय, J not specified, B उदय. 14) P पेसरियं, JB पसरिय. 15) P मयूह, JB मऊह. 16) B णहसरे वसइ. 17) B अस्माविना. 18) B मलिते कुदेशतले महीतले.

दीहं-मुणालेहिँ व पसरिएहि किरणेहिँ पियइ हरिणंको ।
भुयणंतराल-सर-मज्झ-संठियं तम-जलुप्पीलं ॥ ४७०
पिय-विरहे जलणायंति ससि-यरा इय कहेइ अम्हाणं ।
घर-दीहियाए संकुइय[2]-कमल-मुह-मंडला णलिणी ॥ ४७१
पविरल-दंसण-सीलेण होइ पेम्मं[3] सुदूसहं इमिणा ।
इय कलिऊण य णलिणी ससि-संग-परम्मुही जाया ॥ ४७२
तं वम्मह-बाण-णिसाण-वट्टयं ससहरं णिएऊणं ।
परिचिंतियम्हि हियए विस-विसमो विरहिणीण इमो ॥ ४७३
तो तत्थ मए एसा दुव्विसहाणंग-बाण-तवियंगी ।
फलिहं-मणि-कुट्टिमुच्छंग-संगया झत्ति सच्चविया ॥ ४७४
उवसप्पिऊण पासं हत्थेहिँ परवसाइँ अंगाइं ।
परिमासिऊण भणिया पिय-सहि कीसेरिसो ताओ ॥ ४७५
कीस तुमं सहि एयं सेज्जाहरयं तहिं पमोत्तूण ।
इह फलिह-सिला-मणि-कुट्टिमंग-संगं पवण्णासि ॥ ४७६
किं वा एयं उज्जाण-कुसुम-संदोह-सीयलं पवणं ।
अग्घायंती पिय-सहि ऊंससियव्वं पि विम्हरसि[16] ॥ ४७७

शैलशिखरात् निर्मलताराकुमुदोपशोभितं नभःसरोवरं विशति ॥ ४६९ ॥ ४७०) दीह – हरिणाङ्को दीर्घमृणालैरिव प्रसृतैः किरणैर्भुवनान्तरालसरोमध्यसंस्थितं तमोजलोत्पीडं पिबति ॥ ४७० ॥ ४७१) पिय – गृहदीर्घिकायां संकुचितकमलमुखमण्डला नलिनी प्रियविरहे शशिकरा ज्वलनायन्ते इत्यस्माकम् आलपतीव ॥४७१॥ ४७२) पविरल – प्रविरलदर्शनशीलेन दृष्टनष्टदर्शनेनामुना चन्द्रमसा सह प्रेम सुदुःसहं कष्टतरं भवति । इति ज्ञात्वैवं नलिनी शशिसंगपराङ्मुखी जाता । अपरापि विदग्धवनिता क्षणरागिणी नानुरज्यते ॥ ४७२ ॥ ४७३) तं वम्मह – तं मन्मथबाणनिशानपट्टं शशधरं दृष्ट्वा चिन्तितवत्यस्मि । अहो एष चन्द्रो विरहिणीनां विषविषमो मारणात्मकः इति । निशानपट्टम् उत्तेजनशिलापट्टः ॥ ४७३ ॥ ४७४) तो तत्थ – ततः तत्र मयैषा दुर्विषहानङ्गतापतप्ताङ्गी । स्फटिकमणिकुट्टिमोत्संगसंगता झटिति दृष्टा ॥ ४७४ ॥ ४७५) उवसप्पिऊण – पार्श्वं समीपम् उपसर्प्य परवशान्यङ्गानि हस्ताभ्यां परिमार्ज्य स्पृष्ट्वा भणितं किमेतादृशस्तापः ॥ ४७५ ॥ ४७६) कीस तुमं – सखि किमिति तत्र त्वमेतच्छय्यागृहं प्रमुच्येह स्फटिकशिलामणिकुट्टिमाङ्गसंगं प्रपन्नासि ॥ ४७६ ॥ ४७७) किं वा – किं वा उद्यान-

1) = दीर्घ. 2) B सेकुचिय [= संकुचिय]. 3) P पेमं, J पिम्म, B पिम्मं. 4) P सासि°, JB सस°. 5) = ज्ञात्वा. 6) P °चिंतियंम्हि, J °चिंतियम्हि, B °चिंतियंमि. 7) B अव्वो for हियए. 8) = स्फटिक. 9) = विलोकिता. 10) B भणियं. 11) B किं एरिसो तावो. 12) P कुट्टिमंमि, JB कुट्टिमंग. 13) = जिघ्रंती. 14) = उच्छ्वासमपि. 15) B विम्हरिसं 16) B reads something like झालायतीव.

किं वा वहु-कुसुमासव[1]-पाण-पमत्तालि-वहल-झंकारं ।
सोऊण सज्जं-डक्कं व झत्ति अंगं समुक्खिवसि ॥ ४७८

ससहर-कर-णियरालुंखियाइँ[3] सिसिरे वि सिज्जमाणाइं[4] ।
णिच्चेट्ठाइँ[5] पओसे पिय-सहि किं वहसि अंगाइं ॥ ४७९

सासंक-मुक्क-णीसास-सेस[6]-संरोह-मोह-विवसंगी[7] ।
किं पुणरुत्त[8]-पवत्तण-विसंठुलं[9] कुणसि सयणीयं ॥ ४८०

आसण्ण-परियणालाव-संकिरी[10] किं पयंपसि मयच्छि ।
अविहावियक्खरत्थं[11] पडिवयणमिणं असंबद्धं ॥ ४८१

वहु-विह-वियप्प-चिंता-णिप्फंदब्भंतरुग्गयंसु[12]-जलं ।
कीस उण अणिमिसच्छं अलद्ध-लक्खं पलोएसि ॥ ४८२

अद्धुक्खित्त[13]-विसंठुल-बाहु-लया-मूल-फुसिय-पत्तंकं ।
वयणं अइरुग्गय[14]-चंद-बिंब[15]-सरिसं किमुव्वहसि ॥ ४८३

सरसारविंद-केसर-पराय-परिपिंजरे[16] थणुच्छंगे[17] ।
वसुयाइ[18] दिण्ण[19]-मत्तं मयच्छि हरि-यंदणं कीस ॥ ४८४

कुसुमसंदोहशीतलमेनं पवनं जिघ्रन्ती प्रियसखि उच्छ्वसितमपि विस्मृतम् । अङ्गानि निश्चेष्टानि किमिति जायन्ते इति ॥ ४७७ ॥ ४७८) **किं वा वहु**–[किं] वा अथवा कुसुमासवपानप्रमत्तालिवहलझंकारं श्रुत्वा किमिति सद्यो दष्टेव झगिति अङ्गं समुत्क्षिपसि विसंस्थुलं[20] पातयसि । 'शक्तमुक्तदष्टरुग्णमृदुत्वे को वा' [हैम० ८-२-२] इति डक्को[21] ॥ ४७८ ॥ ४७९) **ससहर**–शिशिरेऽपि प्रदोषे शीतले संध्यासमये शशधरकरच्छुरितानि प्रियसखि किमिति स्विद्यमानानि निश्चेष्टितानि वहसि ॥ ४७९ ॥ ४८०) **सासंक**–साशङ्कमुक्तनिःश्वासस्वेदसंरोधमोहविवशाङ्गी । किमिति पुनरुक्तप्रलोठनविसंस्थुलं शयनीयं शय्यां करोषि ॥ ४८० ॥ ४८१) **आसण्ण**–आसन्नपरिजनालापशङ्कमाना हे मृगाक्षि अविभाविताक्षरार्थमिदमसंबद्धं प्रतिवचनं किमर्थं प्रतिजल्पसि ॥ ४८१ ॥ ४८२) **वहुविह**–वहुविधविकल्पचिन्तानिष्पन्दाभ्यन्तरोद्गताश्रुजलं यथा भवति । किमिति पुनः[22] रनिमिषाक्षं निस्तन्द्रलोचनम् अलब्धलक्ष्यं शून्यं प्रलोकसे ॥ ४८२ ॥ ४८३) **अद्धुक्खित्त**–अर्धोत्क्षिप्तविसंस्थुलबाहुलतामूलस्पृष्टपत्राङ्कम् । अचिरोद्गतचन्द्रबिम्बसदृशवदनं किमर्थमुद्वहसि । पत्राणि पत्रवल्लयः । अचिरोद्गतचन्द्रसदृशम् अरुणमिति भावः । सुतरां तापखेदात् ॥ ४८३ ॥ ४८४) **सरसारविंद**–

1) P कुसुममासवयाण, JB कुसुमासवपाण. 2) = सद्यो दष्टमिवांगं. 3) P नियाल°, J णियरा°; B नियरा°. 4) = स्विद्यमानानि; P सज्जमाणाइं, J सिजिमाणाइं, B सिज्जमाणाइ. 5) = निचेष्टानि, P निव्वेट्ठाइं पउसे, B निव्विट्ठाइं पउसे. 6) = शेष. 7) P निवसंगी, JB विवसंगी. 8) = पुनः पुनः प्रवर्तानन[= र्तनेन]. 9) P विसंवुलं, J विसंठुलं, B विसंकुलं. 10) = शङ्किता. 11) = अविभाविताक्षरार्थं. 12) = अभ्यंतरउद्गताश्रुजलं. 13) P like अद्धुक्खित्त. 14) = अचिरोद्गत. 15) P बिंब, JB विंव. 16) P पर°, B परि°. 17) P त्थणुच्छंगे, J थुणुच्छंगे [?], B यणुत्थंगे. 18) = शुष्यति. 19) P दिन्नमित्तं, J दिण्णमत्तं, B दिन्नमत्तं. 20) B विसंस्थूले. 21) B डक्क. 22) B पुनरपि निमिषाक्षं.

इअ कीस तुमं णूमेसि[1] मज्झ णिय-हियय-वेयणावेयं ।
सीसंतं लहुई-होइ होइ गरुयं असीसंतं ॥ ४८५

तो तं इमीएँ[2] आयण्णिऊण लज्जावसोणयच्छि[3]-जुयं ।
भणियं ण णिण्हविज्जइ[4] किं पुण एवंविहमसंतं[5] ॥ ४८६

5 जं अणुइयं[6] कुमारी-यणस्स लज्जा-पसाहिय-कुलस्स ।
तं सविसेसं पिय-सहि मह हय-हियएणं[7] पारद्धं ॥ ४८७

तं कह णु तुम्ह सीसइ कह व[8] ण सीसइ असोहणिज्जं[9] पि ।
तह वि[10] चिर-रक्खियं पि हु कहियव्वं तुज्झ तो[11] सुणसु ॥ ४८८

तं सिद्ध-कुमारं पेच्छिऊण एएहिँ सहि अणज्जेहिं ।
10 अविणय-मग्गं हय-लोयणेहिँ[12] णीयम्हि किं भणिमो ॥ ४८९

जाणंती वि हु पिय-सहि दूर-विरुद्धं कुमार-भावस्स ।
तह वि हय-वम्महेणं अलज्जिराणं[13] धुरे जुत्ता ॥ ४९०

हे मृगाक्षि सरसारविन्दकेसरपरागपरिपिञ्जरे स्तनोत्संगे दत्तमात्रं हरिचन्दनं किमिति वसुआइ शुष्यति ॥ ४८४ ॥ ४८५) इय कीस – इति किमिति त्वं मत्तो मत्स-
15 काशात् निजहृदयवेदनावेगं नूमेसि आच्छादयसि । 'छदेर्णेणुमनूमसन्नुमढक्कौम्वालपव्वालाः' [हैम० ८-४-२१] इति नूमः । यतो वेदनावेगः शिष्यमाणः कथ्यमानः सख्याद्यग्रे लघुकीभवति अशिष्यमाणो अनिवेद्यमानो गुरुर्भवति प्रवर्धते इति ॥ ४८५ ॥
४८६) तो तं – ततस्तं मदुक्तमाकर्ण्य लज्जावनताक्षियुगम् अनया महानुमत्या भणितं हे सखि न निह्नूयते नाच्छाद्यते किं पुनरेवंविधमसद्विरुद्धम् अतो न निवेद्यते इत्यर्थः
20 ॥ ४८६ ॥ ४८७) जं अणुइयं – लज्जाप्रसाधितकुलस्य कुमारीजनस्य यदनुचितम् अयुक्तं हे प्रियसखि मम हतहृदयेन सविशेषं तदेव प्रारब्धम् ॥ ४८७ ॥ ४८८) तं कह – तत्कथं नु युष्मभ्यं शिष्यते कथं वा दुःकथ्यमपि[14] न कथ्यते । तथापि चिररक्षितमपि तव[15] कथनीयं तस्मात् [शृणु] ॥ ४८८ ॥ ४८९) तं सिद्ध – [तं सिद्ध-] कुमारं माधवानिलं दृष्ट्वा एताभ्याम् अनार्याभ्यां हतलोचनाभ्याम् अहमविनयमार्गं नीता
25 कामपरवशीकृतेत्यर्थः । तस्मात् किं भणामि । अकथ्यम् एतदित्यर्थः ॥ ४८९ ॥
४९०) जाणंती – प्रियसखि कुमारभावस्य दूरविरुद्धम् अत्यर्थमयुक्तं जानानापि । तथापि हतमन्मथेनाहमलज्जावतीनां[16] धुरि नियुक्ता । कामेन निर्लज्जा कृतेत्यर्थः ॥ ४९० ॥

---

1) = आच्छादयसि. 2) = अनया महानुमत्या. 3) = अवनताक्षियुगं. 4) P न विण्हविज्जइ, J ण्ह for ण्ह, B ण णिम्हविज्जसि 5) = कुत्सितं. 6) = अनुचितं, B अणुणयं. 7) B हियएहि. 8) B वि.
30 9) B दुस्साहणिज्जं. 10) B य. 11) B ता सुविश्राणि ।. 12) P लोयणाहिं, JB लोयणेहिं. 13) B अलज्जिरीणं. 14) B दुःकथमपि. 15) B तन्न. 16) B हन्त for हत.

जं तेण[1] मज्झ सहि एरिसो वि सयलाहि-विस-विणासयरो ।
गरुल-पसाओ णिक्कारणं[2] पि दिण्णो हसंतेण ॥ ४९१
तं चेय तस्स पिय-सहि उवयार[3]-महत्तणं भरंतीए ।
सहि[4]-वड्डियाणुराया सिणिद्धया[5] भावयंतीए ॥ ४९२
सीलं कुलं सहावं विज्जा[6]-विणयं अणूणय[7]-गुणं च ।
वहुसो परिचिंतंती[8] अविणय-मग्गं समोइण्णा[9] ॥ ४९३
ता इह तुम्हं[10] पि असाहिऊण[11] लज्जा-पणट्ठ-सब्भावा ।
एयं चंदाणिल[12]-संग-सीयलं किर[13] समारूढा ॥ ४९४
ता एएहिँ दुपेच्छेहिँ तिक्ख-करवत्त-वयण[14]-सरिसेहिं ।
सविसेसं संतविया खलेहिँ सहि चंद-किरणेहिं ॥ ४९५
एयाओ चंद-किरणेहिँ अज्ज पज्जालियाओ[15] व दिसाओ ।
उज्जाणे[16] गंधवहा वि अज्ज विस-लेविया[17] एंति ॥ ४९६
ता साहसु संतावो[18] कम्मि[19] पएसम्मि फिट्टइ[20] गयाण ।
मयण-महाणल[21]-तवियाण[22] दुक्कय[23]-कम्माण अम्हाण ॥ ४९७

---

सूर्जिते । नत्वा भवं नरेन्द्रोऽपि नागार्जुनेन सह स्वभवनं[14] गतः ॥१०६१॥ १०६२) **संपत्तो** – सर्वैरपि प्रणयिभिः परिकरितो राजा निजकपुरं संप्राप्तो गोलानदीसलिलकृताव-गाहनो भवनं प्रविष्टः ॥ १०६२ ॥ १०६३) **जायं** – यथेप्सितार्थे वाञ्छितं समापतिते समागते पृथिवीनाथे दृष्टे सर्वासामपि प्रजानां गृहे गृहे वर्धापनकं जातम् ॥ १०६३ ॥ १०६४) **अह सव्वत्थाण** – अथ प्रभाते सर्वस्थानपरिस्थितेन सतोषेण [15]प्रभुना स्वामिना सहसा कटकपालस्य सेनापतेः प्रयाणनियमः प्रस्थानादेशो दत्तः ॥१०६४॥ १०६५) **ता झत्ति** – तावता झगति प्रदोपसमुच्छलत्प्रतिरावपूरितदिगन्तः प्रवर्धमान-प्रहर्षः कटककलकलः परिवर्धितः ॥ १०६५ ॥ १०६६) **सज्जेह** – सज्जीकुरुत पट्ट-कुटीः । सीव्यत गोणी ठशाणीः । कुरुत मलविकाः । पर्याणानि पल्ययनानि निःश-ल्यानि कुरुत तुरङ्गानामश्वानां मन्दुरा वाजिशालाः सज्जीकुरुतेति शेषः ॥ १०६६ ॥ १०६७) **णिद्धाडिज्जंतु** – करेणुकानां हस्तिनीनां प्रवराणां पञ्च शतानि निर्धाट्यन्ताम् । केऽप्यत्र तिष्ठन्तु केऽपि समदवारणाः सह व्रजन्तु ॥ १०६७ ॥ १०६८) **अग्गिम-याणे** – अग्रप्रयाणे रट्टउड-साधनं पश्चिमे सोलङ्कीनाम् । मध्यहारी मध्यकटकसमवायः ।

---

1) B चि. 2) B पणयएहि. 3) P मणहरं, J घरहरं, B घरहरे. 4) B °यत्थं. 5) B गोसे पयाणणि°. 6) P मंदराइं, J मंदुरा, B मंदुराउ. 7) B निधाडि°. 8) P एक्काण, J पक्काण, B पवराण. 9) P च[=छ], J व, B य. 10) =समदवारु[=र]णा, P वारिणा, JB वारणा. 11) B perhaps अग्गपयाणे. 12) B mixes up bits of the commentary with the verse. 13) P सुलं°, J सुलुं°, B सोलंकीण. 14) B corrected into स्वगृहं 15) B पत्या.

जो जस्स णिबद्धो हय-गओ य सो तस्स पेसह पहाए ।
करहाण सह सुसारीहिँ अत्थरा णिम्मविज्जासु ॥ १०६९
इय जा पसरइ पयडो हलबोलो ताव अत्थ-सेलम्मि ।
अवर-दिसा-वहु-बद्धाणुराय तुरियं गओ सूरो ॥ १०७०
दीव-सिहोहा रेहंति णयर-भवणोयरेसु दिप्पंता ।
मुक्का रविणा किरण व्व तिमिर-परिमाणमवगंतुं ॥ १०७१
तो उयय-सेल-चूडामणि व्व तम-णिवह-वारण-मइंदो ।
आसा-वहु-वयण-विसेसओ व्व दूरुग्गओ चंदो ॥ १०७२
ता चिर-जग्गर-सुढिओ णीसेस-णिओइ-दिण्ण-गम-णियमो ।
कामि-यणो वास-हराइँ णियय-णिययाइँ अल्लीणो ॥ १०७३
मण्णु-विलक्खो अल्लियइ को वि माणंसिणीए संकंतो ।
पास-ट्ठिय-चित्तण्णुय-सहि-भुमया-संणिओ दइओ ॥ १०७४
सोहइ वियलिय-माणं वियसंतुव्वत्त-घोलिरच्छि-जुयं ।
संरुद्ध-हास-मासल-पसण्ण-गंड-त्थलं वयणं ॥ १०७५

सह प्रभुणा तलवर्गो व्रजतु ॥ १०६८ ॥ १०६९) जो जस्स – यो यस्य हय-गजानां चारकः तं तस्य प्रेषयत प्रभाते सारिभिः सह करभाणामुष्ट्राणामस्तरा निर्मिमीयन्तां क्रियन्ताम् ॥ १०६९ ॥ १०७०) इय जा – इति यावत्प्रकटो हलबोलः प्रसरति तावदस्तशैले अपरदिग्वधूबद्धानुरागं त्वरितं गतः सूर्यः ॥ १०७० ॥ १०७१) दीव-सिहोहा – नगरभवनोदरेषु दीप्यमाना दीपशिखौघाः शोभन्ते । अस्योत्प्रेक्षते । तिमिर-परिमाणमवगन्तुं ज्ञातुं रविणा मुक्ताः किरणा इव ॥ १०७१ ॥ १०७२) तो उयय – ततः उदयशैलचूडामणिरिव तमोनिवहवारणमृगेन्द्रः आशावधूवदनविशेषक इव चन्द्रो दूरोद्गतः उदयं प्राप्तः । वारणो गजः ॥ १०७२ ॥ १०७३) ता चिर – ततश्चिर-जागरसुस्थितो निःशेषनियोगिदत्तगमनियमः गृहव्यापारभृत्यादीनां दत्तगमनादेशः कामिजनो निजकनिजकानि प्रवासगृहाणि प्रविष्टः ॥ १०७३ ॥ १०७४) मण्णुविलक्खो – पार्श्वस्थितचित्तज्ञसखीभ्रूसंज्ञितो दयितो मन्तुविलक्षः सापराधः शङ्कमानः कोऽपि मनस्विन्यां मानिन्यामालीयते । स्वापराधमभ्युपगम्य प्रविशतीत्यर्थः । मन्तुरपराधः । 'भ्रुवो मया डमया' [हैम० ८-२-१६७] इति भुमया ॥ १०७४ ॥ १०७५) सोहइ – विगलितमानं विकसच्छ्रान्तघूर्णिताक्षियुगं संरुद्धहास्यमांसलप्रसन्नगण्डस्थलं वदनं शोभते ।

1) B जोजस्स चा[=चा]रओ हय°. 2)=प्रभाते. 3)=हस्तिकोष्टक (the referential number on सारीहिं); P समं सारीहिं, J सुहतसारीहिं, B सह सुसारीहिं. 4) P अच्छरा निम्मविहासु, J अत्थिरा णिम्मविज्जासु, B अत्थरा निम्मविज्जासु. 5) J alone reads सुरियतुरियं. 6)=दीप-शिखौघाः. 7) B जागर. 8) P मतु, J मण्णु, B मंतु. 9)=दैन्येन विलक्षः. 10)=चित्तज्ञः. 11)=भमइ [?]. 12) P संतुट्टत्तघोरिलच्छि°, J °संतुव्वत्तंतघोलिरच्छि°, B °संतुव्वत्तघोलिरत्थि°. 13) B परिणाम°.

उज्जेल्लालिंगण-लालसाए दइए णिरावराहे वि ।
अविलंबिज्जइ कीएँ वि पेम्म-गयं दुद्दमं माणं ॥ १०७६

अविरय-रइ-केलि-पसंग-सोक्ख-पब्भार-ईसि-कुंठइयं ।
माण-णिसाणय-णिसियं होइ पुणो अहिणवं पेम्मं ॥ १०७७

णियम-ट्ठिओ वि कीएँ वि को वि बलालिंगिऊण हसिरीए ।
हुंकार-वारणोणय-मुहो वि परिचुंबिओ दइओ ॥ १०७८

अण्ण-हियओ वि कीएँ वि को वि समुल्लसिय-गंड-वासाए ।
वोच्चत्थ-रय-समत्थो हीरइ विवरीय-सुरएण ॥ १०७९

आणेक्क-रय-सयण्हा णेच्छंती णायरं पिया का वि ।
अद्धुट्ठियं पि दइयं धरइ बलालिंगण-मिसेण ॥ १०८०

अवि य ।

तक्काल-समुइयालाव-वइयरावद्ध-वम्महरसाइं ।
एक्केक्कमंग-परिमास-सोक्ख-पसरंत-पुलयाइं ॥ १०८१

कामिनीनामित्यर्थः ॥ १०७५ ॥ १०७६) उज्जल्ला – निरपराधेऽपि दयिते हठालिङ्गनलालसया कयाचित् प्रेमगजेन्द्रोद्दामो मानोऽवलम्ब्यते समाश्रीयते ॥ १०७६ ॥ १०७७) अविरय – अविरतरतकेलिप्रसंगसौख्यप्राग्भारेषत्कुण्ठीकृतं माननिशानपट्टे निशितं गर्वशाणोत्तेजितं प्रेम पुनरभिनवं भवति ॥ १०७७ ॥ १०७८) णियम-ट्ठिओ – नियमस्थितः आदेशपरायणोऽपि दयितो वल्लभः कोऽपि हुंकारवारणावनतमुखोऽपि बलादालिङ्ग्य हसन्त्या कयाचित् परिचुम्बितः ॥ १०७८ ॥ १०७९) अण्ण-हियओ – विषमं समुल्लसितगण्डवासया कयाचित् प्राञ्जलरतसमर्थोऽन्यहृदयोऽपि पतिर्विपरीतसुरते गृह्यते ॥ १०७९ ॥ १०८०) आणेक्क – आणिक्यरतसतृष्णा पार्श्ववर्तिविधिक्रीडालोलुपा । यदुक्तम् ।

आणिक्येन प्रसिद्धेन विपरीतरतेन च ।
रमते पार्श्वेनापि कामिनीमतकोविदः ॥

कापि प्रिया नागरं विदग्धं सुरतं करणविशेषं नेच्छन्ती अर्धोत्थितं दयितं बलालिङ्गनमिषेण धरति स्थापयति ॥ १०८० ॥ अपि च । १०८१-८४) तक्काल – तत्कालप्रमुदितालापव्यतिकरावद्धमन्मथरसानि । एकैकमन्योन्यमङ्गस्पर्शसौख्यप्रसरत्पुलकानि ॥ [णिमिसेक –] निमिषैकविमुक्ताधरपुलकितवदनारविन्दशोभानि । पक्ष्मान्तरपरिघूर्णमाननयन-

---

1) =गाढ, P उज्जाला°, J उज्जण्णा°, B उज्जला°. 2) B निरावराहंमि. 3) P थेम[=पेम] गयं दुद्दमं, J पिम्मगइंदुद्दमं, B पिम्मगइदुद्दमो माणो. 4) With referential number on °दुद्दमं, P gives कए as a पाठान्तर in the footnotes. 5) =अवनतमुखोपि. 6) P अन्नहीयओ चि कीय वि, J अण्णहियओ कीए वि, B अन्नहियओ वि कीए वि. 7) B विसम for को वि. 8) =प्रांजलं, B पज्जत्तनय. 9) =ह्रियते । गृह्यते. 10) B रइसइण्हा. 11) P को चि, J not specified, B का वि. 12) B पमुइ°. 13) =स्पर्श.

णिमिसेक्क-विमुक्काहर-पुलइय-वयणारविंद-सोहाइं ।
पम्हंतर-परिघोलिर-णयण-णिसम्मंत-वयणाइं ॥ १०८२
अण्णोण्ण-णह-मुहुल्लिहण-मुक्क-सिक्कार-मणहरिल्लाइं ।
सेय-जलोल्लिय-बहलंग-राय-तण्णाय-तलिणाइं ॥ १०८३
इय णिय-मइ-मेत्त-मुणिज्जमाण-णिरुवम-सुहाणुबंधाइं ।
वड्ढिय-रसाइँ मिहुणाण मोहणाइं समप्पंति ॥ १०८४
तो णिद्दय-रय-रहसावसाण-परिसुढिय-अंगमंगेहिं ।
सुप्पइ णिसावसेसं वियलिय-माणेहिं मिहुणेहिं ॥ १०८५
णिब्भर-णिद्दा-संमिल्ल-पम्ह-जुयलाइँ होंति मिहुणाण ।
अंतो-सुह-परिरक्खण-घडिय-कवाडाइँ अच्छीणि ॥ १०८६
अह वंदि-यणुच्चरिओ पाहाउय-गीय-पिसुणिओ पत्तो ।
चिर-कंखिय-गमण-पइण्ण-पहरिसो राइणो गोसो ॥ १०८७
ईसीसि-पुव्व-भाउग्गमंत-थोवारुण-प्पहालिद्धं ।
जायं पारावय-पक्ख-पंडुरं णह-यलाहोयं ॥ १०८८
णिय-णीडुड्डीण-विहंग-णिवह-कोलाहलाउलिल्लाइं ।
दिण-सिरि-मुह-दंसण-लालसाइँ उड्डेंति व वणाइं ॥ १०८९

ताम्यद्वदनानि ॥ [अण्णोण्ण–] अन्योन्यनखमुखोल्लिखितमुक्तसीत्कारमनोहराणि । स्वेदजलार्द्रितबहलाङ्गरागखिन्नतिलकानि ॥ [इय णिय–] इति निजमतिमात्रज्ञायमाननिरुपमसुखानुबद्धानि । वर्धितरसानि सुरतक्रीडितानि मिथुनैः दम्पतीभिः समाप्यन्ते समाप्तिं नीयन्ते । कलापकम् ॥ १०८१-८४ ॥ १०८५) तो णिद्दय–ततो निर्दयरतिरभसावसानपरिशिथिलिताङ्गोपाङ्गैर्विगलितमदनैर्मिथुनैर्निशावशेषः सुप्यते ॥ १०८५॥ १०८६) णिब्भर–निर्भरनिद्रासंमीलत्पक्ष्मयुगलानि मिथुनानां नयनान्यन्तःसुखपरिरक्षणघटितकपाटानि भवन्ति । सुरतजमन्तःसुखं रक्षितुकामानीव संमीलन्तीति ॥१०८६॥ १०८७) अह–अथ वन्दिजनोच्चरितः प्रभातोचितगीतपिशुनितो राज्ञश्चिरकांक्षितगमनप्रतिज्ञाप्रहर्षो गोसः प्राप्तः । प्रभातमित्यर्थः ॥ १०८७ ॥ १०८८) ईसीसि–ईषदीषत्पूर्वभागोद्गच्छत्स्तोकारुणप्रभालीढो नभस्तलाभोगः पारापतपक्षपाण्डुरो जातः ॥१०८८॥ १०८९) णिय–निजनीडोड्डीनविहङ्गनिवहकोलाहलाकुलितानि दिनश्रीमुखसंगमलाल-

1) P निम्बेसेक्क, J णिम्विसेक्क, B निमिसिक्कः. 2) = निशाम्यंत, B तिस्मंते for णिसम्मंत. 3) P नयणाइं, J वयणाइं. 4) B मुहल्लिहंत. 5) = आर्द्र. 6) B रातेन्नयतिलयाइं. 7) = आर्द्रशि [= श]त्या. 8) = निजमतिमात्र. 9) B °वद्धाइं. 10) B मिहुणाइ मेहुणेहिं. 11) B रइ. 12) = निर्दयरतरहस्यावसान. 13) B परिसिढिलियंग°. 14) = विगलितमानैः. 15) B स[= म]यणेहिं for माणेहिं. 16) PB संमिल्ल, J संमिल्लि. 17) B णयणाइ. 18) = प्राभातिक, P पाहाऊय, J पाहाओय, B पहाउचिय. 19) = स्तोकारुण. 20) = मिश्रं, P °लिट्ठं, JB °लिद्धं. 21) P °भोयं, JB °होयं. 22) P नियनीडुड्डीण, J णियणियडीण, B नियनीड°. 23) P विहग, JB विहंग. 24) = अनुकूलानि. 25) B सुहसंगम for मुहदंसण. 26) B कलापकम् is put at the close of the gathās.

पसरिय-पच्चूस-समीर-विलुलिओ गयण-पायवाहिंतो ।
अवसाय-जल-लवोहो व्व गलइ तणु-तारया-णिवहो ॥ १०९०

पच्चूस-गय-वरुम्मूलियाएँ उड्डीण-ससि-विहंगाए ।
धवलाइँ गलंति णिसा-लयाएँ णक्खत्त-कुसुमाइं ॥ १०९१

पाउं जुण्हा-मइरं जामिणि-विलयाए फलिह-चसओ व्व ।
मुक्को णहाहि णिवडइ णिलीण-मय-महुयरो चंदो ॥ १०९२

संमिल्लंति सुहासाय-जणिय-परिओस-दुव्वियड्ढाइं ।
इंत-खर-दिणयरायव-संकाएँ यं कुमुय-गहणाइं ॥ १०९३

पिययम-वोच्छिण्ण-विणिंत-रमणि-णीसास-पवण-पहुओ व्व ।
उवभुत्त-णेह-तणुओ विज्झायइ दीवय-णिहाओ ॥ १०९४

चउ-जामालिंगण-सुह-पसुत्त-पच्चुट्ठियाण मिहुणाण ।
णिद्दा-विरमालस-मंथराइँ अग्घंति दिट्ठाइं ॥ १०९५

णिद्दा-णिहसालस-विवलियंग-मासल-विमुक्क-सासाहिं ।
सयणाइँ कामिणीहिं पिय व्व सुइरेण मुच्चंति ॥ १०९६

सानि वनानि उत्तिष्ठन्तीव ॥ १०८९ ॥ १०९०) पसरिय – गगनपादपात्प्रसृत-प्रत्यूषसमीरविलुलितस्तनुतारकानिकरो अवश्यायसलिलनिवह इव गलति ॥ १०९० ॥ १०९१) पच्चूस – [प्रत्यूषगजवरोन्मूलितायाः उड्डीनशशिविहङ्गायाः धवलानि गलन्ति निशालतायाः नक्षत्रकुसुमानि] ॥ १०९१ ॥ १०९२) पाउं – यामिनीवनितया रात्रिस्त्रिया ज्योत्स्नामदिरां पीत्वा मुक्तः स्फटिकचषकः इव निलीनमृगमधुकरश्चन्द्रो नभसो गगनान्निपतति ॥ १०९२ ॥ १०९३) संमिल्लंति – सुखास्वादजनितपरितोषदुर्विदग्धानि कुमुदगहनानि एष्यत्खरदिनकरातपशङ्कया संमीलन्ति ॥ १०९३ ॥ १०९४) पिययम – उय पश्य । प्रियतमविच्छिन्नविनिर्गच्छद्रमणीनिःश्वासपवननिधूत इव विप्रियविमुक्तभार्यानिःश्वासवायुकम्पित इवोपभुक्तस्नेहतनुको दीपकनिघातो विध्यायति ॥ १०९४ ॥ १०९५) चउ – चतुर्यामालिङ्गनसुखप्रसुप्तप्रत्युत्थितानां मिथुनानां निद्राविरामालसमन्थराणि दृष्टानि राजन्ते । 'राजेरग्घछज्ज[-सहरीररेहाः]' इति अग्घइ [हैम० ८-४-१००] ॥ १०९५ ॥ १०९६) णिद्दा – निद्रानिघर्षालसविवलिताङ्गमांसलविमुक्तश्वासाभिः कामिनीभिः शयनानि प्रियः इव सुचिरेण मुच्यन्ते ॥ १०९६ ॥

---

1) B निग्गरो for णिवहो. 2) This gatha is not given by B, but is found only in PJ. 3) P उड्डीण, J उड्डीणे. 4) P °माई, J माई. 5) = चषक इव. 6) P नहाहि, J णेहाहि, B णहाहि. 7) P °रायव, J °रायंव, B राइव. 8) PB omit य given by J. 9) = विनिर्यत्. 10) P रमणिनीसास, J रमणीणीसास, B रमणीनिसास. 11) P पहुउव्व, J पहुओव्व, B चिहुय व्व. 12) P तणओ, J तणुओ, B तणुउ. 13) = समूहः. 14) P निद्दाविरमालस, J णिद्दाणिहसालस, B निद्दानिहसालस. 15) B कुमुदानि.

का वि कर-कलिय-पसढिल-कडिल्ल-दर-दाविओरु-लायण्णा ।
सिचयंचले धरिज्जइ पिएण सयणं विमुंचंती ॥ १०९७

सोहंति कामिणीणं णिद्दालस-सोसियंत-णयणाण ।
उवयार[1]-कमल-पक्खलिय-गमण-मसिणा[2] पय-क्खेवा[3] ॥ १०९८

सोहइ जह मलिय-पसाहणालयं[4] कामिणीण गोसम्मि ।
वयणं सव्वायर-विरइयं पि ण तहा[5] णिसारंभे ॥ १०९९

गोसग्गे गुरु-णिद्दालसेण[6] अद्धच्छि-पेच्छियव्वेण ।
तुण्हिक्केण[7] वि वयणेण[8] डहइ[9] अज्झा[10] सवत्ति-यणं[11] ॥ ११००[12]

छउअंगि[13] विमुक्काहरण-णीसहं विलुलियालय-विसेसं ।
हरियाहर-रायं परिसवंति वयणं सवत्तीओ ॥ ११०१

अह एरिसे पहाए पहयाएँ पयाणयस्स ढक्काए ।
विण्णत्तो[14] जोइसिएहिँ देव सुहयं इमं लग्गं ॥ ११०२

तो दिय-वर-वेय-णिहोसं[15]-दिण्ण-पुण्णाह-मंगलो राया ।
णीसरिओ वंदिण-सय-समूह-कय-जय-जयासद्दो ॥ ११०३

१०९७) का वि – करकलितप्रशिथिलकटीवस्त्रदरदर्शितोरुलावण्या शयनं विमुञ्चन्ती कापि प्रियेण सिचयाञ्चले वस्त्रपल्लवे ध्रियते ॥ १०९७ ॥ १०९८) सोहंति – निद्रालसशोषित[16]नयनानां कामिनीनां पदक्षेपा उपचारकमलप्रस्खलितगमनमसृणाः शोभन्ते । मसृणाः घृष्टाः ॥ १०९८ ॥ १०९९) सोहइ – मलितप्रसाधनालकं कामिनीनां वदनं यथा गोसे प्रभाते शोभते । सर्वादरविरचितमपि निशारम्भे तथा न भाति ॥ १०९९ ॥ ११००) गोसग्गे – गोसाग्रे गुरुनिद्रालसेन अर्धाक्षिप्रेक्षितेन वक्रनिरीक्षितेन तूष्णीकेनापि वदनेन अज्झा नवपरिणीता सपत्नीजनं दहति । अथवा अज्झा प्रौढमहिला वैदग्ध्येन सपत्नीं क्लेशयति ॥ ११०० ॥ ११०१) छउअंगि – सपत्न्यः कस्याः अपि विमुक्ताभरणनिःशोभं विलुलितालकविशेषं हृताधररागं परिसवंति स्पर्धन्ते ॥ ११०१ ॥ ११०२) अह एरिसे – अथेदृशे प्रभाते प्रहतायां प्रयाणकस्य ढक्कायां भेर्यां ज्योतिषिकेन्द्रैर्विज्ञप्तम् । देव शुभदमिदं लग्नमंशकः ॥ ११०२ ॥ ११०३) तो दिय – ततो द्विजवरवेदनिर्घोषदत्तपुण्याहमङ्गलो वन्दिजनशतसमूहकृतजयजयशब्दो राजा निःसृतः

---

1) = उपचार. 2) PB मसिणा, J मिसणा. 3) = पदक्षेपाः. 4) = प्रसाधनं । अलकं च. 5) B तह नो for ण तहा. 6) PB °लसेण, J °लसएण. 7) = तूष्णीकृतेनापि. 8) P वयणेणं, JB वयणेण. 9) = दहति. 10) = प्रौढयुवति, P अज्जा, JB अज्झा. 11) P सवत्तियणं, J सवित्तियणं, B सवत्तियणं. 12) P 1100, J not specified, B 1104. 13) = मृद्वंगि, B कीए वि विमु°. 14) B विन्नत्त जोइसिएण. 15) B निघोस. 16) B शोषितीतनय°.

तूर-सय-संख-काहल-ढक्का-रव-भरिय-दस-दिसा-यक्को ।
करि-तुरय-रह-रउग्घाय-पिहिय-णह-मंडलाहोओ ॥ ११०४
सुर-सुंदरि-कर-कमलग्घ-कुसुम-संदोह-सित्त-सिर-कमलो ।
णिय-णयर-समासण्णे सुयणु समावासिओ राया ॥ ११०५
5 अण्णम्मि दिणे णीसेस-बल-णिवज्झंत-हारि-णिवहेण ।
संचलिओ णिण्णुण्णय-समेण सरिसं चिय पहेण ॥ ११०६
जण-णिवह-कलयलाराव-तासिओ ताण संठिओ गोंठो ।
जा वियलिय-णीवि-वरिल्ल-विंभला पाडिया वेसा ॥ ११०७
मय-वारण-भय-भज्जंत-णव-वइल्लेण वलि-करहस्स ।
10 विरस-रसिरस्स सह खोणियाएँ उल्लूरियं णक्कं ॥ ११०८
अण्णाए को वि भणइ मा णोल्लसु किं ण पेच्छसि वइल्लं ।
पाडिहिसि कोहलं पिव लयडाहि इमं म्हं लिंक-रुयं ॥ ११०९
भिण्णम्मि करंवय-डेरयम्मि कं सवसि एत्थ हारीए ।
ण णियसि संदण-संचूरियाइँ घय-भंडय-सयाइं ॥ १११०

---

15 ॥ ११०३ ॥ ११०४-५) **तूरसय** – तूर्यशतसंख्यकाहलढक्कारवभरितदिक्चक्रः । करितुरगरथरजोउद्घातपिहितनभोमण्डलाभोगः ॥ [**सुरसुंदरि** –] पुरसुन्दरीकरकमलार्घ्यकुसुमसंदोहसिक्तशिरःकमलो राजा सुतनु सावित्रि निजनगरसमासन्नं समावासितः । युग्मम् ॥ ११०४-५ ॥ ११०६) **अण्णम्मि** – अन्यस्मिन् दिने निःशेषबलविमुह्यमानहारिनिवहेन । निम्नोन्नतसमेन पथेन मार्गेण सदृशमेव संचलितः । अगणयित्वा
20 समविषमं प्रस्थितः । हारिः श्रेणिः ॥ ११०६ ॥ ११०७) **जणणिवह** – जननिवहकलकलारावत्रासितः गुंठो वेसरः तावन्न संस्थितः यावद्विगलितनीविवरोत्तरीयवस्त्रविह्वला वेश्या निपतिता ॥ ११०७ ॥ ११०८) **मयवारण** – मदमत्तवारणभज्यमाननववृषभेण विरसं रसतो बलवत्करभस्य खोणियाए अस्थिसत्कनस्य रक्ष्या सह नक्कं त्रोटितम् । 'त्रुटेस्तोडतुट्टखुट्टखुडोक्खुडोल्लुक्कलुक्कोल्लूरा' [हैम० ८-४-११६] इति उल्लूरियं ॥११०८॥
25 ११०९) **अण्णाए** – अन्यया कयाचिद्भण्यते कोऽपि मा प्रेरय किं वृषभं न पश्यसि । कूष्माण्डफलमिव लगटकात् इष्टकामयस्थानविशेषात् असद् डिम्भरूपं बालापत्यं पातयिष्यसि ॥ ११०९ ॥ १११०) **भिण्णम्मि** – इह करम्बकदोहनके भाण्डे भग्ने सति

---

1) P °भोओ, JB °होओ. 2) B पुर for सुर. 3) P निवज्झंत, J णिवज्जंत, B विमुंज्झंत. 4) = निम्नोन्नतसमेन. 5) = विगलितनीवि. 6) P भिंभला, J विंभला, B विह ॥ला. 7) = लाजया, P
30 खाणि°, JB खोणि°. 8) = मा प्रेरय, P णोल्लसु, B पिल्लसु. 9) P लयडाहि इमम्ह डिंभरुयं, J लींक for डिंभ of P, B लघडाहिवम्ह डिकरुयं. 10) P भिज्जंमि करंचयडेरयंमि किं, J भिण्णंमि करंवयडेरयंमि कं, B भज्जंमि करंवयदोहणंमि कि. 11) = घटे. 12) = घृत. 13) B युग्मम् is put at the close of the gāthās. 14) B अगणि सम°. 15) B भिंभला. 16) खेणियाए. 17) obscure. 18) B करवक.

एक्केक्कमकय-हत्थावलंबेणं[1] जाइ को वि वंठ-जुया ।
खोरेण[2] समं सोहग्ग-वाय-विहवेण भज्जंतो ॥ ११११
रे णिय-छाया-गव्विर मा धुणसु[3] मुहा भुयंग जर-फलयं ।
ण णियसि दुप्पल्लाणो[4] एसो णव-वेसरो अम्ह ॥ १११२
अण्णाए उद्ध-कर-रोविरीए विणियत्तिऊण पोक्करियं ।
सुय-मरणेण व ओणक्किरीएँ[5] ओणक्किराण[6] पुरो ॥ १११३
पेच्छह[7] वप्पो वण्ण-वसिएण[8] सुणएण सोणहीएणं[9] ।
विरसं-रसिरो[10] हयासेण खाविओ अम्ह कुक्कुडओ ॥ १११४
अण्णेण[11] को वि भणइ कीस मुहा णीसवेसि[12] वर-तुरयं ।
एसो मह सेल्ल-पहार-विंभलो[13] वच्चइ वराहो ॥ १११५
एवं अण्णोण्णालाव-वावडो[14] कह वि वासरद्धंते ।
संपत्तो खंधारो सेल-णियंवेक्क-भूभाए[15] ॥ १११६

अत्र हार्या श्रेणौ किं शपसि गालीं ददासि । स्यन्दनसंचूर्णितानि रथभग्नानि घृतभाण्ड-शतानि न पश्यसि । कस्यापि इत्थमुक्तिरिति संबन्धः ॥ १११० ॥ ११११) एक्केक्क– सौभाग्यवातविभवेन भज्यमानः कोऽपि वण्ठयुवा खोरेण अधमस्त्रिया वेश्यया वा सम-मेकैकमन्योन्यं कृतहस्तालम्बनं याति । वण्ठयुवा भृत्यतरुणः ॥ ११११ ॥ १११२) रे णिय– रे णिजच्छायागर्वशील भुजङ्ग वेश्यापते जीर्णफलकं मा धुनः मा कम्पय । न पश्यस्येषोऽस्माकं नववेसरो दुःपर्याणो दुःखारोप्यपल्यीणः[16] । जीर्णफालनं जीर्णवस्त्रम् । ते हि बाह्याडम्बरेण भवन्ति । अतो निजगर्वं दर्शयामु मात्राशयः ॥ १११२ ॥ १११३) अण्णाए– अन्यया ऊर्ध्वकरं यथा भवति रुदन्त्याः ओणिक्किरीए वृषवाहकभार्यया नष्ट-गवेषिकया वा वृषभवाहकानां पुरतो विनिवृत्य व्याघुट्य सुतमरणेनेव पूत्कृतम् ॥१११३॥ १११४) पेच्छह– अव्वो दुःखसूचने । पश्यत वन्नवसियेण राजप्रसादगर्वितेन सोहणी-एण श्वानपालकेन हताशेन शुनकेन कृत्वा एषोऽस्माकं कुर्कुटः खादितः ॥ १११४ ॥ १११५) अण्णेण– अन्यया कोऽपि भण्यते किमिति मुधा निजतुरङ्गं नीसवेसि त्वर-यसि । एषोऽग्रे मम शल्यप्रहारमूर्च्छितो वराहो व्रजति ॥ १११५ ॥ १११६) एवं– इत्येवमन्योन्यालापव्यापृतः स्कन्धावारः कथमपि वासरार्धान्ते प्रहरद्वयादनन्तरं शैल-

1) B °लंवणो. 2)=बहुप्रस्तरिकया. 3) P धुणसु दुमा, J धणसु मुहा, B धुणसु तुमं. 4)=दुःखेन पर्याणयितुं. 5) P व ओणक्किरीए, JB व ओणिक्किरीए. 6)=कोरिकाणां, P ओणक्किराण, J omits ओ and रा, B उणिक्कराण. 7) B वणविसिएण पिच्छह अव्वो सुणएण. 8)=राजप्रसादगर्वितेन. 9)=सारमेयपालकेन, P सोणभीएण, J सिण्णहीएण, B सोहणीएण. 10) P विरसरसिरो, J चिर-सरिसरो, B चिरसिरसिरो. 11) B अण्णाइ. 12)=त्वरयसि. 13) P भिंभलो, JB विंभलो. 14) B इय एवंपणोपणालाव. 15) P नियंवेक्कभूयाए, J णियंचक्कभूभाए, B नियंबिक्कभूताए. 16) B पलायनः.

तावय खिण्ण-तुरंगम-मसिण-वलिज्जंत-संदण-णिहायं ।
आसण्ण-घास-लुणणाणुबंध-धावंत-कम्मयरं ॥ १११७
आवास-झंभणारंभ-मुक्क-णीसेस-भिच्च-पहु-णिवहं ।
करि-कलुसण-भय-पूरिज्जमाण-जल-दोणि-संघायं ॥ १११८
भारोयारण-विणिविट्ठ-विरसं-विरसंत-करह-सद्दालं ।
बहु-विह-कच्छंतर-णिवडंत-वसुहाहिव-णिवेसं ॥ १११९
दीहर-पह-परिखेइय-सुह-णियलिज्जंत-मत्त-मायंगं ।
आवासिउमाढत्तं सेल-णियंबम्मि तं कडयं ॥ ११२०
आवासिय-वल-सिज्जंत-रेणु-पयडा समोसरंति व्व ।
आवास-समूहोवास-दाण-कज्जे दिसाहोया ॥ ११२१
फणिणो भय-करि-संचरण-मग्गे-भय-तरलिया वलग्गंति ।
णीसेस-बलालोयण-कज्जेण व तुंग-सिहराइं ॥ ११२२
मुच्चंति रहा रहिएहिँ दीह-पह-णिहसं-मडहियं-रहंगा ।
उम्मग्ग-गमण-णिद्दलिय-सल्ल-सिढिलक्ख-संधाणा ॥ ११२३
तुरया दर-हिय-पल्लाण-चंचला कह वि संठविज्जंति ।
सखलिणं-मुह-कड्ढियं-थोर-घास-वलिया णिओईहिँ ॥ ११२४

नितम्बैकभूभागे संप्राप्तः ॥ १११६ ॥ १११७-२०) तावय – तावता खिन्नतुरङ्गमम-सृणव्याघुट्यमानस्यन्दननिघातः । आसन्नघासलवनानुबन्धधावत्कर्मकरः ॥ [आवास –] आवासरोधनारम्भमुक्तनिःशेषभृत्यवधूनिवहः । करिकलुषणभयपूर्यमाणजलद्रोणिसंघातः ॥ [भारोया –] भारावरोपणविनिविष्टविरसरसत्करभशब्दाकुलः । बहुविधकक्षान्तरपृथक्-क्रियमाणवसुधाधिपनिवेशः ॥ [दीहर –] दीर्घपथपरिखेदितसुखवध्यमान[मत्तमातङ्गः । आवासितुमारब्धः शैलनितम्बे स कटकः] । कलापकम् ॥ १११७-२० ॥ ११२१) आवासिय – [आवासितबलक्षियमान-]रेणुप्रकटा दिगाभोगा आवास्यसमूहावासदान-कार्ये समपसरन्तीव दूरतो व्रजन्तीव ॥ ११२१ ॥ ११२२) फणिणो – फणिनः शेषाहेस्तुङ्गशिखराणि फणाग्राणि मायत्करिसंचरणमार्गभयतरलितानीव निःशेषबलालोकन-कार्येण वलगन्ति ॥ ११२२ ॥ ११२३) मुचंति – रथिकैः सारथिभिः दीर्घपथनिर्घर्ष-लघूकृतरथाङ्गाः उन्मार्गगमननिर्दलितशल्यशिथिलाक्षसंधानाः रथाः मुच्यन्ते । अक्षं धुरा ॥ ११२३ ॥ ११२४) तुरया – नियोगिभिः सारिभिः दरहृतपर्याणचञ्चलाः स-

1) P तवेय खिन्न तुरंगमसिण, J तावय खिण्णथुरंगममसिण, B °तुरंगममसिण 2) P झंभणा° B रंभ[रंभ]णा°. 3) B दोलि. 4) B विरसि. 5) PB विह, J विठु. 6) = निगडक्षेप्यमाण, B, सुढिल-निलिज्जंत. 7) This gāthā is missing, along with some portion of the commentary, in B. 8) = ह्रास्यंत. 9) = पश्चात् व्रजं[ति] इव. 10) P °भोया, J °होया. 11) P सग्गभग्गतर°, J मग्गेभयतर°, B मग्ग[= ग्ग]भयतर°. 12) = चटंति. 13) = जर्जर. 14) = घृष्ट, PB मडहिय, J मडहियं. 15) = ईषत् हृत. 16) = सकविक [?]. 17) PB कड्डिय, J कड्टिय. 18) B perhaps थूल for थोर. 19) = स्थानपालिः. 20) B मसृणे. 21) B some portion missing here. 22) B puts this at the close of the gāthās. 23) B मय for मार्ग. 24) B सादि°.

आयास-पेल्लणुग्गय-सेय-जलालग्ग-फेणं-पुंजाइं ।
हियं-पल्लाणा वि हया वहंति गरुयाइँ अंगाइं ॥ ११२५
कवलेंति मत्त-करिणो चिरेण कलियं पि पल्लवुप्पीलं ।
कर-रंखोलणं-पसरंत-पवण-परिमासं-सत्तण्हा ॥ ११२६
संठाणं कह वि लहंति तालविंटाणिलेण छिप्पंता ।
उवत्त-परत्तण-गलिय-सेय-पसरा पहू सयणे ॥ ११२७
गमणायास-समुग्गय-सेय-दरुप्फुसिय-विसम-तिलयाइं ।
अग्घंति कामिणीणं मउलिय-णयणाइँ वयणाइं ॥ ११२८
एत्थंतरम्मि पारद्धिएहिँ सिरि-सालवाहण-णरिंदो ।
विण्णत्तो परिगहियं तं देव[11] सुसावयं रण्णं ॥ ११२९
बहु-विह-तरु-तुंग-समास-संकुला सेल-कडय-पडिलग्गा ।
पुव्व-दिसा पडिरुद्धा णिविच्चं[14] वारण-सएहिं ॥ ११३०
इयरा वि गिरि-सरीयड-समीव-विडवोलि-वेणु-संकिण्णा ।
सहस त्ति उत्तरासा परिगहिया धम्मवालेहिं ॥ ११३१

खलिनमुखकर्षितस्थूलघासवलितास्तुरगाः कथमपि संस्थाप्यन्ते । खलीनं वलग्गां ॥११२४॥
११२५) आयास—आयासप्रेरणोत्थितस्वेदजलालग्नफेनपुञ्जैर्गुरुकाण्येवाङ्गानि वहन्ति । के ते । हृतपर्याणा अपि हयास्तुरगाः ॥ ११२५ ॥ **११२६) कवलेंति**—कराधूनन-प्रसरत्पवनपरामर्शसतृष्णा मत्तकरिणः कलितमप्यग्रे धृतमपि पल्लवोत्पीडं किसलयसमूहं चिरेण कवलयन्ति ॥ ११२६ ॥ **११२७) संठाणं**—शयने शय्यायाम् उद्वृत्तपरावर्तन-गलितस्वेदप्रसरास्तालवृन्तानिलेन स्पृश्यमानाः प्रभवः कथमपि संस्थानं लभन्ते । तालवृन्तं व्यजनम् ॥ ११२७ ॥ **११२८) गमणायास**—गमनायाससमुद्गतस्वेददरोन्मृष्टतिल-कानि । कामि[नी]नां मुकुलितनयनानि वदनानि शोभन्ते ॥ ११२८ ॥ **११२९) एत्थंतरम्मि**—अत्रान्तरे पापर्द्धिकैराखेटिकैः श्रीशालिवाहननरेन्द्रो विज्ञप्तः । देव परि-गृहीतं युष्मदलंकृतमिदमरण्यं सुश्वापदं दुष्टवन्यजीवाकुलम् ॥ ११२९ ॥ **११३०) बहुविह**—बहुविधतरूत्तुङ्गतमालसंकुला शैलकटकप्रतिलग्ना पूर्वदिक् निरन्तरालं वारण-शतैः प्रतिरुद्धा । गजेन्द्राः पूर्वदिशि स्थापिताः इत्यर्थः ॥ ११३० ॥ **११३१) इयरा**—इतरा उत्तराशा गिरिसरित्तटसमीपविटपालिवेणुसंकीर्णा सहसा धर्मपालैः धनुर्धरैः

---

1) P रेणु, JB फेण. 2) B अवहिय for हिय. 3) B कवलंति. 4) B करखोलण. 5)=चालन. 6)=स्पर्शसाभिलाषाः, P परिमाससंतन्हा, J परिमाससत्तण्हा, B परिफंससंतण्हा. 7) PB संठाणं, J संठाणां. 8)=उद्वर्त्तन. 9)=परिवर्त्तन, B परित्तण. 10) P सयरा, JB पसरा. 11) B देविरथ for तं देव. 12) P ससावयं, JB सुसावयं. 13) B तमाल for समास of P. 14) P निव्विच्चं, J णिव्विविं, B निच्चिचे. 15) P सिरीयड, J सरीयड, B सिरीतड. 16) P वडवोरि, J विडवोलि, B विडवालि. 17) B संगहिया. 18)=धनुर्द्धरैः. 19) [?]. 20) B something like श्रीत for उद्वृत्त.

पच्छिम-दिसाए सुह-संचराए वर-तुरय-साहणं दिण्णं ।
दाहिण-दिसाइ णिमियं लल्लक्कं[1] कविल-संघायं[2] ॥ ११३२

एवं चिय सीसंते[3] संपत्तो णरवई तमुद्देसं ।
संचालियाइँ आहेडिएहिँ सावय-समूहाइं ॥ ११३३

5 तावय[4] हय-हिंसा-रव-संखोहिय-रण्ण-सावउप्पेच्छा[5] ।
पहरेण विणा वि मया मय-मरणासंकिरी हरिणी ॥ ११३४

ओसप्पइ[6] पुली[7] रोहिएणं[8] तह सो वि अच्छहल्लेण ।
सो वि कुरंगेण ण होइ कस्स मरणम्मि मइ-मोहो ॥ ११३५

ण चलइ णव-सूय-सिलिंबे-णेह-संदाण-णियलिया[9] हरिणी ।
10 हरिणो वि पिययमाए समयं तत्तो च्चिय विसण्णो[10] ॥ ११३६

तिक्ख-खुरुप्पालुप्पंत-जीवियं सहयरिं मुयंतेण ।
णिय-णाम-सरिच्छं चित्तलेणं[11] कम्मं समायरियं ॥ ११३७

दूरुड्डीणो[12] वि सिही परिलंघिय-करि-तुरंग-णर-णिवहो ।
पडिओ सुणयाण मुहे मरणं पि सुहं ण देव्वाहिं[13] ॥ ११३८

---

15 परिगृहीता संगृहीता ॥ ११३१ ॥ ११३२) पच्छिम – सुखसंचारायां पश्चिमदिशि वरतुरगसाधनं दत्तमश्ववाराः स्थापिताः । दक्षिणदिशि लल्लक्को रौद्रः कपिलसंघातः श्वानसमूहो न्यस्तः ॥ ११३२ ॥ ११३३) एवं चिय – एवं कथिते सति नरपतिस्तमुद्देशं संप्राप्तः । आखेटकैः श्वापदसमूहाः संचालिताः ॥ ११३३ ॥ ११३४) तावय – [तावत्ता हत-]हिंसारवसंक्षोभितारण्यश्वापदोत्प्रेक्ष्यमाणा हरिणी मृगी मृगमरणाश20ङ्किनी प्रहारेण विनापि मृता ॥ ११३४ ॥ ११३५) ओसप्पइ – पुली व्याघ्री रोहितेन गोकर्णेनाश्रीयते[14] तथा स रोहितो अच्छहल्लेण[15] ऋक्षेणाश्रीयते सोऽपि ऋक्षः कुरङ्गेणाश्रीयते । यद्वार्थान्तर[न्यास]माह । मरणे कस्य मतिमोहो न भवति चित्तं कस्य न चलतीत्यर्थः ॥ ११३५ ॥ ११३६) ण चलइ – नवप्रसूतबालकस्नेहसंदाननिगडिता न चलति हरिणी नापसरति मृगी हे मृगाक्षि सावित्रि तत एव कारणात् 25 प्रियतमया सह हरिणोऽपि न चलति तिष्ठतीत्यर्थः ॥ ११३६ ॥ ११३७) तिक्ख – तीक्ष्णक्षुरप्रालुप्यमानजीवितां सहचरीं भार्यां मुञ्चता चित्तलेन निजनामसदृक्षं कर्म समाचीर्णम् । चित्तं लातीति चित्तलः । अथवा चित्रको द्वीपी । क्षुरप्रो जटालः शरः । लोके कनियालः प्रसिद्धः ॥ ११३७ ॥ ११३८) दूरुड्डीणो – दूरमत्यर्थमुड्डीनोऽपि परिलङ्घितकरितुरङ्गनरनिवहः शिखी मयूरः शुनकानां मुखे पतितः यद्वा दैवान्मरणेऽपि न

---

30 1) = रौद्रः. 2) = श्वन् 3) PB एवं सिट्ठे संते, J एवं चिय सीसंते. 4) B omits a portion of this gatha. 5) = डिभ, P साचउपिच्छा, J सावउप्पेच्छा. 6) B उयसप्पइ. 7) = व्याघ्र. 8) = चित्रकेण. 9) B सिलिंधनेहसिदाण. 10) B विचणो. 11) = लुब्धकैः समं युद्धं कृतं. 12) PJ दूर°, B दूरु°. 13) J देव्वाहि. 14) B गोपरेणा°. 15) B इछलमेव.

कोकंतासत्त-मुहो वि मंडलो धाइ भल्लुयाहिमुहं ।
दो-कंखिरस्स समयं एक्कं पि ण से समावडियं ॥ ११३९

वावल्लूरिय-कंधरस्स पढमं मयस्स हरिणीए ।
फुडिय-हिययाएँ जीयं कयावराहं व पम्मुक्कं ॥ ११४०

पहरेण मओ विरहेण तह मई घरिणि-णयण-संभरिओ ।
वाहो वियलिय-वाहो तिण्णि वि समयं चिय मयाइं ॥ ११४१

केसरि-गुंजारव-विहडमाण-करि-विवर-णीहरंताइं ।
घेप्पंति वराह-उलाइँ दरियँ-सोरट्ठ-सुणएहिं ॥ ११४२

तावय णिय-कुल-पच्चक्ख-परिहवामरिस-तंविरच्छि-जुओ ।
विणिवाइय-णर-तुरओ अल्लीणो राइणो कोलो ॥ ११४३

तो तेण दरिय-कोलेण दच्छ-परिहच्छ-वलणे-सीलेण ।
पहओ तुरओ पुहईसरस्स तेणावि सो कोलो ॥ ११४४

एवमसावयमविहंगमं च रण्णं खणेण काऊण ।
दिवसावसाण-समए राया कडयम्मि संपत्तो ॥ ११४५

सुखम् ॥ ११३८ ॥ ११३९) कोकंत – कोके उन्नासासक्तमुखोऽपि शशकसंमुखलग्नोऽपि मण्डलः श्वा भल्लूकाभिमुखं शृगालीसंमुखं धावति । द्विकांक्षिणस्तस्य समकमेकवारः एकमपि न समापतितम् ॥ ११३९ ॥ ११४०) वावल्ल – प्रथमं मृगस्य वावल्लच्छिन्नकन्धरस्य ततो हरिण्या स्फुटितहृदयया कृतापराधमिव जीवं जीवितव्यं प्रमुक्तम् । मृते भर्तरि भार्यायाः प्राणधारणमपराधः इति । वावल्लः पट्त्रिंशद्दण्डायुधेषु प्रहरणविशेषः ॥ ११४० ॥ ११४१) पहरेण – [प्रहारेण मृगः विरहेण तथा मृगी । गृहिणीनयनसंस्मृतः व्याधः विगलितबाष्पः त्रीणि अपि समकमेव मृतानि] ॥११४१॥ ११४२) केसरि – दृप्तसौराष्ट्रशुनकैः केसरिगुञ्जारवविघटमानगिरिविवरनिर्गच्छन्ति वराहकुलानि गृह्यन्ते निगृह्यन्ते इत्यर्थः ॥ ११४२ ॥ ११४३) तावय – तावता निजकुलप्रत्यक्षपरिभवामर्षताम्रिताक्षियुगः । विनिपातितनरतुरगः कोलः शूकरः राज्ञः पुरतः आश्रितः ॥ ११४३ ॥ ११४४) तो तेण – ततस्तेन दृप्तकोलकेन दच्छ शीघ्रं पडिहच्छो अमर्षस्तद्वशाद्वलनशीलेन व्यावर्तमानेन पृथ्वीश्वरस्य नरेन्द्रस्य तुरगः प्रहतस्तेनाप्यश्वेन स कोलो हतः ॥ ११४४ ॥ ११४५) एवमसावय – एवमश्वापदमविहंगमं चारण्यं क्षणेन कृत्वा दिवसावसानसमये राजा कटके संप्राप्तः ॥ ११४५ ॥

---

1) B काकुत्ता°. 2)=शृगाली. 3) P °भिमुहं, J °हिमुहं, B °हिमुहो. 4)=योपाछिन्नकंधरस्य [?]. 5) B has not got this gāthā which is given by PJ. 6)=गलितबाष्प. 7) P कर, J करि, B गिरि. 8)=निःसरंति. 9)=गृह्यंते. 10)=दृप्त. 11)=ताम्र. 12) PB तुरओ, J तुरय. 13)=शीघ्रं. 14)=अमर्ष. 15) P चलण, JB वलण. 16) B पुहवी°. 17) B प्रथममृग°. 18) B ताम्रता°.

भणिओ[1] विजयाणंदेण देव इह मा मुहा[2] विलंबेह ।
को जाणइ केरिसिया कज्ज-गई होइ एत्ताहे ॥ ११४६
एवं भणिओ सो तेण णरवई अगणिएहिं दियहेहिं ।
संपत्तो कमल-दलच्छि[3] सत्त-गोयावरी[4]-भीमं ॥ ११४७
तत्थावासिय-णीसेस-कडय-णिव्वत्त[5]-मज्जणाहारो ।
परिवड्ढिय-परिओसो विजयाणंदेण विण्णत्तो ॥ ११४८
सो देव इह महेसी णिक्कारण-णिद्ध-बंधवो[6] अम्ह ।
परिवसइ महाणुमई-तवोवणं जेण णे[7] णीया ॥ ११४९
वय[8]-परिणयं तवस्सिं विज्जा-विहवोवलक्खिय-सुजम्मं[9] ।
पर-लोय-पह-पवण्णं[10] दट्ठुं तुम्हं पि तं होइ[11] ॥ ११५०
भणियं च[12] राइणा पिय-वयंस[13] जं भणह एहि वच्चम्ह ।
किं अम्हं[14] ण तेण कयं एत्तिय-मेत्तं कुणंतेण ॥ ११५१
एवं भणिऊण णराहिवेण उव्विंव-बाल-हरिणच्छि ।
विजयाणंदो पढमं मुणिणो संपेसिओ पासं ॥ ११५२
तो[15] दूर-कय-पणामो सच्चविओ सायरं मुणिंदेण ।
आसण्ण-समासीणो वहुसो संपुच्छिओ कुसलं ॥ ११५३

११४६) भणिओ – भणितश्च विजयानन्देन देव अत्र मुधा मा विलम्बस्व अधुना को जानाति कीदृशी कार्यगतिर्भवति[16] ॥ ११४६ ॥ ११४७) एवं – एवं स राजा तेन भणितः सत्वगणितैर[न]ल्पैर्दिवसैः कमलदलाक्षि सावित्रि सप्तगोदावरीभीमं संप्राप्तः । सप्तप्रवाहसंगतगोदावर्यां भीमं भीमेश्वरतीर्थं प्राप्तः ॥ ११४७ ॥ ११४८) तत्थावासिय – तत्रावासितनिःशेषकटकनिर्वृत्तमज्जनाहारः परिवर्धितपरितोषः स नरपतिः[17] विजयानन्देन विज्ञप्तः ॥ ११४८ ॥ ११४९) सो देव – हे देव हे राजन् सोऽस्माकं निःकारणस्निग्धबान्धवो महर्षिरिह परिवसति येन मुनिना वयं महानुमत्यास्तपोवनमाश्रमं नीताः प्रापिताः ॥ ११४९ ॥ ११५०) वयपरिणयं – तस्माद्विद्याविभवोपलक्षितसुकर्माणं परलोकपथप्रपन्नं परिणतं वृद्धं तपस्विनं मुनीन्द्रं द्रष्टुं भवतामपि युज्यते युक्तं स्यात् ॥ ११५० ॥ ११५१) भणियं – भणितं च राज्ञा प्रियवयस्य यद्भणत एहि आगच्छ व्रजामः एतावन्मात्रं कुर्वता तेन किं तद् यदस्माकं न कृतम् ॥ ११५१ ॥ ११५२) एवं – एवमुक्त्वा नराधिपेन प्रथमं विजयानन्दः उद्विग्नबालहरिणाक्षि मुनेः पार्श्वे प्रेषितः ॥ ११५२ ॥ ११५३) तो दूर – [ततः] दूरकृतप्रणामः सादरं मुनीन्द्रेण दृष्टः

1) B भणियं. 2) = मुधा. 3) P कमलदलच्छि, J कम्वलच्छि, B कमलदच्छि. 4) B गोदावरी. 5) PJB निव्वत्त. 6) B बंधओ. 7) = वयं, P ण, J not specified, B णे. 8) B ता for वय. 9) B सुयम्मं. 10) B निसण्णं for पवण्णं. 11) B दट्ठुं जुत्तं च तुम्हं पि । 12) J omits च. 13) B वयस्स. 14) P किं अम्ह न तेण, J किं म्ह ण तेण, B कं जम्ह न तेण. 15) P omits तो given by JB. 16) B °भवित्री. 17) B writes also नृपो between the lines.

भणियं च तेण कुसलं राया सिरि-सालवाहणो एत्थ ।
तुह दंसण-सुह-संपत्ति-लालसो एइ अणुमग्गं[1] ॥ ११५४
तो[2] तेण समुल्लवियं एसो सो सालवाहण-णरिंदो ।
सुर-सुंदरीहिँ गिज्जइ जस्स जसो दस-दियंतेहिं ॥ ११५५
ता एयस्स ण दीसइ पडिवक्खो[3] को वि एत्थ पुहवीए ।
केवणेण[4] व इह कज्जेण आगओ णिय-पुराहिंतो[5] ॥ ११५६
सिट्ठं च तेण सव्वं तं तह सोऊण सो वि परिउट्ठो[6] ।
भणइ महेसी वद्धावणं[7] म्ह एयं तए[8] सिट्ठं ॥ ११५७
जं कह वि महाणुमईएँ[9] अज्ज हियइच्छियं समावडियं ।
लीलावई वि[10] णिव्वूढ-णियम-सुह-भायणा[11] जाया ॥ ११५८
इय एरिसे[12] समुल्लाव-वइयरे णरवई वि संपत्तो ।
तत्थेसिणो सयासं परिमिय-परिवार-परियरिओ ॥ ११५९
तो तेण महामुणिणा[13] सो राया[14] अग्घ-वत्त-सलिलेण ।
अहिसिंचिऊण भणिओ उवविसह सुहासणुच्छंगे ॥ ११६०
अह सो[15] सिंहासण-कय-परिग्गहो मुणिवरेण संलत्तो ।
अज्जम्हे हि[16] कयत्था णरणाह तुमम्मि सच्चविए ॥ ११६१

आसन्नसमासीनश्च कुशलं परिपृष्टः ॥ ११५३ ॥ ११५४) **भणियं** – भणितं च तेन कुशलं महात्मन् राजा श्रीशातवाहनस्त्वद्दर्शनसुखसंपत्तिसुखलालसोऽत्रानुमार्गमेति ॥ ११५४ ॥ ११५५) **तो तेण** – ततस्तेन मुनिनोक्तम् एष श्रीशातवाहननरेन्द्रः सुरसुन्दरीभिः देवाङ्गनाभिः दशदिगन्तैर्यस्य यशो गीयते ॥ ११५५ ॥ ११५६) **ता एयस्स** – तावदेतस्यात्र पृथिव्यां कोऽपि प्रतिपक्षो[17] न दृश्यते केन वा कार्येण निजपुरादत्रागतः ॥ ११५६ ॥ ११५७) **सिट्ठं च** – तेन विजयानन्देन सर्वं कथितं तत्तथा श्रुत्वा सोऽपि मुनिः परितुष्टः भणति महर्षिरेतदस्माकं त्वया वर्धापनमुक्तम् ॥ ११५७॥ ११५८) **जं कह वि** – यत्कथमपि महानुमत्या अद्य हृदयेप्सितं समापतितं लीलावत्यपि विनिर्व्यूढनियमसुखभागिनी जाता ॥ ११५८ ॥ ११५९) **इय** – [18]इतीदृशे उल्लापव्यतिकरे नरपतिरपि परिमितपरिवारपरिकरितस्तत्र ऋषेः सकाशं समीपं प्राप्तः ॥११५९॥ ११६०) **तो तेण** – ततस्तेन महामुनिना स राजा अर्घ्यपात्रसलिलेनाभिषिच्य भणितः उपविशत सुखासनोत्सङ्गे ॥ ११६० ॥ ११६१) **अह सो** – अथ स सिंहासनकृत-

1) B यणुमग्गं. 2) PJ omit तो given by B. 3) P °वक्को, JB °वक्खो. 4) = कियन्मात्रेण, B केण व कज्जेण इहं. 5) PB पुरो°, J पुरा°. 6) B परितुट्ठो. 7) PJB वद्धावणम्ह. 8) = त्वया हेतुना. 9) P °मईए, JB °मइए. 10) J omits वि given by PB. 11) B भाइणी. 12) B एरिसम्मि उल्लाव. 13) P मुणिणो, J not specified, B मुणिणा. 14) P omits सो, J सो राया, B नरनाहो. 15) B अह तत्थ सुहासण. 16) P ह, J हिं[=हि], B वि. 17) B पक्षे. 18) B इतीदृशमुल्लाप°.

एच्चिरयालं एवं-विहे वि अम्हेहि[1] इह भवाययणे ।
असहाया परिवसिया ससहाया कुणह एत्ताहे ॥ ११६२
एत्थ दिवसम्मि देवा कुणंति संगीययं उमावइणो ।
तेहि गएहिं णराहिव रमंति रयणीसु[2] रयणियरा ॥ ११६३
ताण वि पमुहो[3] एक्को रयणियरो भीसणाणणो णाम ।
तस्स भएण ण णिवसइ दिवसं एक्कं पि मुणि-लोओ ॥ ११६४
तो[4] तेण समं जुज्झं अज्जं[5] चिय होइ तुह[6] णिसा-समए ।
इय जाणिऊण घिप्पउ एसो मंतो ममाहिंतो ॥ ११६५
माया-छण्ण-सरीरं पि रक्खसं जेण पेच्छसि[7] णिसासु ।
तुह दंसण-वह-पडिओ पंचत्तं पावउ[8] अहम्मो[9] ॥ ११६६
एवं[10] भणिएण णराहिवेण हसिऊण से समुल्लवियं ।
भयवं अपच्छिमो अज्ज तस्स एसो णिसा-समओ ॥ ११६७
एवं भणिऊण णराहिवेण वियसंत-लोयण-मुहेण ।
गहिओ मंतो ओसंघियं[11] च तं णिसियराणीयं ॥ ११६८
अह सो[12] तेण किसोयरि बहुसो पडिवज्जिऊण वर-मुणिणा ।
संपेसिओ दिणंते णिययावासं गओ राया ॥ ११६९

परिग्रहो मुनिवरेण संलप्तः । हे नरनाथ त्वयि दृष्टेऽद्य वयं कृतार्थाः ॥११६१॥ ११६२) **एच्चिरयालं**— एवंविधा वयमियच्चिरकालमिह भवायतनेऽसहाया एकाकिनः पर्युषिताः इदानीं ससहायान् कुरुत ॥ ११६२ ॥ ११६३) **एत्थ**— अत्र दिवसे देवा उमापते-र्महेश्वरस्य पुरतः संगीतकं कुर्वन्ति । तैर्गतैः नराधिप रजनीषु रजनीचरा राक्षसाः संप्रे-क्षणीयकं कुर्वन्ते ॥ ११६३ ॥ ११६४) **ताण वि**— तेषामप्येको मुख्यः प्रधानो नाम्ना भीषणाननः तस्य भयेन मुनिलोकोऽत्र एकं दिवसमपि न वसति ॥ ११६४ ॥ ११६५) **तो तेण**— ततस्तेन समं निशासमयेऽद्य तव युद्धं भविष्यति । इति ज्ञात्वा मत्सकाशादेष मन्त्रो गृह्यताम् ॥ ११६५ ॥ ११६६) **माया**— तेन हेतुना मायाच्छन्न-शरीरमपि राक्षसं निशासमये पश्यसि । तव दर्शनपथपतितः सोऽधमः पञ्चत्वं विनाशं प्राप्नोतु ॥ ११६६ ॥ ११६७) **एवं भणिएण**— [एवं भणितेन नराधिपेन हसित्वा तस्य समुल्लपितम् । भगवन् अपश्चिमोऽद्य तस्य एष निशासमयः] ॥ ११६७ ॥ ११६८) **एवं भणिऊण**— एवं भणितेन विकसल्लोचनमुखेन नराधिपेन मन्त्रो गृहीतः । आकलितं च तन्निशाचरानीकम् ॥ ११६८ ॥ ११६९) **अह सो**— अथ स राजा

1) P अम्हेहि, B अम्हे वि. 2) B रयणीइ. 3) B मज्झ [=मज्झे or मुक्खो] for पमुहो. 4) P ता, B तो. 5) B सज्जं. 6) B तुम्ह णिसिसमए. 7) P पिच्छिसि, J पेच्छसि, B पिच्छसि. 8) PB पावओ, J पावउ. 9) =असौ पापः, P अहम्मो, B अहमो. 10) This gathā is not given by B, but found in PJ. 11) =अंगीकृतं. 12) B सो तिलोयसुंदरि.

ताव य[1] ।

विमुक्क-कर-बंधणं गयण-पायवाहिं तओ
सरेसु रहवाहिणी-विरह-कायरालोइयं[3] ।
पडेइ लवणोयहे घुसिण-विंदुमायंवयं
फलं व परिपक्कयं घण-तमारिणो विंवयं ॥ ११७०

तओ[6] ।

जइ[7] अत्थमिय-मियंके तम-णियरोरुद्ध-दस-दिसा-चक्के ।
सुह-सुत्ते जण-णिवहे अल्लीणे अद्ध-रत्तम्मि ॥ ११७१
तेण णिसायर-वइणा णिय-वल-गव्वुब्भडं वहंतेण ।
संपेसिया णरिंदस्स दोण्णि[8] दोसायरा दूया ॥ ११७२
तेहिँ भणियं णराहिव दूया णे[9] पेसिया णिसामेह ।
कज्जं सवित्थरत्थं जं तेणप्पाहियं[10] तुम्ह ॥ ११७३
जह एए दो जामा पच्छिम-रयणीएँ मज्झ उवभोगा[11] ।
जं वसइ[12] एत्थ भूयं आहारं होइ तं मज्झ[13] ॥ ११७४
ता देसु सएण णराहिवाण समएण कुंजर-सएण ।
णर-तुरय-पसु[14]-सहस्सेण मह वलिं जइ सुहं महसि ॥ ११७५
तं सोऊण[15] सरोसं भणिया पुहईसरेण ते दूया ।
जह वच्चह तुम्हे च्चिय पडिदूया तस्स णिय-पहुणो ॥ ११७६

तेन वरमुनिना हे कृशोदरि बहुशः प्रतिपद्य दिनान्ते संप्रेपितो निजकावासं गतः॥११६९॥ तावता । ११७०) विमुक्क – विमुक्तकरबन्धनं सरोपरथाङ्गकामिनीविरहकातरालोकम् । घुसृणविद्रुमाताम्रं गगनपादपात्परिपक्कं फलमिव घनतमोऽरेः रवेर्बिम्बं सूर्यमण्डलं [लवणोदधौ] पतति । पृथ्वीच्छन्दः ॥११७०॥ ११७१–७२) जइ – उदयास्तमिते मृगाङ्के तमोनिकरावरुद्धदशदिक्चक्रे सुप्तमात्रे जननिवहे अर्धरात्रे समायाते । [तेण –] निजबलगर्वोद्भटतां वहता तेन निशाचरपतिना नरेन्द्रस्य द्वौ दोषाचरौ राक्षसौ दूतौ संप्रेपितौ ॥११७१-२॥ ११७३) तेहिं – ताभ्यां भणितं नराधिप आवां तव दूतौ प्रेपितौ शृणु कार्यं सविस्तरार्थं यत् तेन भवता संदिष्टम् ॥ ११७३ ॥ ११७४) जह – यथा एतौ पश्चिमरजन्यां द्वौ यामौ ममोपभोग्यौ यदत्र भूतं चरति तदस्माकमाहारो भवति ॥ ११७४ ॥ ११७५) ता देसु – तस्मान्नराधिपानां शतेन समदेन कुञ्जरशतेन नरतुरगसहस्रेण मम बलिं देहि यदि सुखं वाञ्छसि ॥ ११७५ ॥ ११७६) तं सोऊण – तच्छ्रुत्वा पृथ्वीश्वरेण सरोषं

1) J भवि य. 2) P सरोसरहवाहिणी, J सरेसु रहवाहिणी, B सरोसरणं ह कामिणी. 3) PB °लोइयं, J °लोई. 4) P विंदुमा°, B विद्दुमा°. 5) P व्व, JB व. 6) B omits तओ. 7) P उदयत्थंमि, J जइयत्थमिय, B उयअत्थमिय. 8) P दोन्नि, J दो वि, B दुव्वन्नि. 9) = वयं, B ते. 10) = संदिष्टं, P तेणप्पाहियं, B तेण पसाहियं. 11) P उवहोगा, J उवभोगा[=ग्गा], B उवहुज्जा. 12) P जं विसइ, जं वसइ, B संचरइ. 13) B अम्ह. 14) B दस. 15) B सुणिऊण.

भण्णइ रे रक्खस एहि जेण सुणयाण वुक्कणाणं च ।
णिय-कडय-णिवासीणं देमि वलिं तुज्झ पिसिएण ॥ ११७७

एवमवरं पि वहुसो णिब्भंच्छेऊण पुहइ-णाहेण ।
पडिपेसिया सरोसेण दो वि दोसायरा दूया ॥ ११७८

तो तेहिं गएहिं णिसायरेहिं राएण कडय-वालस्स ।
आइट्ठं अपहाए मा को वि चलिज्ज कडयाहि ॥ ११७९

एक्केण सहस्सेणम्ह सरइ णरवइ-सुयाण वीराण ।
दस-साहस्सं सुवइ ताण वलं णिसियराणं पि ॥ ११८०

एवं भणिऊण तहिं वीर-सहस्सेण परिगओ राया ।
दूरंतरं सकडयाओ णिग्गओ णिसियराहुत्तं ॥ ११८१

तावय वियड-विडिंचियं-वयण-विणिंतग्गि-जाल-दुप्पेच्छं ।
रुद्दक्क-कत्तियाणल-फुलिंग-पिंगलिय-गयण-यलं ॥ ११८२

पम्मुक्क-फार-फेक्कार-राव-पडिसद्द-पूरिय-दियंतं ।
णयण-हुयास-समोसरिय-तिमिर-पायडिय-णिय-रूवं ॥ ११८३

15 तौ दूतौ भणितौ । यथा व्रजतं युवामेव प्रतिदूतौ तस्य निजप्रभोः । भणितमित्युत्तरगाथयाथ[16] संवन्धः ॥ ११७६ ॥ ११७७) भण्णइ – भणितं रे राक्षस एहि आगच्छ येन शुनां वुक्कणाणं काकानां च निजकटकसमासन्नं तव पिशितेन मांसेन वलिं ददामि ॥ ११७७ ॥ ११७८) एवमवरं – एवमपरमपि वहुशो निर्भर्त्स्य सरोषेण पृथ्वीनाथेन तौ दोषाचरौ दूतौ प्रेषितौ ॥ ११७८ ॥ ११७९) तो तेहिं – ततस्ताभ्यां
20 निशाचराभ्यां [गताभ्यां] राज्ञा कटकपालस्यादिष्टम् अप्रभाते कटकात् कोऽपि मा चलेत् ॥ ११७९ ॥ ११८०) एक्केण – नरपतिसुतानां वीराणामेकेन सहस्रेणास्माकं पूर्यते । तेषां निशाचराणां दशसाहस्रीवलं श्रूयते ॥ ११८० ॥ ११८१) एवं भणिऊण – एवं तत्र भणित्वा वीरसहस्रेण परिगतो राजा स्वकटकान्निशाचरं प्रति दूरंतरं निर्गतः ॥ ११८१ ॥ ११८२–८५) तावय – तावता विकटप्रसारितवदनविनिर्गच्छदग्नि-
25 ज्वालादुःप्रेक्ष्यम् । रौद्रकार्तिकानलस्फुलिङ्गपिङ्गलितगगनतलम् ॥ [पम्मुक्क-] प्रमुक्तस्फारफेत्काररावप्रतिशब्दपूरितदिगन्तम् । नयनहुताशनसमुत्सारिततिमिरप्रकटीकृतनिज-

1) B भण[=णि]यं. 2)=भिल्लानां । शृगालानां वा. 3) PB निवसीणं, J समासीणं. 4) PB निब्भ°, J णेब्भ°. 5) PB रायेण, J राएण. 6) B कडयाहिं. 7) B धीराणां[=णं]. 8) B निसीय°. 9) B writes some portion on the margin, and omits this gāthā, though its commentary is preserved. 10) P निस्सायराहुत्त, J णिसियराहुत्तं. 11) P विडिंविय, J विडिंचियं. B विंयंविय. 12) P विणित्त[=णिंत], J विणन्त, B विणिंत्ति. 13)=रौद्र. 14) PB गयण, J गयणि. 15)=प्रकटित. 16) B गाथ यथा. 17) B कार्तिका°.

सरसंतमयाइ-णिवद्ध-थोर-खर-कविल-केस-पब्भारं[1] ।
णर-सिर-माला-मंडलिय-वियड-विणियंसण-णियंवं[2] ॥ ११८४

अलि-गवल-सजल-जलहर-तमाल-कलयंठि-कज्जल-च्छायं ।
ओत्थरियं रयणि-यराण तं वलं णरवराहुत्तं ॥ ११८५[3]

ललक्क-हक्क-फेक्कार-मुक्क-णीसंक-कोक्किय[4]-भडोहं ।
संलग्गं णरवर-रक्खसाण णिसि दारुणं जुज्झं ॥ ११८६

केणावि को वि कुविएण णरवरो णिसियरेण तह पहओ ।
जह दोहाइय[5]-देहो वि णिवडिओ पडिय-पडिवक्खो ॥ ११८७

फरुसासि-पहारुक्खुडिय-कंधरो को वि अमरिस-वसेण ।
आभामइ अणलक्खं पि मंडलग्गं महा-सुहडो ॥ ११८८

मुच्छा-विराम-संभरिय-सामि-संभावणा-परिग्गहिओ ।
अविणिज्जिय-वेरि-वलो हीरइ लज्जाए को वि भडो ॥ ११८९

पहर-वडियस्स[6] कस्स वि रयणि-यरो रोस-हुयवह-पलित्तं ।
वप्फायंतं फुक्कारयं[7] व[8] उर-सोणियं पियइ ॥ ११९०

विम्बम् ॥ [सरसंत-] सरसाश्रमपातिनिवद्धस्थूलकरकपिलकेशप्राग्भारम् । नरशिरोमालामण्डितविकटनिवसननितम्बम् ॥ [अलि-] अलिगवलसजलजलधरतमालकलकण्ठीकज्जलच्छायम् । रजनीचराणां तद्बलं नरवरं प्रति ढौकितम् ॥ [9]विडंचियं प्रसारितम् । कर्तिका शस्त्रिका । गवलं माहिषं शृङ्गम् । [10]कलापकम् ॥ ११८२-८५ ॥ ततः । ११८६) ललक्क-[रौद्राह्वानफेत्कारमुक्तनिःशङ्क-]व्याहृतभटौघम् । नरवरराक्षसयोर्निशि दारुणं युद्धं संलग्नम् । 'व्याहृते कोक्कपोक्कौ' [हैम० ८-४-७६] इति कोक्किय ॥ ११८६ ॥ ११८७) केणावि-केनापि कुपितेन राक्षसेन कोऽपि नरस्तथा प्रहतो यथा द्विधाकृतदेहोऽपि पातितः प्रतिपक्षो निपातितः ॥ ११८७ ॥ ११८८) फरुसासि-परुषासिप्रहारत्रुटितकंधरः कोऽपि महासुभटोऽमर्षवशेनालक्ष्यं मोघं मण्डलाग्रं खड्गं भ्रमयति ॥११८८॥ ११८९) मुच्छा-मूर्च्छाविरामसंस्मृतस्वामिसंभावनापरिगृहीतोऽविनिर्जितवैरिवलः कोऽपि भटो लज्जया गृह्यते ॥ ११८९ ॥ ११९०) पहर-प्रहारपतितस्य कस्यापि रोपहुतवह[11]प्रज्वलितमुरःशोणितं रक्तं रजनीचरो वाष्पायमानं फुक्कारयं

---

1) = अंत्रमाला, P सरसत्तमाइनिव्वद्ध, J सरसंतमयाइणिवद्ध, B सरसंतमयाइमिवद्ध. 2) P मंडियवियडणियंसण, J मंडलियवियडणियंसण, B मंडियवियडविणियंसण. 3) B omits a portion of this gāthā. 4) = आहूत. 5) P दोभाइय, JB दोहाइय. 6) P वडियस्स, J वियडियस्स, B पडियस्स. 7) = फोकरउड. 8) P च, B व. 9) B विडंचित्तं. 10) B puts कलापकम् at the close of gāthās. 11) B प्रक्षालि°.

दूरेण परिहरिज्जइ दढ-मुट्ठि-णिवीडियासि-वीहच्छो[1] ।
रयणीयरेण सुहडो विमुक्क-जीओ[2] वि सभएण ॥ ११९१
माया-छण्ण[3]-सरीरेहिं तेहिं दोसायरेहिं हम्मंतं[4] ।
दट्ठूण वलं[5] पुहईसरेण सो सुमरिओ मंतो ॥ ११९२
जो जत्तो[6] च्चिय दिट्ठो तत्तो च्चिय सो सियासि-पहरेण ।
दोहाइओ[7] णरिंदेण णिसियरो झत्ति कुविएण ॥ ११९३
तो सो अतुलिय-थामो वि तेण भीमाणणो णरिंदेण ।
वज्जधरेण[8] व सेलो णिप्पक्खो तक्खणेण कओ ॥ ११९४
णिल्लूण[9]-चलण[10]-कर-टंक-खंड[11]-खंडिय[12]-पिसाय-संघाए ।
सज्जुण्ह[13]-सोणिय-प्पवह[14]-पंक-खुप्पंत-वेयाले[15] ॥ ११९५
अल्लीण-डाइणी[16]-सय-समूह-परिवेस-रसिय[17]-सिव-णिवहे ।
पडिउद्ध[18]-गिद्ध-मंडलि-मिलंत-विलसंत[19]-गोमाए ॥ ११९६
इय एरिसम्मि सुंदरि णीसेसे[20] सुद्ध-सुहड-संघाए ।
मय-उबरिय[21]-पलायंत-कायरे रक्खसाणीए ॥ ११९७
णिय-वल-विणास-दंसण-जायामरिसेण तेण वाहित्तो[22] ।
णरणाहो रयणि[23]-यरेण णिसिय-करवाल-हत्थेण ॥ ११९८

[फूत्कारयन्] उष्णं दुग्धमिव पिबति ॥ ११९० ॥ ११९१) **दूरेण** – दृढमुष्टिनिविष्टासिवीभत्सो विमुक्तजीवोऽपि सुभटः सभयेन रजनीचरेण दूरेण भ्रह्रियते ॥ ११९१॥ ११९२) **मायाछण्ण** – मायाच्छन्नशरीरैः तैर्दोषाचारैर्निहन्यमानं बलं दृष्ट्वा पृथ्वीश्वरेण स मन्त्रः स्मृतः ॥ ११९२ ॥ ११९३) **जो जत्तो** – यो निशाचरो यत्रैव दृष्टः स ततः एव सितासिप्रहारेण नरेन्द्रेण कुपितेन झटिति द्विधाकृतो विनाशितः ॥ ११९३ ॥ ११९४) **तो सो** – ततः सोऽतुलितस्थामापि भीमाननो रक्षःपतिः वज्रधरेण इन्द्रेण शैलः पर्वतः इवार्धक्षणेन नरेन्द्रेण निष्पक्षः कृतः ॥ ११९४ ॥ ततः । ११९५-९८) **णिल्लूण** – हे सुन्दरि सावित्रि छिन्नचरणकरटंकखण्डखण्डितपिशाचसंघाते । सद्यस्कोष्णशोणितप्रवाहपङ्कमज्जद्वेताले ॥ [**अल्लीण** -] आलीनडाकिनीशतसमूहपरिवेषरसितशिवनिवहे । पतितोर्ध्वगृद्धमण्डलमिलद्द्रवसुखितगोमायुनि ॥ [**इय** -] इतीदृशे निःशेषे शुद्धसुभटसंघाते मृतोद्धृतपलायमानकातरे राक्षसानीके निशिचरकटके सति ॥ [**णियवल** -]

1) P वीभच्छो, JB वीहच्छो. 2) PB जीओ, J जीए. 3) PB च्छन्न, J not specified. 4)= हन्यमानं. 5) B दलं. 6) B जित्तो. 7) P दोभाइओ, J दोहाईओ, B दोहायिओ. 8) B वज्जुहरेण. 9) B has the word तओ । at the beginning of this gāthā. 10) P निलूणचकणकरचंक, J णिल्लूणचलणकरटंक, B निल्लूरचरणकरटंक. 11)=मस्तक. 12) B खंडिय 13)=सद्योष्ण. 14) P पवाह, JB प्पवह. 15) PB वेयालो, J वेयाले. 16) PB डाइणी, J डायणी. 17) P रसिय, JB रसिय. 18)=प्रतिलुब्ध. 19) B रवसुहिय for विलसंत. 20) P नीसेस, J णीसेसे, B नीसेसे. 21) P उच्चरिय, J उव्वरिय, B उद्धरिय. 22) PB वाहित्तो, J वाहितो. 23) P रयणी°, JB रयणि°. 24) B झवह.

णरणाह इमो सो तुज्झ अज्ज सुर-वहु-सुहागम-मुहुत्तो[1] ।
आसण्ण-मच्चु-संकेय-वासरो पहर प्पत्ताहे ॥ ११९९
भणियं च राइणा णिसियरेस पहरेहि[2] पोरिसासंघो[3] ।
णिव्वडइ समासण्णेक्कमेक्क-करवाल-धाराए ॥ १२००[4]
ता भरसु को वि[5] जइ अत्थि तुज्झ एवं-विहे समावडिए ।
रक्खइ मुहुत्त-मेत्तं[6] पि जीवियं सुरवराणं पि ॥ १२०१[7]
एवं भणिरस्स णराहिवस्स भीमाणणेण[8] पहर-समं[9] ।
दोहाइयं सरोसेण[10] चम्म[11]-रयणं[12] कुरंगच्छि ॥ १२०२
राएण वि सो फरुसासि[13]-पहर-णिल्लूण[14]-कंधरा-वंधो ।
अइ-विरसं विरसंतो धरणियले पाडिओ सहसा ॥ १२०३
तो तक्खण-संपुण्णेंदु-बिंब-सविसेस-पसरिय-पहोहो ।
जाओ अणण्ण[15]-रूवो पुरिसो पज्जुण्ण-सारिच्छो ॥ १२०४
तो तेण सो णरिंदो साहुक्कारक्खरेहिँ पुणरुत्तं ।
अहिणंदिऊण भणिओ ण तुमाओ पियंकरो अम्ह ॥ १२०५

निजबलनिर्नाशनदर्शनेन कृत्वा रोषारुणेन रजनिचरेण निशितकरवालहस्तेन नरनाथो व्याहृतः आकारितः हाकितः इत्यर्थः । टंकः टंकिका सारमयी । सुहिताः तृप्ताः गोमायवः शिवाः श्वाशृगालाः । कलापकम्[16] ॥ ११९५-९८ ॥ ११९९) णरणाह – नरनाथ एष स तावदद्य सुरवधूसमागममुहूर्तः । आसन्नमृत्युसङ्केतवासरः मृत्योः सङ्केतस्थानं तवाद्य इदानीं प्रहर अपूर्व प्रहारं देहि ॥ ११९९ ॥ १२००) भणियं – भणितं च राज्ञा निशाचरेश प्रहर त्वमेव पूर्वं प्रहारं देहि समासन्नमेकैककरवालधाराभिः पौरुषसंभावना निर्वटिष्यति-प्रकटो भविष्यतीत्यर्थः ॥१२००॥ १२०१) ता भरसु – संसार कोऽप्यस्ति चेद्यस्त्वेवंविधे निशासमये मुहूर्तमात्रं सुरवराणामपि जीवितं रक्षति ॥१२०१॥ १२०२) एवं – एवं भणतो[17] नराधिपस्य भीमाननेन सरोषेण प्रहारसमं चर्मरत्नं फलकं द्विधाकृतम् । हे कुरङ्गाक्षि सावित्रि ॥ १२०२ ॥ १२०३) राएण – राज्ञा सोऽपि परुषासिप्रहारच्छिन्नकन्धराबन्धः । अतिविरसं रसन् सहसा धरणितले पातितः ॥१२०३॥ १२०४) तो तक्खण – ततः प्रहारानन्तरं तत्क्षणसंपूर्णेन्दुबिम्बसविशेषप्रसृतप्रभौघोऽनन्तरूपः प्रद्युम्नसदृशः साक्षात्कामदेवपुरुषो जातः ॥ १२०४ ॥ १२०५) तो तेण – ततस्तेन पुरुषेण नरेन्द्रः साधुकाराक्षरैः साधु साधु इति पुनरुक्तमभिनन्दितः

1) B समागम. 2) P पहरेहिं, B पहरेहि. 3) B पुरिससंवाए. 4) P 1200, J 1199, B 1202. 5) B निसासमए for समावडिए. 6) P °मेक्कं, J °मेत्तं, B °मित्तं. 7) P numbers this verse also 1200, and the following verses are numbered 1201,2, etc. 8) P भीसणाण°, B भीमाण°. 9) = प्रहारेण समं. 10) B नरिंदस्स for सरोसेण. 11) PB धम्म, J चम्म. 12) = करिका [= फरिका]. 13) P फरसा°, J फरुसा°, B पुजसा° [?]. 14) PJB निलूण. 15) B अणंत°. 16) B puts this at the close of gāthās. 17) B भणितो.

ता केत्तियं च भण्णइ एसो हं तुह[1] णरेंद साहीणो ।
जं महसि किंचि दुलहं पि[2] देमि जं अम्ह साहीणं ॥ १२०६
तं[3] सोऊण सविब्भम-हियय-ण-मायंत-कोउहल्लेण ।
राएणं[4] समुल्लवियं किं च[5] ण लब्भइ तुमाहिंतो ॥ १२०७
5 ता[6] साहिज्जउ के तुम्हि एत्थ एवं-विहा वि एयाण ।
पाव-मईणं हय-रक्खसाण मज्झम्मि संवसिया ॥ १२०८
भणियं च तेण णरवइ एयं खलु वित्थरेण कहियव्वं ।
तुम्हेहि मि[7] परिसुढिया रक्खस-वह[8]-दुप्पसंगेण ॥ १२०९
तह वि णिसामह सीसइ गंधव्व-सुओ हमेत्थ पुहईए ।
10 अवयरिओ सुर-सरि-मज्जणेक्क-हियओ[9] दिवाहिंतो ॥ १२१०
ता[11] तत्थ मए हिमगिरि-णियंब-तरु-मणहरे वणुद्देसे ।
सच्चविया[12] तेलोक्केक्क[13]-सुंदरी कुसुम-वोच्चिणिया[14] ॥ १२११
अह सा मए सकोऊहलेण[15] उवसप्पिऊण पासम्मि ।
सहस त्ति साहिलासेण पुच्छिया सुयणु का तं सि ॥ १२१२[16]
15 तो तं सोऊण समाहि तीए णरणाह णेहलं वयणं ।
भणियं अहमेत्थ च्चिय वणवासि-महेसिणो धूया ॥ १२१३

भणितश्च तेन [न त्वत्तः] प्रियंकरोऽस्माकम् ॥१२०५॥ १२०६) **ता केत्तियं** – तस्मात्किमियद्भण्यते एषोऽहं तव नरेन्द्र स्वाधीनः यत्किमपि दुर्लभमपि कांक्षसि तत्तवाप ददामि तावद्भण ॥ १२०६ ॥ १२०७) **तं सोऊण** – ततः श्रुत्वा सविभ्रमहृदया-
20 मातकौतूहलेन राज्ञा समुल्लपितं किं न लभ्यते वा त्वत्तः ॥ १२०७ ॥ १२०८) **ता साहिज्जउ** – ततः कथ्यतां के यूयमत्रैवंविधा अप्येतेषां पापमतीनां हतराक्षसानां मध्ये संस्थिताः ॥ १२०८ ॥ १२०९) **भणियं** – भणितं च तेन नरपते एतत्खलु सुविस्तरेण कथयितव्यम् । राक्षसवधदुःप्रसंगेन यूयमपि क्लेशिताः ॥ १२०९ ॥ १२१०) **तह वि** – तथापि शृणुत शिष्यते अत्र पृथिव्यां सुरसरिन्मज्जनैकसुहृदयोऽहं गन्धर्वसुतो
25 दिवः स्वर्गादत्रावतीर्णः ॥ १२१० ॥ १२११) **ता तत्थ** – ततः तत्र मया हिमगिरिनितम्बतरुमनोहरे वनोद्देशे त्रैलोक्यसुन्दरी कुसुमावचायिका दृष्टा ॥ १२११ ॥ १२१२) **अह सा** – अथ सा कौतूहलेन मया समीपमुपसर्प्य साभिलाषेण सहसा पृष्टा सुतनु का त्वमसि ॥ १२१२ ॥ १२१३) **तो तं** – ततो मत्तः तच्छ्रुत्वा तया नर-

1) P omits तुह given by JB. 2) PJB किं पि; B तं देमि तुहज्ज दे भणेसु[=भणसु] for पि
30 etc. 3) B तो. 4) PB रायेण, J राएण 5) P कं च न, J कं च ण, B किं न. 6) P ता साहिप्पउ, B तो साहिज्जउ. 7) B तुम्हे वि य परिसढिया. 8)=श्रांता. 9)=वध. 10) B चित्तो for हियओ. 11) B तो. 12) P सच्चरिय, JB सच्चविया. 13) P तिलोक्केक, J तेलोक्केक, B तइल्लुक. 14) P उचि°, J वोचि°, B वुचि°. 15) B सा वि मए कोऊ°. 16) P numbers this verse 1211 and the next 1213,14 etc; perhaps a scribal error.

भणियं च मए सुंदरि अविरुद्धं दंसणं[1] म्ह ता इण्हिं ।
गंधव्वेसाण कुले अहं पि विउले समुप्पण्णो ॥ १२१४
चित्तंगयाभिहाणो तुह दंसण-कोहलेण अवयरिओ ।
जइ होसि सप्पसाया ता जुत्तं वम्महेण कयं ॥ १२१५
एवं भणिऊण मए सा णरवइ[2] तत्थ णिज्जणे रण्णे ।
परिणीया णिय-विहिणा अच्चुग्ग-महेसिणो धूया ॥ १२१६[3]
तो तं तिहुयण-रज्जाहिसेय-सरिसं सुहं विहावंतो[4] ।
ताव ट्ठिओ[5] णराहिव जा सो वि रिसी तहिं पत्तो ॥ १२१७
भणियं च तेण कुसुमाल[6] सहइ तुह[7] अम्ह परिहवं काउं ।
एत्तिय-मेत्तेणं चिय विहवुम्माएण मत्तो सि ॥ १२१८
ता पावेक्क-मईणं मज्झे रयणीयराण रयणि-यरो ।
वारह वरिसाइँ अणज्ज होसि पिसियासणो तं सि[8] ॥ १२१९
एवं वारह-वरिसावहीएँ[9] पुण्णाएँ णरवराहिंतो ।
पाविहिसि सिर-च्छेयं तइया मुच्चिहसि[10] सावेण ॥ १२२०
ता एसो सो समओ संपइ दिट्ठम्मि[11] जं तए होइ ।
तं संपडियं दे भणह किं पि जं अम्ह कायव्वं ॥ १२२१

नाथ स्नेहयुक्तं वचनं भणितम् । अहमत्र वनेषु वनवासिनः धूया पुन्यसि ॥ १२१३ ॥ १२१४) भणियं च – भणितं च मया सुन्दरि तावदिदानीमावयोर्दर्शनमविरुद्धं युक्तमित्यर्थः । यतोऽहमपि विमले गन्धर्वेशानां कुले समुत्पन्नः ॥ १२१४ ॥ १२१५) चित्तंगय – चित्राङ्गदाभिधानस्त्वद्दर्शनकौतूहलेनावतीर्णः । यदि सप्रसादा भवसि तद्युक्तं मन्मथेन कृतम् ॥ १२१५ ॥ १२१६) एवं भणिऊण – एवं भणित्वा नरपते निर्जनेऽरण्ये सा अत्युग्रमहर्षेः पुत्री निजविधिना परिणीता ॥ १२१६ ॥ १२१७) तो तं – ततस्त्रिभुवनराज्याभिषेकसदृशं सुखं भुञ्जानो नराधिप तावत्स्थितो यावत् स ऋषिः तत्र प्राप्तः ॥ १२१७ ॥ १२१८) भणियं – भणितं च तेन ऋषिणा रे कुसुमाल चौर किमस्माकं पराभवं कर्तुं कश्चित्सहते क्षमते । एतावन्मात्रेणापि विभवोन्मादेन मत्तोऽसि युक्तायुक्तं न विचारयसि ॥ १२१८ ॥ १२१९) ता पावेक्क – तस्मादनार्य पापैकमतीनां रजनीचराणां मध्ये द्वादश वर्षाणि पिशिताशनो रजनीचरो भविष्यसि ॥ १२१९ ॥ १२२०) एवं – एवं द्वादशवर्षावधौ पूर्णे नरवराच्छीर्षच्छेदं प्राप्स्यसि तदानीं शापेन मोक्ष्यसे ॥ १२२० ॥ १२२१) ता एसो – ततः एष समयो यस्त्वयि

---

1) PJB दंसणम्ह. 2) B नरवइ निज्जणे महारण्णे [=ण्णे]. 3) P numbers this as well as the next verse 1216, and then 17 etc. 4) B सुहं च भुंजंतो. 5) B तावच्छिओ. 6) = चौर, PB कुसुमाल, J सुकुमाल. 7) B मुअम्ह for तुह अम्ह. 8) P omits म्मि given by JB. 9) B वहिए. 10) P मुच्चिहिसि, JB मुच्चिहसि. 11) B दिट्ठेण.

तं तह सोऊण णराहिवेण सहस त्ति वियसिय-मुहेण ।
भणियमहो दूरयरं णीया णे[1] सुकइ-परिणइए ॥ १२२२
णण्णं[3] इमाउ अहियं भणियव्वं अत्थि जं भणामि अहं ।
दीसउ[4] सा संपइ कुवलयावली विरह-किसियंगी ॥ १२२३
भणियं च तेण सहसा सव्वंगुव्वूढ-बहल-पुलएण ।
परिहास-समुल्लवियं पि जणइ णरवइ परं हरिसं ॥ १२२४
कत्तो पुण्णेहिं विणा कस्स वि एवं-विहं समावडइ ।
तह वि हु पुच्छामि फुडं सब्भावं कहसु एत्ताहे ॥ १२२५
अह तस्स तेण कुवलय-दलच्छि गंधव्व-राय-तणयस्स ।
णीसेसं वज्जरियं णरवइणा सहरिसासेणं[5] ॥ १२२६
तो तेण णं-माइय[6]-हियय-पहरिसुप्फुल्ल-लोयण-मुहेण ।
भणियं ता किं अच्छइ अज्ज वि मलयाणिलस्स सुओ ॥ १२२७
एत्थावसरे कुवलय-दलच्छि परिओस-पूरिय-सरीरो ।
विजयाणंदो लीलावईए तुरियं गओ पासं ॥ १२२८
अह सो वि[7] चिंतिओ च्चिय संपत्तो माहवाणिलो तत्थ ।
सिद्धंगणा-सहस्सेण आगओ[8] मलय-सेलाहि[9] ॥ १२२९

दृष्टे भवति हे नरनाथ तत्संप्राप्तम् । तावद्भण यदस्माकं किमपि कर्तव्यं यत्कर्तव्यं तदादिश्यतामित्यर्थः ॥१२२१॥ १२२२) तं तह — तत्तथा श्रुत्वा विकसितमुखेन नराधिपेन सहसेति भणितम् अहो वयं सुकृतपरिणत्या दूरतरं नीताः । सुकृतमेव परिपक्वमित्यर्थः ॥ १२२२ ॥ १२२३) णण्णं — णंमिति वाक्यालङ्कारे । नेतोऽधिकं भणितव्यमस्ति यदहं भणामि । तथापि विरहकृशाङ्गी दृश्यतां संप्रति सा कुवलयावली ॥१२२३॥ १२२४) भणियं — सर्वाङ्गोद्व्यूढबहलपुलकेन तेन गन्धर्वसुतेन भणितं च हे नरपते परिहाससमुल्लपितमपि परं हर्षं जनयति ॥ १२२४ ॥ १२२५) कत्तो — कुतः पुण्यैर्विना कस्याप्येवंविधं समापतितं तथापि पृच्छामि स्फुटं सद्भावमिदानीं कथय ॥१२२५॥ १२२६) अह तस्स — अथ हे कुवलयदलाक्षि सहर्षाङ्गेन नरपतिना तस्य गन्धर्वराजतनयस्य चित्राङ्गदस्य निःशेषं कथितम् ॥ १२२६ ॥ १२२७) तो तेण — अथ तेनामातृहृदयप्रहर्षोत्फुल्ललोचनमुखेन भणितं तत्किमद्यापि मलयानिलस्य सुतोऽस्ति ॥१२२७॥ १२२८) एत्थावसरे — अत्रावसरे कुवलयदलाक्षि परितोषपूरितशरीरो विजयानन्दस्त्वरितं लीलावत्याः पार्श्वं गतः ॥ १२२८ ॥ १२२९) अह सो — अथ सोऽपि विचिंतितो माधवानिलस्तत्र संप्राप्तः । कीदृशः सन् । सिद्धाङ्गनासहस्रेण परिगतः । कस्मात् ।

---

1) = वयं. 2) P °णईए, B °णइए. 3) = नान्यत्, B णं णे 4) B दीसइ. 5) P °सासेणे, J सासेण, B संसेण 6) P ण माईय, J ण माइय, B असाइय. 7) B वि विम्हिओ. 8) B परिगओ for आगओ. 9) PB °हि, J °हिं.

सच्चविओ[1] सो गंधव्व-णंदणो सिद्ध-राय-तणएण ।
अमय-वरिसो व्व हियए पवरिसिओ एक्कमेक्काण ॥ १२३०
समइच्छिऊण[2] भणियं तेहिँ मि[3] अण्णोण्ण-हरिसियंगेहिं ।
अहिणंदिऊण[4] देव्वं चिरं च बहु मण्णिओ अप्पा ॥ १२३१
एरिसए पत्थावे विजयाणंदो वि वियसियच्छि-मुहो ।
वद्धाविऊण कुमरीओ[5] तक्खणं आगओ सहसा ॥ १२३२
तो[6] दूर-कय-पणामो तिण्हं पि हु ताण हाल-पमुहाण ।
सव्वायरोवणीयासणम्मि पुरओ समासीणो ॥ १२३३
भणियं[7] च राइणा पिय-वयंस दिट्ठा मए[8] महाणुमई ।
वद्धाविया फुडं कुवलयावली विरह-किसियंगी ॥ १२३४
भणियं च तेण णरवइ एक्कासण[9]-संठियाओ दिट्ठाओ ।
तिहुयण-सिरीउ णज्जइ[10] णज्जइ अह तिण्णि संझाओ ॥ १२३५
वद्धाविऊण सिट्ठं[11] चित्तंगय-माहवाणिलेण समं ।
संपत्तो णरणाहो जायं हियइच्छियं तुम्ह ॥ १२३६
चिरयाल[12]-संचिओवच्छियाइँ एयाइँ ताइँ तव-तरुणो ।
भुंजह फलाइँ भयवइ संपइ जिय-लोय-साराइं ॥ १२३७

